अद्यत्वे हि केषांचिदुभयचिकित्साविदामयं पन्था यद्रुग्णं दृष्ट्वा प्रथमं disease of the nervous system अथवा inflammation of the nerve इति निदानं कृत्वा ततः वातोऽत्र दोषः इति निदाननिश्चयः। एतद्दृष्ट्वा ममेयं जिज्ञासोत्पन्ना–' पाश्चात्यचिकित्साप्रचारात्पूर्वं यदा च पाश्चात्यानां nervous system एव नावगतमासीत्तदा किमायुर्वेदीयैर्दोषनिश्चयः कृतो वा नवेति कृतश्चेत्कथम्? किमायुर्वेदस्य स्वतन्त्रता युक्तियुक्ता निदानपद्धतिनास्ति? इति। अनयैव जिज्ञासया प्रचोदितः, आचार्यवर्यैरनुनीयमानः आतुरालये रुग्णानवेक्षमाणस्तैरेवाचार्यवर्यैः प्रदर्शितमार्गश्चैतन्निबन्धलेखनेऽहं प्रयत्नं कृतवान्। अत्र च सम्प्राप्तिलक्षणयोस्सम्बन्धमुल्लेखयन् लक्षणैस्सम्प्राप्तिघटकानां दोषदूष्याणां ज्ञानं कथमायुर्वेदपद्धत्या कर्तुं शक्यत इति यथामति वर्ण्यते। अनेन चायुर्वेदस्य वैशिष्ट्यं सिध्यतीति मन्ये।

* * *

## *सम्प्राप्तिलक्षणयोः सम्बन्धः

### प्रयोजनम्

अथ सम्प्राप्तिलक्षणयोरत्र सम्बन्धः प्रतिपादनीयः। अस्य च प्रयोजनं किम्? इति प्रश्नः उदेति। सम्प्राप्तिर्हि चरकसुश्रुताद्यार्षग्रन्थेषु तद्व्याख्यानेषु तथा माधवनिदाने तस्य मधुकोषव्याख्यायां च सविस्तरं वर्णिता, लक्षणानि च प्रतिव्याधि वर्णितानि, तयोरत्र प्रतिपादनं निष्फलं केवलं आम्रेडितमेव। अथ तयोः सम्बन्धः न केनाऽपि प्रतिपादितः अतोऽत्र प्रयास इति चेन्न। एतादृशसम्बन्धस्याश्रुतपूर्वत्वात्केवलं स्वकपोलकल्पितस्य निष्प्रयोजनत्वात् काकदन्तपरीक्षाग्रन्थवदस्यानुपादेयत्वं भवति। न हि प्रयोजनमनुद्दिश्य मन्दोऽपि प्रवर्तते।

यदुक्तं–

अभिधेयफलज्ञानविरहस्तिमितोद्यमाः, श्रोतुमल्पमपि ग्रन्थं नाद्रियन्ते हि साधवः–अतोऽत्र प्रयोजनमेव प्रथमं प्रतिपाद्यते।

**हेतुलिंगौषधात्मकस्यायुर्वेदस्य प्रयोजनं तावत् धातुसाम्यम्।** ' कार्यं धातुसाम्यमिहोच्यते ' ...... " धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनं " ( च. सू. अ. १–५३ )। " याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः। सा चिकित्सा विकाराणां कर्म तद्भिषजां मतम् " (च. सू. १६–३४) **एतत्कार्यं साधयितुं दशविधं तु परीक्ष्यं भवति।** सर्वं सर्वथा सम्यक् ज्ञात्वा कर्मसमारम्भ इष्टार्थफलदायकौ भवति। तथा चोक्तं चरकेण " ज्ञानपूर्वकं हि कर्मणां समारम्भं प्रशंसन्ति कुशलाः ज्ञात्वा हि कारणकरण–कार्ययोनि–कार्य–कार्यफल–अनुबन्ध–देशकालप्रवृत्त्युपायान् सम्यगभिनिर्वर्तमानः कार्याभिनिर्वृत्ताविष्टफलानुबन्धं कार्यमभिनिर्वर्तयत्यनतिमहता यत्नेन कर्ता " ( च. वि. अ. ८–६८ )। पुनश्चैतत् विस्तरयत्यग्रे–दशविधं तु परीक्ष्य कारणादि यदुक्तमग्रे तदिह भिषगादिषु संसार्य संदर्शयिष्यामः–इह कार्यप्राप्तिकारणं भिषक्, करणं पुनर्भेषजं कार्ययोनिर्धातुवैषम्यं, कार्यं धातुसाम्यं कार्यफलं सुखावाप्तिः, अनुबन्धः खल्वायुः, देशो भूमिरातुरश्च, कालः पुनः संवत्सरश्चातुरावस्था च, प्रवृत्तिः प्रतिकर्मसमारम्भः, उपायस्तु भिषगादीनां सौष्ठवमभिविधानं च सम्यक् " **एषु दशसु मध्ये धातुसाम्यं हि कृत्स्नस्यायुर्वेदस्य प्रयोजनम्।**

धातुसाम्यस्य योनिस्तु धातुवैषम्यमेव "कार्ययोनिस्तु या विक्रियमाणा कार्यत्वमापद्यते " ( च. वि. ८ ) **वैद्यस्य हि प्रधानं लक्ष्यं धातुवैषम्यापनयनम्।** रोगिसकाशं गतो भिषक् धातुवैषम्यं कीदृशमित्येवावेक्षते प्रथमम्। अतस्तस्य

परीक्षा चिकित्साप्रवृत्तौ अनिवार्या सर्वप्रधाना च भवति । तस्य परीक्षा चैवमुक्ता चरकेण " कार्ययोनिर्धातुवैषम्यं तस्य लक्षणं विकारागमः । परीक्षा त्वस्य विकारप्रकृतेश्चैवोनातिरिक्तालिङ्गाविशेषावेक्षणं विकारस्य च साध्यासाध्यमृदुदारुणलिंगविशेषावेक्षणामिति । ( च. वि. ८ )

धातुवैषम्यमेव हि व्याधिः " विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते " । ( च. सू. अ. ९ ) तदेव कार्ययोनिः । तदेव सर्वथा परीक्षितव्यम् । " तस्योपलब्धिश्च निदानपूर्वरूपलिंगोपशयसंप्राप्तितः । " ( च. नि. अ. १–६ )

अत्रेयं जिज्ञासा यत् निदानादयो हि दर्शनस्पर्शनप्रश्नादिभिर्विज्ञानोपायैर्ज्ञातुं शक्यन्ते । संप्राप्तिस्तु कथं ज्ञातुं शक्यते । ज्वरे हि कुपितदोषस्यामाशये प्रवेशः, रसस्वेदवहस्रोतोऽवरोधः, पक्तिस्थानादूष्मणो बहिर्निरसनमित्याद्याभ्यन्तर विकृतिः कथं ज्ञायते ? न हि प्रत्यक्षतः द्रष्टुं शक्यते, ज्वरिणः आमाशयं भित्वा परीक्षणेऽपि तत्र वातस्य स्थितिर्न भवेत् । वातोऽह्यनवस्थितः, असंघातवांश्च ऊष्मणो निरसनादिकमपि नैवोपलभ्येत । पूर्वाचार्यैरपि तादृशः प्रत्यक्षपरीक्षाविधिर्न वर्णितः ।

पुनर्वस्वग्निवेशप्रभृतयो हि परमर्षयः, यदस्माकमप्रत्यक्षं तत्सर्वं योगदृष्टीनां तेषां प्रत्यक्षमासीदिति कैश्चिदुच्येत । तैश्चैवमुदाह्रियन्ते चरकवचनानि " कः स्यात्तेषां शमोपाय इत्युक्त्वा ध्यानमास्थिताः । अथ ते शरणं शक्रं ददृशुर्ध्यानचक्षुषा स वक्ष्यति शमोपायं यथावदमरप्रभुः " ( च. सू. १-१७ ) महर्षयस्ते ददृशुर्यथावज्ज्ञानचक्षुषा ( च सू. १-५८ ) अत्र ध्यानचक्षुः ज्ञानचक्षुश्च योगदृष्टिरेवेति वदन्ति । तथा चोक्तं मुक्तावल्यां–" योगजो द्विविधः युक्तयुंजानभेदतः, युक्तस्य सर्वदाध्यानं चिन्तासहकृतोऽपरः" । योगस्य वर्णनं चरक एवं कृतं "आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात्प्रवर्तते । सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे । निर्वतते तदुभयं वशित्वं चोपजायते । सशरीरस्य योगज्ञास्तं योगमृषयो विदुः । "

आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया ।
दृष्टिः श्रोत्रं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम् ॥
इत्यष्टविधमाख्यातं योगिनां बलमैश्वरम् ।
शुद्धसत्त्वसमाधानात्तत्सर्वमुपजायते ॥ (च. शा. १।१३८-१४१)
श्रूयतां चेदमध्यात्ममात्मज्ञानबलं महत् ।
इन्द्रियाणि च संक्षिप्य मनः संक्षिप्य चञ्चलम् ॥
प्रविश्याध्यात्ममात्मज्ञः स्वे स्थाने पर्यवास्थितः ।
सर्वत्रावहितज्ञानः सर्वभावान् परीक्षते । ( च. शा. ३–२१ )



आप्तानां लक्षणं चैवमुक्तम् " रजस्तमोभ्यां निर्मुक्तास्तपोज्ञानबलेन ये तेषां त्रिकालममलं ज्ञानमव्याहतं सदा । आप्ताः शिष्टा विबुद्धास्ते तेषां वाक्यमसंशयम् । सत्यं, वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमाः (च. सू. ११–१९ ) चक्रपाणिनाऽप्युक्तं " तदत्रातीन्द्रियार्थदर्शिगम्ये नास्मद्विधानां बुद्धयः प्रभवन्ति " ( च. वि. ५–८ ) । एवमतीन्द्रियार्थगम्यायां सम्प्राप्तावपि नास्मद्विधानां बुद्धिः प्रसरतीति प्रतिपादयन्ति । हन्त तर्हि आयुर्वेदे गवेषणा विषय एव नास्ति । विशेषगवेषणं च केवलं योगिभिरेव कर्तव्यं भवति । तर्हीदानीं तादृशयोगिनां रजस्तमोनिर्मुक्तानामभावात् आयुर्वेदविमर्शो नैव कर्तुं शक्यते । तर्हि आयुर्वेदोद्धारो नैव भवेत् । तस्मात् आयुर्वेदसिद्धान्तानां प्रतिपादने योगादन्यः कश्चिन्मार्गं अस्तीति स्वीकर्तव्यम् पूर्वं ऋषिभिर्यद्यपि योगदृष्ट्या दृष्टं स्यात् तथाऽपि तदेव तर्केणाऽपि प्रतिपादयितुं शक्यते । निरुक्तेऽप्येतत्प्रतिपादितम्–" मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति । तेभ्य एतं तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूहमभ्यूहं तस्माद्यदेवं किंचानूचानोऽभ्यूहत्यार्षं तद्भवति ( निरुक्त अ. १३, खं. १२ ) । यदेव किंचिन्मन्त्रार्थेषु अभ्यूहति आर्षं तद्भवति तथैव तदृषयोऽभ्यूहितवन्त इत्याभिप्रायः । पूर्वमपि हि–साक्षात्कृतधर्माणः ऋषयो बभूवुः–इत्युक्तम् (भगवद्दुर्गाचार्यकृतऋज्वर्थाख्या व्याख्या) । एवं तर्कस्य प्राधान्यं दृढबलेनाऽपि प्रतिपादितम् ।

" तस्मात् सत्यपि निर्देशे कुर्यादूह्यं स्वयं धिया ।
विना तर्केण या सिद्धिर्यदृच्छा सिद्धिरेव सा ॥" (च. सि. अ. २–२८)

चरकेणाप्येवमुच्यते–" न हि विस्तरस्य प्रमाणमस्ति, न चाप्यतिसंक्षेपोऽल्पबुद्धीनां सामर्थ्यायोपकल्पते, तस्मादनतिसंक्षेपेणासानतिविस्तरेण चोपदिष्टा । एतावन्तो ह्यल्पबुद्धीनां व्यवहाराय, बुद्धिमतां च स्वालक्षण्यानुमानयुक्तिकुशलानामनुक्तार्थज्ञानायेति " ( च. सू. अ. ४–२० ) तथा च—

शास्त्रं ज्योतिः प्रकाशार्थं दर्शनं बुद्धिरात्मनः ।
ताभ्यां भिषक् सुयुक्ताभ्यां चिकित्सन्नापराध्यति ॥ ( च सू. ९–२४ )

**अतः स्वालक्षण्यानुमानयुक्तिकुशलैर्ग्रन्थस्य विशेषविस्तरः, अनुक्तार्थ- प्रतिपादनं वा कर्तव्यमिति शास्त्रसम्मतिः ।**

ऋषिव्यतिरिक्तानामप्यार्षत्वं भवत्येव । तथा चोक्तं चक्रपाणिना " एतच्चाप्तलक्षणं सहजाप्तब्रह्माद्यभिप्रायेण, लौकिकानां तु पुरुषाणामाप्तत्वं प्रतिविषयसम्यग्ज्ञानसम्भवेन तद्विषयरागद्वेषासम्भवेन च बोद्धव्यम् " ( च. सु. ११–१८ चक्रपाणिव्याख्या ) । " आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा । साक्षात्करणमर्थस्याप्तिः, तया प्रवर्तत इत्याप्तः । ऋष्यार्य-

अयं सम्बन्धः न स्वकपोलकल्पितः । आर्षग्रंथेषु सूत्ररूपतयोक्तस्यैव विस्तरः । चरके ह्युक्तो वातादि-विकारविनिश्चयोपायः—" सर्वेष्वपि खल्वेतेषु वातविकारेषूक्तेष्वन्येषु चानुक्तेषु वायोरिदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं, यदुपलभ्य तदवयवं वा विमुक्तसंदेहा वातविकारमेवाध्यवस्यन्ति कुशलाः—तद्यथा रौक्ष्यं शैत्यं लाघवं वैशद्यं गतिरमूर्तत्वमनवस्थितत्वं चेति वायोरात्मरूपाणि । एवंविधत्वाच्च वायोः कर्मणः स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः ......तद्यथा स्रंसव्यास.......च. सू. २०।१२ ) अत्र च स्रंसव्यासादि-वातलक्षणानि दृष्ट्वा वायुः केनांशेन रौक्ष्येण शैत्येन वेत्यादिना कुपित इति निश्चेतव्य इति सूचयाति । एवं २८ तमोऽध्याये रसप्रदोषजादिविकारान् वर्णयन् दूष्यविनिश्चयं बोधयाति । वमनप्रकरणे च लक्षणैः कथमाभ्यन्तरक्रियाविशेषः दोषावस्थाविशेषश्चानुमातव्य इति दर्शयति—" पीतवन्तं तु खल्वेनं मुहूर्तमनुकांक्षेत, तस्य यदा जानीयात् स्वेदप्रादुर्भावेण दोषं प्रविलयनमापद्यमानं-लोमहर्षेण च स्थानेभ्यः प्रचलितं, कुक्षिसमाध्मापनेन च कुक्षिमनुगतं, हृल्लासास्यस्रवणाभ्यामपि चोर्ध्वमुखीभूतं "– ( च. सू. अ. १५।११ ) एतादृशसूत्राधारेणानुक्तार्थज्ञानं न स्वकपोलकल्पना भवति ।

एवं संहितोक्तवचनान्याधारीकृत रुग्णलक्षणज्ञानपूर्वकं संप्राप्तिविनिश्चय एवास्य प्रन्बधस्य प्रयोजनम् इति सिद्धम् ।

## रोगविनिश्चये निदानादीनामुपयोगित्वम्

वैद्यस्य चिकित्साप्रवृत्ति प्रथमं रोगस्य सम्यग् ज्ञानमावश्यकं भवति ।

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्
ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् ।
यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक् ।
अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया ।
यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः ।
देशकाल-प्रमाणज्ञस्तस्य सिद्धिरसंशयम् । (च-सू-अ-२०।२०)

सर्वरोगविशेषज्ञः सर्वौषधविशारदः
भिषक्सर्वामयान् हन्ति न च मोहं निगच्छति । (च-वि-८।१५)

रोगपरीक्षा च पंचनिदानैः । कर्तव्या
रोगं निदानप्राग्रूपलक्षणोपशयाप्तिभिः । ( वा-सू-१ )



तस्माद् व्याधीन् भिषगनुपहतसत्वबुद्धिर्हेत्वादिभिर्भावैर्यथावदनुबुध्येत ।
( च-नि-१।१३ )

अत्र च निदानादीनां पंचानामपि रोगोपलब्धिकारणत्वेनोक्तम् । अत्र प्रबन्धेतु सम्प्राप्तिलक्षणावेव कुतो विचार्येते ? तयोर्वैशिष्ट्यम् किम् ? इति प्रश्नः उदेति । तत्रोच्यते ।

निदानं हि रोगोत्पादकहेतुः । " इह खलु हेतुर्निमित्तमायतनं कर्ता कारणं प्रत्ययः समुत्थानं निदानमित्यनर्थान्तरम् । तत्त्रिविधम् । असात्म्येन्द्रियार्थः प्रज्ञापराधः परिणामश्चेति । ( च-नि-अ-१।३ )

" कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च । द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः। ( च-सू-अ-१।५४ ) " इत्यसात्म्येन्द्रियार्थसंयोगः । प्रज्ञापराधः परिणामश्चेति " ( च-सू-११।४३ ) तत्र खल्वेषां द्वयानामपि दोषाणां त्रिविधं प्रकोपणं तद्यथा –

" असात्म्येन्द्रियार्थः, प्रज्ञापराधः, परिणामश्चेति " ( च-वि-६।६ )

" धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम् । असात्म्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः । "

एवं चरके प्रायशः सर्वत्र एतत्त्रितयस्यैव हेतुत्वेनोक्तिः ।

अन्यत्र तु दोषाणामपि निदानत्वेनोक्तिः । तेषां सन्निकृष्टनिदानम् इति प्रत्यासन्नं कारणं इति चोच्यते चक्रेण ( च-चि-३।१२ ) वाग्भटोऽप्याह—निदानं वाय्वादिकोपः, तस्य पुनरहिताहारविहारसेवा " ( अ-सं-नि १।८ ) मधुकोषे अप्युक्तम् ।

" चत्वारो व्यभिचारिदूरनिकटप्राधानिकत्वात्पुनस्तेअसात्म्येन्द्रियकार्थयुक्परिणातिप्रज्ञापराधात्त्रिधा । रुग्दोषोभयकारणादपि तथा द्वौ व्यंजकोत्पादकौ । बाह्याभ्यन्तरभेदतोऽपि कथिता हेतोः प्रभेदा अमी । दोषस्य च प्राकृतवैकृताभ्यां भेदो-नुबन्ध्यादपि चानुबन्धात् । तथा प्रकृत्यप्रकृतित्वयोगान्तथाशयाकर्षवशाद्गतेश्च" इत्युक्तम् । अत्र दोषरूपमाभ्यन्तरकारणं । तस्य वृद्धिक्षयविशेषाश्च रोगज्ञाने अवश्यं उपयुक्ता भवन्ति । तैर्विना रोगस्य ज्ञानमेव न स्यात् सम्प्राप्तावपि त एवावश्यका घटकाः । अतोऽत्र प्रबन्धे सम्प्राप्तिग्रहणेनैव तेषामपि ग्रहणं भवति ।

बाह्यकारणत्वेनोक्तानि यान्यसात्म्येन्द्रियार्थादीनि तेषामुपयोगं दृष्ट्वा रोगसम्प्राप्तेरनुमानं दुश्शकम् । यतो हि केवलं निदानसेवनेन न रोगा भवन्ति ।

वेदनाविशेषैः रोगसमुत्थानमनुमातव्यमित्यप्युक्तं चरकेण " वयोभवितसात्म्यव्या
धिसमुत्थानानि कालदेशोपशयवेदनाविशेषेण" (च. वि.४–८) न च निदानाद्-
व्यापारानुमितिः सुकरा। एवं बाह्यनिदानस्य सम्प्राप्तिविनिश्चयादनन्तरमेव प्रयोजनं
विद्यते। तस्मात् तन्नात्र प्रपच्यते।

## पूर्वरूपं

प्रागुत्पत्तिलंक्षणं व्याधेः ( च. नि. १–८ )

स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधकम्। लिंग, कुर्वन्ति यद्दोषाः
पूर्वरूपं तदुच्यते ( चक्रव्याख्या )

प्राग्रूपं येन लक्ष्यते उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः। लिंगमव्यक्त-
मल्पत्वाद्व्याधीनां तद्यथायथम् ( वा. नि. अ. १ )

यदा प्रसृता दोषाः दूष्यस्थानं प्राप्नुवन्ति दोषदूष्यसम्मूर्च्छना च प्रारभ्यते
तदा कानिचनलक्षणानि प्रादुर्भवन्ति। तानि च स्थानिकदोषदूष्याणां विक्षोभे-
णोत्पन्नानि। दोषदूष्यसम्मूर्च्छनायाः सम्पूर्णत्वे एतेषामपगमः व्यक्तरूपेणैवाअनुवृत्तिः,
ततो रूपाणां प्रादुर्भावः। तेषां पूर्वरूपाणां द्वैविध्यं भवति केषुचिद्रोगेषु लिंगाना-
मल्पत्वं भवति। अयमेव प्रथमः प्रकारः। अत एव वातव्याधिषु " अव्यक्तं
लक्षणं तेषां पूर्वरूपमिति स्मृतम्। " इत्युक्तम्। एषां संप्राप्तया साकं सम्बन्धः
कर्तुं शक्येत यदि रोगी अथवा वैद्यस्तान् ज्ञातुं शक्येत। द्वितीयं तु दोषदूष्य-
सम्मूर्च्छनावस्थाजन्यमव्यक्तलिंगादन्यदेव–यथा ज्वरे बालप्रद्वेष–रोमहर्षादिः।
न ह्येतत्पूर्वरूपं ज्वरावस्थानां नियमेन व्यक्तं भवति, किन्तु ज्वरपूर्वकाल एव,
यत्र तु व्यक्तं भवति स चासाध्यो मतः ( चक्रः ) अव्यक्तत्वं लक्षणानामियमेव
यदल्पत्वेनास्फुटत्वम्। यत्तु पूर्वरूपं दोषदूष्यसम्मूर्च्छनावस्थानियतं तद् व्याधिमात्रस्य
गमकं न तद्दोषविशेषं गमयति। एतत्पूर्वरूपाभिप्रायेण च वाग्भटेनाप्युक्तम्
प्राग्रूपं येन लक्ष्यते, उत्पित्सुरामयो दोषविशेषेणाधिष्ठितः (वा. वि. अ. १) इति।

यत्तु अव्यक्तलिंग पूर्वरूपं, तद्दोषविशेषमपि व्याधेर्गमयति।
यदुक्तं हारीते " इति पूर्वरूपमष्टानां ज्वराणां सामान्यतः, विशेषतस्तु जृम्भांग-
मर्दभूयिष्ठं हृदयोद्वेगि वातजम् " इत्यादि। तथा सुश्रुतेप्युक्तं सामान्यतो विशेषात्तु-
जृम्भात्यर्थं समीरणात् पित्तान्नयनयोर्दाहः कफात्वान्नाभिनन्दनम् ( सु. ३अ ३१ )
एतद्धि पूर्वरूपं भाविज्वरलिंगमेवा व्यक्तमल्पत्वेनेति ज्ञेयम्। 'व्यक्ते हि ज्वरे
वातादिजे जृम्भादयः पूर्वरूपापेक्षयाअत्यर्थं भवन्ति ( चक्रः– चरकव्याख्या
नि. अ. १–८ )



ननु दोषविशेषेणानाधिष्ठितः इति न संगतम्। यतो हि कानिचन
दूष्यक्षयवृद्धिलक्षणानि हित्वाअन्याअनि लक्षणानि दोषैर्विना न सम्भवन्ति
सत्यम्, पूर्वरूपाणि हि प्रायः न आगन्तुदोषकृतानि, किन्तु आगन्तुदोषस्य दूष्येण
सह सम्मूर्च्छनाकाले तत्स्थानस्थितानामन्यदोषदूष्याणां संक्षोभात् उत्पन्नानि
आगन्तुदोषोऽपि तत्र कानिचल्लक्षणानि करोति यथा जृम्भादयः। किन्तु तस्य
दोषस्य तदानीं सम्पूर्णप्राबल्याभावात् अव्यक्ता एव जृम्भादयो भवन्ति। तदानीं
अन्येषामपि रोगोत्पादे आकारणभूतानामपि स्थानिकदोषाणां सत्वात् निश्चिततया
रोगोत्पादकदोषानुभावं दुःशकमित्यतः दोषविशेषेणानधिष्ठितः इत्युक्तम्।

पूर्वरूपस्य च दोषदूष्यविनिश्चये रोगाविनिश्चये चिकित्सायां
चात्यल्पमेव साहाय्यं भवति। प्रायशः आशुकारिषु रोगेषु पूर्वरूपमल्पतया
स्मरन्ति यतस्तत्र पूर्वरूपदर्शनादभ्यर्हितत्वेन प्रधानलक्षणसम्भवो दृष्टः, यथा ज्वरे
रक्तपित्ते वा प्रायशः शास्त्रे अव्यक्तलक्षणमेव पूर्वरूपं यत्र भवति तत्र विशिष्टपूर्व-
रूपो नोच्यते। तादृशाव्यक्तलक्षणानि अव्यक्तत्वादेव नोपलभ्यन्ते रुग्णेन।
यद्युपलभ्यन्ते तर्हि वैद्यसकाशमागच्छति। तदा च तस्य व्यक्तत्वाल्लक्षणत्वेन ज्ञानं
भवति। यथा हि वातव्याधिषु संकोचादीनामल्पव्यक्तत्वेन वातव्याधिरनुमीयते।
तादृशं पूर्वरूपमस्मिन् प्रबन्धे लक्षणशब्देनैव गृहीतं भवति।

ज्वरे बालप्रद्वेषः, राजयक्ष्माणि अदोषेष्वपि अन्नपानादिषु दोषदर्शनमित्या-
दिपूर्वरूपाणां च यद्यपि रोगविनिश्चये उपयुक्तत्वमस्ति तथाऽपि तेषां दोषैः साकं
सम्बन्धः सुकरः। अथवा दोषदूष्यसम्मूर्च्छनावस्थायां यदा मानसा दोषाः विक्षो-
भितास्तदैतानि लक्षणानि कुर्वन्तीति व्यक्तव्यम्। एवं प्रमेह प्रमेहपूर्वरूपानन्तरं
यदि रक्तमूत्रता तर्हि प्रमेहः अन्यथा रक्तपित्तमिति निश्चयः क्रियते।

## उपशयः

गूढलिंगव्याधिविनिश्चये उपशयानुपशयनामुपयोगः। तेषामत्यल्पतया शास्त्रे
उपदेशः। यत्र च उपशयेन दोषदूष्यविनिश्चयः कर्तुं शक्यते तत्र तस्य लक्षणत्वेनैव
ग्रहणम् यथा संतमकश्वासे शीतेनोपशमात् पित्तसंबंधः अनुमीयते। तमकश्वासे
उष्णं चैवाभिनन्दति, " मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्चाभिवर्धते " इत्यनेन
वातकफवृद्धिरनुमीयते। उपशयस्यापि लिंगपदेनैव निर्देशः कृतः चरकेण
वातज्वरे यथा " निदानोक्तानुपशयो विपरीतोपशयश्चेति वातज्वरलिंगानि
भवन्ति। " ( च. नि. अ. १ ).

## लक्षणम्

प्रादुर्भूतलक्षणं पुनर्लिंगं ( च. नि. १-९ ) इत्यापाततः लक्षणालिंगयोर्भेद-दर्शनेऽपि तस्य पर्याया उक्ताः यथा " तत्र लिंगमाकृतिर्लक्षणं चिन्हं संस्थानं व्यंजनं रूपमित्यनर्थान्तरम् " ( च. नि. १-९ ) " उत्पन्नव्याधिबोधकमेव लिंगं रूपम् " इति रूपस्यार्थो वर्णितः बहुवादविवादोपदर्शनानन्तरं विजयरक्षितेन वादविवादविस्तरस्त्वत्र नोद्ध्रियते विस्तरभयात् । रोगस्यव्यक्तावस्थां यत् ज्ञापयति तद्व्याधिलिंगमिति प्रधानतया शास्त्रे व्यवहारः ।

यथार्थतस्तु येन लक्ष्यते तल्लक्षणम् येन लिंग्यते तल्लिंगम् । यदा पर्वत धूमेनाग्निरनुमीयते तदा धूमोऽपि लिंगम् । व्यक्तेः पूर्वं स्थानसंश्रयकाले यल्लिंगं तत् प्राग् इति विशेषणविशिष्टं भवति । दोषाणां संचयप्रकोपप्रसरावस्थासु स्तब्धपूर्णकोष्ठतादीनि यान्युक्तानि सुश्रुतेन तेषां किं नाम ? लक्षणमित्येव । तत्तु दोषलक्षणं यतस्तैर्लक्ष्यते दोषसंचयादिः । आरोग्यमपि येन ज्ञायते तदपि लक्षणमेव । तथा चोक्तं चरकेण कार्यं धातुसाम्यं तस्य लक्षणं विकारोपशमः, परीक्षात्वस्य रुगुपशमनं, स्वरवर्णयोगः शरीरोपचयः, बलवृद्धिः, अभ्यवहार्याभिलाषः रुचिराहारकाले, अभ्यवहृतस्य चाहारस्य काले सम्यग्जरणम्, निद्रालाभो यथाकालं, वैकारिकाणां च स्वप्नानामदर्शनं सुखेन च प्रतिबोधनं, वातमूत्ररेतसां मुक्तिः सर्वाकारैर्मनोबुद्धीन्द्रियाणां चाव्यापत्तिरिति ( च. वि. ८।७६ ) एतानि सर्वाण्यपि लक्षणान्येव दोषधातुमलानां सम्यग्ज्ञापकत्वात् । दोषप्रकृतीनां च यत् स्निग्धांग त्वादिकमुक्तं तदपि लक्षणमेव, " तस्माच्छ्लेष्मलाः प्रकृत्या केचित् पित्तलाः, केचित् वातलाः केचित् संसृष्टाः केचित् समधातवः केचिद्भवन्ति तेषां हि लक्षणानि व्याख्यास्यामः ( च. वि. ८।९५ ) प्रसवकालज्ञानार्थमपि लिंगान्येवोक्तानि " तस्यास्तु खलु लिंगानि प्रसवकालमभितो भवन्ति (च. शा.८।३६) । अरिष्टानामपि लिंगमित्येव व्यवहारः " पुष्पं यथा पूर्वरूपं फलस्येह भविष्यतः तथा लिंगमरिष्टाख्यं पूर्वरूपं मरिष्यतः ( च. इ. अ. २।१ ) अरिष्टानां संभवः एवमुक्तः

क्रियापथमतिक्रांताः केवलं देहमाश्रिताः ।
चिह्नं कुर्वन्ति यद्दोषास्तदरिष्टं निरुच्यते ॥

आत्मनोऽपि लिंगान्युक्तानि—

प्राणापानौ निमेषाद्या......
बुद्धिस्मृतिरहंकारो लिंगानि परमात्मनः ।
यस्मात् समुपलभ्यन्ते लिगान्येतानि जीवतः ।
न मृतस्यात्मलिंगानि तस्मादाहुर्मनीषिणः (च. शा. १।७०।७३)



चिकित्साशास्त्रे तु दोषधातुमलानां स्थितिबोधकमेव लिंगम् । स्थितिश्चात्र प्राकृती विकृती वा भवेत् । विकृतिश्च वैषम्यमुच्यते । " वैषम्यगमनं हि पुनर्धातूनां वृद्धिह्रासगमनकार्त्स्न्येनैव ( च. शा. अ. ६।४ ) एषां वैषम्यप्रारम्भे सम्प्राप्ति प्रारभ्यते । रोगव्यक्तोभावे सम्प्राप्त्याः सम्पूर्णता भवति । रोगावस्थापरिवर्तनेऽस्याः किंचित्परिवर्तनं भवति । रोगापगमः सम्प्राप्त्यपगमसमकालीनः । सम्प्राप्तिप्रारम्भात् सम्प्राप्त्यपगमपर्यन्तं यानि कानिचन लक्षणानि व्यक्तान्यव्यक्तानिवोत्पद्यन्ते यैरनुमीयते दोषधातुमलानां वैषम्यम् । अतोऽत्र प्रबन्धे सम्प्राप्तिबोधकं लिंगमित्यपि वक्तुं शक्यते ।

अतश्च लक्षणानां प्राधान्यं स्पष्टमेव । यतो हि तैर्विना दोषधातुवैषम्यविनिश्चयोऽसाध्य एव । नान्य उपायोऽस्ति आभ्यन्तर विकृति विज्ञानार्थम् ।

प्रथमं रुग्णसकाशं गतेन वैद्येन द्विविधया त्रिविधया वा परिक्षया किं परीक्ष्यते ? लक्षणान्येव । यान्यपि रुग्णे विकृतिलक्षणानि दृश्यन्ते, अथवा प्रकृतिलक्षणाभावः अनुभूयते तानि सर्वाण्यपि लक्षणानीत्येव गृह्यते । ततस्तैराभ्यन्तर विकृतिर्निश्चीयते । कानिचन प्रकृतिनिर्णायकानि भवेयुः यथा स्फुटितकरचरणादयः कानिचनाजन्मप्रभृतिविद्यमानाः वैगुण्यास्युर्यथा कुब्जत्वादयः । तादृग्लक्षणानि परिहृत्यान्यानि विकारबोधकानीति निश्चीयते । एवमायुर्वेदशास्त्रे सहस्राधिकपारिमितानि लक्षणानि वर्णितानि सन्ति । अन्यान्यपि बहूनि सन्तीदानीं दृश्यमानान्याचार्यैर्न वर्णितानि यथा फुफ्फुसे स्निग्धकर्कशध्वानिविशेषाः । आतुरे विद्यमानानि शब्दस्पर्शरूपरसगन्धवेदनाविशेषाणि प्रत्यक्षादिप्रमाणैः सुसूक्ष्माण्यप्यवबुध्य तदुत्पत्तिप्रकारं तद्बोधिताभ्यन्तरविकृतिविशेषं च । यः सम्यग् जानाति स वै भिषग् प्राणाभिसरः । प्रत्यक्षादिगृहीतलक्षणानां साहाय्येनैव खलु आतुरस्यान्तर्द्रष्टुं शक्यते वैद्येन । " ज्ञानबुद्धिप्रदीपेन यो ना विशाति तत्ववित् । आतुरस्यान्तरात्मानं न स रोगांश्चिकित्सति ( च. वि. ४।१२ )

ग्रन्थेष्वनुक्तानि रोगाणि बहूनि स्युः कालवशेनाभिव्यज्यमानानि । तेषां लिंगैर्दोषान् निश्चित्य चिकित्सा कार्येति सुश्रुतेनोच्यते ।

नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः ।
अनुक्तमपि दोषाणां लिंगैर्व्याधिमुपाचरेत् ( सु. सू. अ. ३५।१६ )

तत्रैव दोषादीनां समत्वं विषमत्वं वा लिंगैरेव ज्ञेय इत्युच्यते " एषां समत्वं यच्चाऽपि भिषग्भिरवधार्यते ।

न तत् स्वास्थ्यादृते शक्यं वक्तुमन्येन हेतुना ।
दोषादीनामसमतामनुमानेन लक्षयेत्

अप्रसन्नेन्द्रियं वीक्ष्य पुरुषंकुशलो भिषक् ॥

( सु. सू. अ. १५।३८ )

एवं प्रत्यक्षादिप्रमाणगृहीतलक्षणैः सम्प्राप्तिं निश्चित्य क्रियमाणा चिकित्सा सफला भवतीति निष्कर्षः।

## सम्प्राप्तेः प्राधान्यम्

**रोगज्ञानोपायेषु पंचसु मध्ये सम्प्राप्तिः सर्वप्रधानम्।** तस्याः सम्यग्ज्ञाने संजाते रोगज्ञानं सम्पूर्णं भवति। सम्प्राप्त्यपनयेन रोगोपशमः। तथा चेन्दुः "**सर्वस्यामपि चिकित्सायां सम्प्राप्तिविनाशनमेव प्रधानं प्रयोजनम्**" इन्दुः ( अ. सं. नि. २।४ ) रोगनामज्ञानं न प्रधानम्। **रोगस्य सम्प्राप्तिज्ञानमेव चिकित्सोपयोगि भवति।** "विकाराः पुनरपरिसंख्येयाः प्रकृत्यधिष्ठानलिंगायतनवेदनाविकल्पानामपरिसंख्येयत्वात्" ( च. सू. अ. २०।३ )।

"अत्र प्रकृतिर्वातादिः, अधिष्ठानं दूष्यं लिंगानिलक्षणानि, आयतनानि बाह्यहेतवो दूष्याहाराचाराः एषां विकल्परूपो विशेषो विकल्पविशेषः तेषामपरिसंख्येयत्वादिति। अत्र दोषाः संसर्गांशांशविकल्पादिभिरसंख्येयाः, दुष्यास्तु शरीरावयवाः अणुशः परस्परमेलकेन विभज्यमाना असंख्येयाः लिंगानि कृत्स्नविकारगतान्यसंख्येयान्येव। आविष्कृतानि तु तन्त्रे कथितानि, हेतवश्चावान्तरविशेषादसंख्येया एव" चक्रव्याख्या। हेतुज्ञानं पूर्वमेवप्रतिपादितं। लक्षणानामपि आभ्यन्तरविकृतिज्ञापकत्वेनैव प्राधान्यमुक्तम्। अवशिष्टौ प्रकृत्याधिष्ठाने, तयोर्विकल्पविशेषा एव सम्प्राप्तिः। संख्याविकल्पप्राधान्यबलकालाविशेषाश्चात्रैव विकारप्रकृत्यधिष्ठानयोरन्तर्भवन्ति।

"यथा दुष्टेन दोषेण यथा चानुविसर्पता" इत्येतत् विकारप्रकृतिरेव। आमयस्य निर्वृत्तिस्तु विभिन्नाधिष्ठानसंश्रयेणैव भवति। उभयं मेलयित्वैव सम्प्राप्तिलक्षणमुक्तं वाग्भटेन। अत एवोक्तं चरकेण "तस्माद्विकारप्रकृतीरधिष्ठानान्तराणि च।

समुत्थानविशेषांश्च बुध्वा कर्म समाचरेत् इत्युक्तम् (च. सू. १८-४६)। अत्राऽपि चिकित्सारम्भात्पूर्वमवश्यं सम्प्राप्तिज्ञानमित्युक्तम्। **सम्प्राप्तिविशेषात् रोगविशेषा भवन्ति।** "प्रकुपितास्तु खलु ते प्रकोपणविशेषाद्दूष्यविशेषाच्च विकारविशेषानभिनिर्वर्तयन्त्यपरिसंख्येयान् ( च. वि. ६-७ ) अत्र प्रकोपणविशेषाद्दोषाणामंशांशविकल्पो भवति। तदत्रैवाग्रे विस्तरेणोपदर्श्यते। सम्प्राप्तेः प्राधान्यं प्रतिपादन अष्टांगसंग्रहव्याख्यायामेवं वदतीन्दुः अथ कदाचित् निदानादीनि १. साधारणत्वात् २. व्यामोहात्, ३. अन्यतोऽपि वा निमित्तात्



आतंकस्य स्वरूपमसमर्थानि प्रदर्शयितुम्, ततः सम्प्राप्त्या व्याधिविशेषं भिषगव गच्छेत्। अथ का पुनरियं सम्प्राप्तिर्नेव भवतीति ? या हि जनानां पद्धतिरिव गदानां निदानादिभिरधिगतानामपि सर्वेण प्रकारेण स्वरूपानिःशेषानिराकांक्षतामावहति। इयमुच्यते एवं दुष्टौ दोष इत्यादिना ( अ. सं. नि. १-१७, इन्दुव्याख्या ).

ननु सम्प्राप्तिः केवलं व्यापाररूपा। तथा चोक्तं विजयरक्षितेन "**दोषेतिकर्तव्यतोपलक्षितं व्याधिजन्म सम्प्राप्तिः।** चक्रपाणिरप्याह व्याधिजनक **दोषव्यापारविशेषयुक्तं व्याधिजन्मेह सम्प्राप्तिशब्देन वाच्यम्**, अथ एव पर्याय आगतिरित्युक्तम्, आगतिर्हि उत्पादकारणस्य व्याधिजननपर्यंत गमनं ( च. नि. अ. १-११, चक्रपाणिः ) गंगाधरोऽपि वदति "सा सत्तानुकूला क्रिया सम्प्राप्तिः संख्यादिभिः पंचभिर्भिद्यते, एवं दुष्टौ स्वभावाद् यस्मिन् व्याधौ यावतो दुष्टिस्तावतो संख्या तस्य व्याधेः सर्वशः इति सत्तानुकूला संख्या व्यापारविशेषः। प्रकारश्च व्यापारभेदः निदानस्वभावेन यादृशस्वभावो दोषो भवति स तस्य प्रकारः। यावतांशेन यस्यदोषस्य चयप्रकोपां तत्कल्पना च व्यापारभेदः बलकाल दोषाणां व्यापारभेदः। इत्येते दोषाणां दुष्यसंयोगे स्वस्वक्रियैव व्यापारास्तानाह—सा संख्या प्राधान्यविधिविकल्पबलकालविशेषैर्भिद्यते इति ( च. नि. १-१ गंगाधरः ) सत्तां च गंगाधरः विवृणोति "उत्पन्नानांभावानां समवायिकारणसमवायो यावन्तं कालं वर्तते तावन्तं कालं तेषांमुत्पत्तेरनु पश्चाद्वर्तिरित्यनुवृत्तिहेतुः समवायः सत्तोच्यते। तस्याश्च सत्ताया अनुकूलव्यापारः प्रकृतिभूतद्रव्याणां स्वस्वक्रियाभिः परस्परं पुनः पुनः संयोगविभागौ जनयित्वा निष्पाद्यते तत्तत्कार्याणां स्वरूपनिष्पत्तौ सर्वावयव समवाय इति (च. नि. १-११ गंगाधरः )

एवं सम्प्राप्तेर्व्यापाररूपत्वात् दोषदूष्यज्ञानमेव सम्प्राप्तिज्ञानमिति यदुक्तं तदुयुक्तम् इति चेदत्रोच्यते –

व्यापारवतः ज्ञानमेव व्यापारज्ञानम्। व्यापारो हि कर्म, तच्च तद्वति समवायसम्बन्धेन वर्तते। अतस्तयोः पार्थक्यं न भवति। वैशम्यमनापन्ना दोषाधातवो वा व्याधिकारणका न भवन्ति। दोषाणां वैषम्यगमनमेव व्यापारः प्रथमः रोगोत्पत्तौ। दोषः केन गुणेन वृद्धः रूक्षेण शीतेन वेत्यादि ज्ञानं सम्प्राप्तिज्ञानम् (यथा दुष्टेण दोषेण)। तस्य प्रकुपितस्य प्रसृतस्य च अन्येनानु बन्ध्यादिज्ञानं ( यथा चानुविसर्पता ) तथा तस्य बलकालादिज्ञानं कस्मिन् दूष्ये स्रोतसिच स्थानसंश्रयश्चेत्यादि ज्ञानं चाऽपि

...२

( निर्वृत्तिरामयस्य ) सम्प्राप्तिज्ञानमेव । अतः दोषदूष्याणां स्रोतसां ( मार्गाणां )
ज्ञानं विना सम्प्राप्तिज्ञानमेव नास्ति । अत एव सम्प्राप्तिज्ञाने सम्पूर्णे रोगज्ञान-
मपि सम्पूर्णं भवति । अन्येषां चतुर्णां रोगोपलब्ध्युपायानां निदानपूर्वरूपोप-
शयानां सम्प्राप्तिज्ञानोत्पादनद्वारैव रोगज्ञानोपयोगिता । अत एवोक्तमिन्दुना
" एषा सम्प्राप्ती रोगविशेषाधिगमे हेतुः यस्माद्यदेवं ज्ञायते यथा अनेन निदान-
विशेषेण यो दोषः प्रकुपितः स च कारणवशात् अस्मिन् देहे स्वत एवं व्यापारोऽ
नेनानुगतश्च वर्तत एवं विधश्चास्य रोगविशेषस्य सम्प्राप्तिविशेषः प्रदर्शितस्तदाऽ
वश्यमेवाऽधिगम्यते अयं रोग उत्पन्न इति । एतानि निदानादीनि पंच परस्पर-
समन्वितानि व्याधिविशेषाधिगमने निराकांक्षतामनुबध्नन्ति ( अ. सं. नि. –
१।१७ – इन्दुव्याख्या )

न केवलं रोगविनिश्चयेऽस्याउपयोगः चिकित्सानिश्चयेऽपि सम्प्राप्ति
ज्ञानस्यावश्यकता वर्तते। दोषदूष्याणां ज्ञानं तेषामंशांशविकल्पनां च विना सम्यक्
चिकित्साविनिश्चय अशक्यः । एतदर्थेचन्दुः "सम्प्राप्तिरपि कीर्तनं व्याधिपरिज्ञनाय
चिकित्साकालेऽपि तथाविधसम्प्राप्त्यन्यथाकरणेन तत्सम्प्राप्तिकस्य रोगस्य विनाशो
भवतीति प्रतिबोधनाय च । तथा च विपुलमतिर्वैद्यो अपचारस्वरूपविशेषात्
तत्कार्यविशेषाद्दोषकार्यविशेषेभ्यश्च दोषाणां सम्प्राप्तौ ज्ञातायां गूढलिंगस्याऽपि
व्याधेः स्वरूपमधिगच्छत्येव । तथा प्रतिरोगप्रदर्शितायाः सम्प्राप्तेः स्वाध्यायोक्तात्
चिकित्सितात् प्रकारान्तरेणाऽपि यतो विनाशः कर्तुं वार्यते ततोऽवश्यमेव रोगोपशमः
( अ. सं. नि. २।४ – इन्दुः )

सम्प्रतिरियं संख्याप्राधान्यविधिविकल्पबलकालविशेषैर्भिद्यते ।

संख्या तावद्यथा–अष्टौ ज्वराः, पंच गुल्माः, सप्तकुष्ठान्येवमादिः । यद्यपि
प्राधान्यादिभेदभिन्नेऽपि व्याधौ । संख्याभेदोऽस्त्येव, तथापीह यैव शास्त्रसिद्धा
अष्टोदरीयादिप्रतिपादिता संख्या सैव संख्याशब्देन प्राप्ता ।
( चक्रपाणि–च. नि. १–११ )

" प्राधान्यं पुनर्दोषाणां तरतमाभ्यामुपलभ्यते । तत्र द्वयोस्तरः त्रिषु
तम इति " ( च. नि. १–११ ) " स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमा-
दिशेत् " ( वा. नि. १ )

" विधिर्नाम–द्विविधा व्याधयो निजागन्तुभेदेन, त्रिविधास्त्रिदोषभेदेन
चतुर्विधाः साध्यसाध्यमृदुदारुणभेदेन " ( च. नि. १, ११–४ ) यद्यपि च
संख्या प्राधान्यादिकृतोऽपि व्याधेर्विधिभेदो भवत्येव । तथाऽपि संख्यादिभेदानां
स्वसंज्ञैव गृहीतत्वाद्गोबलीवर्दन्यायात् संख्याद्यगृहीते व्याधिप्रकारेऽयं विधिशब्दो



वर्तनीयः( चक्रः ) । वाग्भटेन तु विधिरयं संख्यायामेवान्तर्भावितः । न तु
पृथगुक्तः तयोरभेदाविवक्षया । माधवकरेणाप्येवमेवोक्तम् । तत्र च विजयरक्षितेनैवं
शंकासमाधाने कृते 'ननु सम्प्राप्तिभेदे चरकेण संख्यादिवद्विधिरप्युक्तः–यथा
द्विविधा व्याधयो निजागन्तुभेदेन । त्रिविधं रक्तपित्तमित्यादि । तत्कुतोऽत्र
विधिर्नोक्तः ? उच्यते–संख्याग्रहणेन विधेरवरोधः, तस्याव्यभिचरितसंख्यायोगित्वात्
विधिसंख्ययोश्चायं भेदः–विधिर्हिप्रकारः, स चाभिन्नेषुजातीयानामेव कस्यचिद्-
धर्मान्तरस्यान्वयाद्भवति । यथा–रक्तपित्तत्वाविशेषेऽप्यूर्ध्वगादिप्रकारो भवति,
संख्या तु भिन्नत्वमात्रे ऽपि, यथा–चत्वारो घटाः, अष्टौ ज्वरा इति । अत्रैव
विधिर्हिप्रकारः, स च भिन्नेषु न युक्तः अतः संख्यादिभिन्नेषु व्याधिषु कारण-
धर्मानुगतः प्रकारो युज्यते । तथा च न्यायविदो ब्रुवते–समानेन धर्मेण परिग्रहो
भेदानां यत्र क्रियते स विधिः । संख्या तु भेदमात्रं इति । वैय्याकरणा अपि
वाचक्षते–अन्वयवान् प्रकारः, निरन्वयो भेदः इति वाप्यचन्द्रो लिखितवान् "
( मा. नि. १–१२ मधुकोष टीका )

समवेतानां पुनर्दोषाणां अंशांशबलविकल्पो विकल्पोऽस्मिन्नर्थे ( च. न.
१।११ ) अयं च प्रतिव्यक्ति भिन्नो भवेत् । एक एव रोगः भिन्नासु व्यक्तिषु
भिन्नविकल्पवान् भवेत् । अत एव लक्षणेषु भेदो भवति । अस्य च चिकित्सो-
पयोगित्वमेवं वर्णितं इन्दुकरेण "तदेवैकं द्रव्यं तमेव चैकं स्वकार्यभूतमन्यतमं दोषं
प्रकृत्यादीनां नानाविधविशेषापेक्षया कदाचित् लाघवेन कोपयति, कदाचित्
रौक्ष्येण कोपयति, कदाचित् काठिन्येन कोपयति, कदाचिदजीर्णेन
कदाचिद्दोषान्तरप्रकोपेण, कदाचिच्छैत्येन, कदाचिदन्येन वा गुणविशेषेणेति ।
तथाकिंचिद्द्रव्यमूर्ध्वभागिकं भवति, तदन्यथा दोषं कोपयति, किंचिद-
धोभागिकं तदन्यथा, अन्यदुभयभागिकं तद्रूपान्तरेण । एतस्माच्च कार्य-
विशेषादेवं दुष्टो दोष इति ज्ञायते । न हि मरिचस्य रौक्ष्येण यो दुष्टो
वायुर्यश्च तस्यैव लाघवेन तावेकरूपौ भवितुमर्हतः । रौक्ष्येण हि कुपितो
रौक्ष्मेवात्मगुणमुपबृंहयंस्तदनुगुणान्येव काठिन्योपशोषणादीनि कुरुते । लाघवेन च
कुपितः पवनो रूपमनुवर्धयत् लाघवादीन्येव प्रदर्शति । एवं सर्वमप्यूह्यमम् । तथा
चेदमेव तावद् दृश्यताम् । इह हि प्रभंजनप्रकोपकारणं तिक्तकटुकषायरूक्षलघु-
शीतविष्टम्भि विरूढकतृणधान्यादि बहुविधं निर्दिष्टम् । यत्र यस्तिक्तरसेन द्रव्येण
कोपः स एव किं कटुकेनान्येन वा विरूढकाविना भवति ? द्रव्याणामनेककारणा-
त्मकत्वात् । तथा योऽपि पटोलात् स एव न त्रायन्तीवालकादिप्रत्ययतामुपयाति ।
न चैवमेकं द्रव्यमेकस्यैव दोषस्यायतनं भवति । यतस्तद् द्रव्यमनुचितेन मात्रा-
दिविशेषेण प्रयुक्तं सद्यथोक्तेन गुणेन किंचित् कोपयति तथा गुणान्तरेण सदृशेन
विलक्षणेन वा, प्रभावादिभिर्वा । तमेव दोषान्तरमेव वा कोपयितुं किं बन्धुवर्गेण

कारितशपथम् ? तेनैकस्मिन्नपि दोषे कुपिते व्याधिकारिणि चान्यो दोषो हेत्वाद्य-
वेधं कदाचिन्मात्रया तस्य व्याधेः समुत्थानतामप्राप्तोऽपि विकारविशेषमापन्नो
भवत्येव । तथा च तन्त्रेषु दृश्यते । ज्वरचिकित्सिते तावत्—

कषायपानपथ्यान्नैर्दशाह इति लंघिते ।
सर्पिर्दद्यात्कफे मन्दे वातापित्तोत्तरे ज्वरे ॥
पक्वेषु दोषेष्वमृतं तद्विषोपममन्यथा ।
दशाहे स्यादतीतेऽपि ज्वरोपद्रववृद्धिकृत् ॥

लंघनादिक्रमं तत्र कुर्यादाकफसंक्षयात् । ( अ. सं. चि. १ )
देहधात्वबलत्वाच्च ज्वरो जीर्णोऽनुवर्तते ।
रूक्षं हि तेजो ज्वरकृत् तेजसा रूक्षि तस्य च ॥
वमनस्वेदकालाम्बुकषायलघुभोजनैः ॥
यःस्यादतिबलो धातुः सहचारी सदागतिः ॥ ( अ. सं. चि. अ. २ )

इत्यादि । इदमेव तावद्विचार्यतां किं त्रिदोषजमेव ज्वरमधिकृत्यैतदुच्यते ?
आहोस्वित्सामान्येन ? यदि त्रिदोषजाधिकारेणत्युच्यते तन्न । आप्रकरणमविशेष-
पाठाद्यथोक्तासम्भवाच्च ।

अथवा सामान्येन ? तैत्रकदोषाभिगतरोगपक्षे कथं यथोक्त सम्भवः ?
यतो ज्वरकारणे कफे वमनादिभिः क्षीणे तत्कार्यंच ज्वरोऽपि कथं न क्षीयते ?
अनपचितोऽपि वा किमिति स्वकारणदोषविपरीतदोषान्तरकारणतामेकदैवासाद-
यति ? उक्तं चैतत्

प्रयोगः शमयेद्व्याधिं योऽन्यमन्तमुदीरयेत् ।
नासौ विशुद्धः शुद्धस्तु शमयेद्यो न कोपयेत् ॥ (च. नि. ८ । २३)

तस्मान्नाऽपि क्रियापादहानौ व्यामूढकचिकित्सकविषये चैतदुच्यते
अनवस्थाप्रसंगात् । एवमेकदोषजेष्वपि रोगेषु दोषान्तरे सम्प्राप्त्यभिमुखं
भवत्येव , तत्कालादिकं सहायमासाद्य नानाविधविकारकरणाय विजृम्भत इति ।
न चानेकमपि द्रव्यमेकेनैवरूपेणैकस्य दोषस्य कारणं भवति, तस्मादनेन प्रकारेण
दुष्टो दोष इति ज्ञायते, कथमनेन दुष्टेनाऽपि सत्ता व्याधिरारभ्यते
इति विकल्प्यते " ( अ – सं – नि १–१७ इन्दुकृतशशिलेखा व्याख्या )

एवं दोषांशांशविकल्पस्य चिकित्सिते प्रयोजनवत्वं चरके कुष्ठनिदान एवं
प्रतिपादितम् - "अस्ति खलु समानप्रकृतीनामपि कुष्ठानां दोषांशांशविकल्पस्थान
विभागेन वेदनावर्णसंस्थानप्रभावनामाचिकित्सिताविशेषः। स सप्तविधोऽष्टादशविधो



ऽपरिसंख्येयविधो वा भवति । ' दोषाहि विकल्पनैर्विकल्प्यमाना विकल्पयन्ति
विकारान् अन्यत्रासाध्यभावात् (च- नि- ५।४ )अनेन ज्ञायते यत् दोषाणामंशां
शविकल्पेन वेदनावर्णसंस्थानादीनां विशेषो भवतीति । अत्र वेदनावर्णसंस्थाना-
दिभिः दोषांशांशविकल्पा अनुमातुं शक्यन्ते इत्युक्तं भवति । एवं कुष्ठनिदाने
यद्यपि सप्तविधत्वमुक्तं, कुष्ठस्य चिकित्सास्थानेऽष्टादशविधत्वं, तथा सुश्रुते
चरकानुक्तानां रकसादीनां कुष्ठानां वर्णनं चोपलभ्यते । यदि प्रत्यक्षेऽपि
यथोक्तलक्षणैः किंचित् भिन्नलक्षणकानि कुष्ठानि लभ्यन्ते तत्र वेदनादिविशेषैः
दोषांशांशविकल्पानुमानं चिकित्सानिर्णये सहायकं भवति । एवंमेवेतरेष्वपि रोगेषु।

सुश्रुतेप्युक्तम्–

सर्वैर्भावैस्त्रिभिर्वाऽपि द्वाभ्यामेकेनवा पुनः ।
संसर्गे कुपितः क्रुद्धं दोषं दोषोऽनुधावति ॥ ( सु. सू. २१।४३ )

इदानीं संसर्गे सान्निपाते च प्रसराभिहिते अंशांशबलाविकल्पेनानुबन्धानु-
बन्धिभावं चिकित्सार्थं दर्शयन्नाह सर्वैर्भावैरित्यादि... ...
भावैः कोऽर्थः ? रूक्षोष्णास्निग्धादिभिः... ... ... .. ...

एतेन त्रयादिस्वभावकुपितोऽप्रधानोऽनुबन्धभूतः, प्रधानं दोषमग्रेअनुलग्नो
भवतीत्युक्तं ......एतेन सर्वभावक्रुद्धः प्रधानभूतो व्यक्तालिंगो अनुबन्ध्यदोष
उक्तः ...... अत्राप्यवमुक्तं भवति - यदा - किल दोषद्वयसंसर्गी भवति
तदा प्रधानस्यानुबन्ध्यभूतस्य दोषस्य चिकित्सा कर्तव्या यदा तु सर्वैर्भावैः
समकुप्यन्ति तदा सर्वे प्रधानभूताः परस्परमनुबन्धभूताश्च भवन्ति, एवंच सम-
कुप्यन्ति तदा सर्वे प्रधानभूताः परस्परमनुबन्धभूताश्च भवन्ति, एवंच सम-

एवमुत्पादकारणस्य व्याधिजननपर्यन्तं गमनं संप्राप्तिः, साच संख्या-विकल्पप्राधान्यबलकालविशेषरूपा व्याधिमोक्षपर्यन्तमप्यनुवर्तते । तस्यां ज्ञातयां व्याधिज्ञानं सम्पूर्णम् , तस्या अपनयनार्थमेव चिकित्सा क्रियते । सम्प्राप्त्यपगमेन-व्याध्युपशमः । अतः सम्प्राप्तिः सर्वथा ज्ञातव्या ॥

## सम्प्राप्तिघटकभावविशेषाः

अत्रेयं जिज्ञासा यत् स यदा प्रकुपितः ... ...
इत्याद्युक्ता सम्प्राप्तिः संख्यादिषु कुत्र प्रविशति ? तथा हि ज्वरसम्प्राप्तिरुक्ता –

स यदा प्रकुपित : प्रविश्यामाशयमूष्मणा सह मिश्रीभूयाद्यमाहारपरिणामधातुं रसनामानमन्ववेत्य रसस्वेदवहानि स्रोतांसि पिधायाग्निमुपहत्य पक्तिस्थानादूष्माणं बहिर्निरस्य केवलं शरीरमनुप्रपद्यते, तदा ज्वरमभिनिर्वर्तयति (च – नि – १।२०)

इदं हि सम्प्राप्तिः न संख्यारूपा अष्टस्वपिज्वरेषु समानत्वात् । न च विकल्पः अंशांशकल्पना हि प्रतिरोगं पृथक् कर्तव्या । प्राधान्याप्राधान्यं चात्र नोक्तम् । बलाबलं च वैद्येनैव प्रतिरोगं निश्चेतव्यम् । कालविशेषश्च लिंगेष्वेवोक्तं न तु सम्प्राप्तौ । एवं संख्यादिभिन्नेयं सम्प्राप्तिः कुत्रान्तर्भवति ? अत्रोच्यते ।

सम्प्राप्तिर्हि द्विविधा सामान्या विशिष्टा च । रोगस्यावान्तरभेदेषु सर्वेष्वपि या समाना सामान्या सम्प्राप्तिः । अष्टविधानामपि ज्वराणां सामान्यसम्प्राप्त्येकत्वादेव ज्वरः एको रोगः इत्युच्यते । अतः सामान्यलक्षणान्येकविधान्येव सर्व-ज्वरेषु । सामान्यं हि एकत्वकरं भवति । प्रविश्यामाशय ... इत्यादि ज्वरसामान्यसम्प्राप्तिः ।

संख्यादिभिरुच्यमाना विशेषा सम्प्राप्तिः। सम्प्राविशेषश्च क्वचित् आगन्तु-दोषविशेषाद्भवति । यथा वातज्वरपित्तज्वरादिषु, क्वचित् हेतुविशेषाद्भवति यथा अभिघातजज्वरः , क्षतजकासः इत्यादि, परिणामविशेषात् यथा जलोदरः दोषाणामंशांशविकल्पविशेषात् यथा श्लेष्मप्रमेहे " श्वेताच्छशीतैर्गुणैरुदकमेहः मधुरशीताभ्यामिक्षुमेहः, सान्द्रपिच्छिलाभ्यां सान्द्रमेहः इत्यादिः " । ( मा. नि. ३३।१२- मधुकोशः )

सम्प्राप्तिद्वयं विभिन्नसमयेषुस्थलेषु, रोगेषु, चेति न
सर्वत्र सर्वस्मिन्नपि रोगे उभे अपि स्तः । ताभ्यां विना न कोऽपि रोगः उत्पद्येत रोगस्थावस्था विशेषेतु सम्प्राप्त्योः क्वचित् किंचित् परिवर्तनं भवेत किन्तु तत्राऽप्युभेऽपि स्तः ।



स्थानसंश्रयसमये सामान्य सम्प्राप्तिरारभ्यते । रोगस्य व्यक्तौ तस्या एव प्रथमं स्पष्टता, ततश्च विशिष्टसम्प्राप्त्या व्यक्तीभावः ज्वरे यानि सामान्य-सम्प्राप्ति-लक्षणानि स्वेदावरोधः सन्तापः सर्वांगग्रहणं इति तानि च सामान्यसम्प्राप्ति-द्योतकानि । एतानि लक्षणानि अवश्यं सर्व ज्वरेषु प्रथमं भवन्त्येव । पित्तज्वरे यद्यपि स्वेदातिप्रवृत्तिरिति निर्दिष्टं तथाऽपि प्रथमं द्वित्रिदिनपर्यन्तमवश्यं पूर्वरूपो-त्तरकालं सामान्यलक्षणानि भवन्त्येव । ततश्च स्वेदातिप्रवृत्त्यास्यपाकादिभिः पित्तज्वरो निश्चीयते । यद्यपि पूर्वरूपकाल एव-पित्तान्नयनयोदाहः इत्या-दिना पित्तजत्वमनुमीयते तथाऽपि पित्तादिज्वरव्यतिरिक्तं भविष्यद्वातज्वरमात्रं बोधयन्ति जृम्भादयः, न तु वातस्य रूक्षशीतधातुक्षयावरणादिजन्यत्वरूपविशेषं बोधयन्ति इत्यतोऽव्यक्तवातज्वरबोधकत्वादव्यक्तत्वमेव जृम्भादीनाम् " ( मा-नि-१–६ मधुकोशः ) पित्तज्वरे हि स्थानसंश्रयकालादेव पित्तं वर्तते अतः कानिचन लक्षणानि पूर्वरूपावस्थायां व्यक्त्यवस्थायां वा कुर्यात् । किन्तु तस्य स्पष्टतया भेदज्ञानं द्वित्राणां प्रधानलक्षणानां स्पष्टतयोपलब्ध्यैव भवति । एवं सामान्यसम्प्राप्तिकालेऽपि विशेषसम्प्राप्तिर्वर्तते एव तथाऽपि विशिष्टसम्प्राप्तेः किंचित्कालमस्पष्टता भवति, ततश्च स्पष्टता इति विशेषः ।

यदा च रोगोत्पादकहेतुः व्याधिमुत्पादयति तदा सम्प्राप्ति घटका एते भावविशेषा भवन्ति । यथा अग्निमान्द्य–आम–स्रोतोरोध–दोष–दूष्य–इत्यादयोऽन्येपि भावविशेषाः येषां प्रत्येकं विचारः संक्षेपेण क्रियते ।

## अग्निः अग्निमान्द्यं च

अग्निर्हि पित्तान्तर्गतः ( च-सू-११ ) सुश्रुतेनाऽप्युक्तम् न खलु पित्तव्यति-रेकादन्योऽग्निरुपलभ्यते, आग्नेयत्वात् पित्ते दहनपचनादिष्वभिप्रवर्तमानेऽग्निवदु-पचारः क्रियते अन्तराग्निरिति ( सु. सू. २१।९ ) अत्रच व्याख्यातारो बहु विप्रतिपद्यन्ते प्रतिपादयन्ति च पित्ताग्न्योर्भिन्नत्वं, तत्तु न सम्यक् । घृतस्या-ग्निकरत्वं पित्तनाशकत्वं च तयोर्भिन्नत्वप्रतिपादकं प्रमाण इतिचेन्न । घृतं हि ग्रहण्यां पित्तस्योदीरणं करोति येन अन्नस्य पाकः सम्यक् भवति । न तु पित्तस्य निर्माणं करोति तस्य समानगुणाभावात् । पित्तशामकत्वं तु शीतगुणवत्वात् प्रभावतस्तु पित्तोदीरणपूर्वक दीपन करोतीति न विरोधः । ऊष्माऽपि पित्त-जन्य एव । ऊष्मा पित्तादृते नास्ति ( अ-हृ.नि-१ )

अन्ये पुनराचक्षते–दोषधातुमलसन्निपातजनितोऽन्तरूष्मा यथानि-र्दिष्टाधिष्ठानकर्माग्निरिति ( अ. सं. शा. ६।७५ )

अस्य वाग्भटवाक्यास्याऽप्येवमभिप्रायः। तत्र दोषधातुमलानां परस्परं संघर्षः सर्वदा सर्वशरीरावयवेषु अस्त्येव। तेन संघर्षणजनितः दोषधातुमलस्थः ऊष्मा पित्तान्तर्गतः एव भवति। ततः ग्रहण्यां व्यक्तीभवन् अग्निरित्युच्यते। यथा पाषाणद्वयसंघर्षादग्निरुत्पद्यते तथा दोषधातुमलसंन्निपातादपि अग्निरुत्पद्यते इत्युक्तिर्ना समीचीना प्रतिभाति। एतच्च चिन्त्यम्। किन्तु सचोष्मा पित्तान्तर्गत एव स्वकर्मकरोति। अतः अग्निः पित्तान्तर्गतः, पित्तादव्यतिरिक्तः इत्युक्तिरप्य-विरुद्धा।

यद्यपि सर्वशरीरे प्रत्येकस्मिन्नणावपि अग्निरस्ति तथापि त्रयोदशाग्नीनां प्राधान्यम्। जाठराग्निः, पंचभूताग्नयः, सप्तधात्वग्नयश्चेति त्रयोदश। "इति भौतिकधात्वग्नपक्तृणाम् कर्म भाषितम्"। ( च. १५।३८ ) "अत्र च यान्य-भ्यन्तराणि उपधातुमलादिगतानि तान्यप्यवरुद्धानि भूताग्निष्वेव, किं वा अप्राधान्यादकिंचित्कराणि नोक्तानि" ( चक्र-व्याख्या )। तत्रापि पाचकाग्नेः प्राधान्यम्। अन्नस्य पक्ता सर्वेषां पक्तृणामधिको मतः, तन्मूलास्ते हि तद्वृद्धि-क्षयवृद्धिक्षयात्मकाः। ( च. चि. १५।३९ )

"तत्र यदामपक्वाशयमध्यस्थं पंचभूतात्मकत्वेपि तेजोगुणोत्कर्षात् क्षपि-तसोमगुणं, ततश्च त्यक्तद्रवस्वभावं, सहकारिकारणैर्वायुक्लेदाभिरनुग्रहाद्दहनपाचना-दिक्रियया लब्धाग्निशब्दं पित्तमन्नं पचति साराकिट्टौ विभजति, शेषाणि च पित्त-स्थानानि तत्रस्थ मेवानुगृह्णाति तत्पाचकमित्युच्यते"। ( अ. सं. सू. २० )

अस्यैव केचनांशाः रसद्वारेण पोषक पित्तद्वारेण वा धातुस्थान प्राप्ताः तत्रस्थाग्निसन्धुक्षणसमर्था भवन्ति। उक्तं च—

अन्तरग्निसन्धुक्षितबलेन यथास्वेनोष्मणा......( च. सू. २८।३ )

स्वस्थानस्थस्य कायाग्नेरंशा धातुषुसंश्रिताः।
तेषां सादातिदीप्तिभ्यां धातुवृद्धिक्षयोद्भवः। ( अ. हृ. सू. ११।३४ )

सर्वेषामग्नीनां पुष्टिं ग्रहणी एव करोति। उक्तं च–
तदधिष्ठानमन्नस्य ग्रहणादग्रहणी मता।
सैव धन्वन्तरिमते कला पित्तधराह्वया॥
आयुरारोग्य वीर्येजोभूतधात्वग्निपुष्टये॥

स्थितापक्वाशयद्वारि... ( अ हृ. शा- ३:५१ )
तत्र जाठराग्निना प्रथमं संघातभेदे कृते भूताग्निर्यथास्वांशाः पच्यन्ते।
" जाठरेणाग्निना पूर्वे कृते संघातभेदे पंचभूताग्नयः पंच स्वं स्वं द्रव्यं पचन्ति "-



( च-चि- १५।१३ चक्रपाणिनोद्धुततन्त्रान्तरवचनं ) ततः स सारः यथा स्वाग्निभिः धातुषु पच्यते।

" सारस्तु सप्तभिर्भूयो यथास्वं पच्यतेग्निभिः "। ( अ-हृ-शा-३।६२ )
एवं संक्षेपेणाग्निवर्णनम् कृतम्। विस्तरस्तु आकरे द्रष्टव्यः।

पित्तवृद्धावपि नावश्यमग्नेर्वृद्धिः। वायोर्वैगुण्यात्, अन्यत्रस्वोष्माकार्य-दर्शनात्, तस्य द्रवांशवृद्धेः, उष्णतीक्ष्णेभ्योऽन्यगुणानां वृद्धत्वात्, तयोरेव क्षीणत्वात्, पाचकपित्तिकस्यचिदेवांशस्य क्षपणाच्च पित्तवृद्धावप्यग्निवृद्धिर्न स्यात्। समानवायु–विकृतिः श्लेष्मवृद्धिरपि अग्निमांद्यहेतुकी !

कायचिकित्सायां ह्यग्नेः प्राधान्यं, तस्यैव हि चिकित्सा कायचिकि-त्सोच्यते–

जाठरः प्राणिनामग्निः काय इत्यभिधीयते।
यस्तं चिकित्सेत्सीदन्तं सवै कायचिकित्सकः॥
( च–सू– ३०।२८–शिवदासोद्धृतभोजवचनम् )

अन्यत्राप्यग्नेः प्राधान्यमेवमुक्तम्—
आयुर्वर्णौ बलं स्वास्थ्यमुत्साहोपचयौ प्रभा।
ओजस्तेजोऽग्नयः प्राणाश्चोक्ता देहाग्निहेतुकाः।
रोगो स्याद्विकृते मूलमाग्निस्तस्मान्निरुच्यते।
यदन्नं देहधात्वोजोबलवर्णादिपोषकम्।
तत्राग्निर्हेतुराहारान्नह्यपक्वाद्रसादयः। ( च–चि– १५।३–५ )

बलमारोग्यमायुश्च प्राणाश्चाग्नौ प्रतिष्ठिताः।
अन्नपानेन्धनैश्चाग्निर्ज्वलति व्येति चान्यथा। ( च–सू– २७।३४२ )
विरुद्धान्नं गुर्वन्नं च न रोगकारि यद्यग्निर्बलवान्

दीप्ताग्नयः खराहाराः कर्मनित्या महोदराः।
ये नराः प्रति तांश्चिन्त्यं नावश्यं गुरुलाघवम्। ( च–सू–२७।३४४ )
एतत्प्रकृत्यैव विरुद्धमन्नं संयोग संस्कारवशेन चेदम्।
इत्याद्यविज्ञाय यथेष्टचेष्टाश्चरन्ति यत्साग्निबलस्य शक्तिः। ( अ. हृ. चि. १०।९२ )

दोषप्रकोपोऽप्यग्निमूलः

शमप्रकोपौ दोषाणां सर्वेषामग्निसंश्रितौ।
तस्मादग्नि तदा रक्षेन्निदानानिच वर्जयेत्। (च. चि. ५-१३६)

भूबाष्पान्मेघनिष्यन्दात् पाकादम्लाज्जलस्य च ।
वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः ॥ (च. सू. ६-३४)

" अग्निबले क्षीणे इत्यनेन आदानाहितमग्निमान्द्यमपि दोषप्रकोपकमिति दर्शयति । अग्निमान्द्यं चापाकविदाहाभ्यां कफपित्तकारि, धातुपोषकरसानुत्पादाच्च धातुक्षयेण वातकारि " (चक्रः)

अग्निदोषान्मनुष्याणां रोगसंघाः पृथग्विधाः ।
मलवृद्ध्या प्रवर्तन्ते विशेषेणोदराणि तु ॥ च. चि. १३-९
रोगाः सर्वेऽपि मन्देऽग्नौ । (अ. हृ. नि १२-१)
अग्निवृद्ध्या रोगनाशः पालकाप्येऽप्युक्तं—
अभ्याहतादभिप्रायात् प्रीतिः प्रीतेर्बलं बलात् ।
आग्निरग्नेश्च धातूनां साम्यं नाशस्ततो रुजाम् ॥ (च. सू. ६-९-चक्रेणोद्धृत-हस्तिवैद्यकवचनम्)

रोगसम्प्राप्तौ अग्निमान्द्यमन्यतमो घटकः । "अग्निं जरणशक्त्या परीक्षेत" (च. वि.६) इति न्यायेन अग्निमान्द्य च प्राधान्यतः पाचकाग्निमान्द्यमेव । सम्पूर्णतया केनचिदंशेन वा षडग्निष्वन्यतमस्य कोष्ठे मान्द्यं स्यात् क्वचिच्च धात्वाग्नीनां तत्राप्येकदेशस्य वा मान्द्यं स्यात् यथा राजयक्ष्माणि कुष्ठे वा ।

अग्निमान्द्यं च बाह्यकारणैराभ्यन्तर कारणैर्वा भवेत् । तत्र बाह्यकारणैः कालादिभिः ऋतुभेदेन वयोभेदेन च तस्यैवाग्निः कदाचिद्विवृद्धो भवति । हेमन्ते यौवने च कदाचिन्मन्दो भवति-वर्षासु वार्धक्ये च । (च. सू. ५-४ चक्रः) गुरुद्रव्योपयोगः साक्षादग्निमान्द्यकरः ।

अभोजनादजीर्णातिभोजनाद्विषमाशनात्...दुष्यत्यग्निः । (च. चि. १५)

दिवास्वप्नादिविहारैश्चाग्निर्मन्दोभवति—
मात्रयाप्यभ्यवहृतं पथ्यं चान्नं न जीर्यति ।
चिन्ताशोकभयक्रोधदुःखशय्याप्रजागरैः ॥ (च. वि. २)

दोषैश्चाग्निर्मन्दो भवति—
आदानदुर्बले देहे पक्ता भवति दुर्बलः ।
स वर्षास्वनिलादीनां दूषणैर्बाध्यते पुनः ॥
वसन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः ।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून् ॥ ( च-सू-अ- ६।२२ )



अजीर्णातिसारग्रहण्युदरादयः पाचकाग्निमान्द्यप्रधाना रोगाः ।

रसप्रदोषजेषु साग्निमान्द्यं रक्तप्रदोषजेषु रक्ताग्निमान्द्य एवमादि धात्वग्निमान्द्यं भवति ।

एवं सर्वेषु रोगेषु निजेषु अग्निमान्द्यं अवश्यं भवत्येव । कस्याग्नेर्मान्द्यं कोष्ठगतस्य धात्वग्नेर्वेति निश्चित्य तदनुसारिणी चिकित्सा कर्तव्या। आहारविहारैरग्निः स्वतन्त्रतया दुष्यति, तेन दोषाऽपि प्रकुपिता भवन्ति । अग्नौ च दीप्ते न रोगः उत्पद्यते । तस्तत्पालनार्थे प्रयतेत ।

आगन्तुष्वपि रोगेषु आगन्तुकारणैरभिघातादिभिः विशिष्टाग्निमान्द्ये संजाते दोषा अनुबध्नन्ति, आमश्चोत्पद्यते । अतोऽग्निमान्द्यं सर्वरोगसामान्यं इति सिद्धम् ।

## आमः

आग्नौ मन्दे किं भवति ? आमोत्पत्तिः । आमश्च रसस्यैव भवति । स च द्विविधः । प्रथमः पाचकाग्निमान्द्यात् द्वितीयः दोषेभ्योऽन्योन्यमूर्छनात् धातूष्ममान्द्यात् तथाचोक्तं वाग्भटेन—

ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् ।
दुष्टमामाशयगतं रसमामं प्रचक्षते ॥ ( अ. हृ. सू. १३ )

अत्रमाशयगत इत्यस्य आमाशयस्थ इत्येवार्थः आमाशयस्थत्वं च आमाशयावयवाधिष्ठितत्वेन प्रतिपादनीयम् । उक्तं च

आमाशयस्थः कायाग्नेदौर्बल्यादाविपाचितः ।
आद्य आहारधातुर्यः स आम इति कीर्तितः ॥ ( मा - नि - अ - २५ मधुकोशः-भोजवचनम् )

आमाशये सारकिट्टविभजनानन्तरं रसस्य शोषणकले रसः आमाशयावयवस्थोभवति । यद्यपि सारस्य प्रतिक्षणं विभजनं शोषणं च भवति तथाऽपि शोषणकाले असम्यक्पक्वः अल्पोऽपि सारः आम इति संज्ञां लभते । शोषणानन्तरं येन केनाऽपि दोषेण धातुना वा मिश्रीभवति । ततः केवलामता न भवति किन्तु दोषधातुमलानां सामता भवति ।

आमेन तेन सम्पृक्ता दोषा दूष्याश्च दूषिताः
सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥ (अ. हृ. सू. १३।२७ )

आमस्य स्वरूपमुक्तम्–

अविपक्वमसंयुक्तं दुर्गन्धं बहु पिच्छिलम् ।
सदनं सर्वगात्राणामाम इत्यभिधीयते ॥ ( मा. नि. २५-मधुकोश )

द्रवं गुर्वनैकवर्णं हेतुः सर्वरोगाणां स्निग्धं पिच्छिलमामं तन्तुमदनुबद्धशूलं दुर्गन्धि । ( अ. हृ. सू. १३-२७ अरुणदत्तव्याख्या )

यदा अतिमात्रभोजनेन अपरिणत आहारो वातादीन् कोपयाति तदा तैर्दुष्ट आहारः आमदोष उच्यते – ( च. वि. २ ) । तं द्विविधमाचक्षते भिषजः विषूचिकामलसकं च (च. वि. २-१० ) । अत्रैतदवधेयं यत् अपक्वादाहारात् उत्पन्नः आमरसः विषरूपः अन्तः शोषितः वातादीन् प्रकोप्य विषूचिकां अलसकं वोत्पादयति, न शोषणात्पूर्वं । अतः आमरसः एवात्र कारणम् न तु केवलपक्वमन्नम् । " विरुद्धाध्यशनाजीर्णशीलिनः पुनरामदोषमामविषमाचक्षते भिषजः विषसदृशलिंगत्वात् तत् परमसाध्यम् " ( च. वि. २-१२ ) एतच्च आमरसः एव विषसदृशत्वात् आमविष उक्तः । अग्निमान्द्येसति अपच्यमानमन्नं शुक्तत्वं विषरूपतां च याति । यदि तस्यामवस्थायां सोऽर्धपक्वः सारः ( आमः ) हृदयं याति ततश्च सर्वशरीरं गच्छन् यत्र सज्जति तत्रैव रोगं कुरुते ।

संसृज्यमानं पित्तेन दाहं तृष्णां मुखामयान् ।
जनयत्यम्लपित्तं च पित्तजांश्चापरान् गदान् ॥
यक्ष्मपीनसमेहादीन् कफजान् कफसंगतम् ।
करोति वातसंसृष्टं वातजांश्च गदान् बहून् ॥
मूत्ररोगांश्च मूत्रस्थं कुक्षिरोगान् शकृद्गतम् ।
रसादिभिश्च संसृष्टं कुर्याद्रोगान् रसादिजान् ॥ ( च. चि. १५-४९ )

अत्रच सर्वे रोगाः आमजत्वेन निर्दिष्टाः, अत एव रोगाणां आमयत्वम् । अनेन नैतन्मन्तव्यं यदाम एव सर्वरोगकारणमिति । किन्तु आमः रोगसम्प्राप्तावन्यतमोऽवश्यंभावो घटकः ।

## द्वितीयप्रकार आमः

अन्ये दोषेभ्य एवातिदुष्टेभ्योऽन्योऽन्यमूर्च्छनात् ।
कोद्रवेभ्यो विषस्येव वदन्त्यामस्य सम्भवम् ॥ ( अ. हृ. सू. १३-२६ )

अयं च द्वितीयः प्रकारः । यदा च दोषः प्रसरमाणः खवैगुण्यात् रसेन साकं सज्जति तदा तत्रस्थेन स्थानिकदोषेण दूष्येण च सम्मूर्च्छति तदा तत्रस्थित रसाग्निमान्द्यात् तस्य रसस्य आमता भवति, तेनामेन च स दोषः दूष्यं च संयुज्यते ततो रोगः उत्पद्यते ।



आमाशयोद्भूतरोगेषु पाचकाग्निमान्द्यात् यः उत्पद्यते आमः स कारणम् यथा ज्वरातीसारग्रहण्यादिषु अलसकाविषूचिकामवातादिषुच । द्वितयिस्तु यथा प्रसवानन्तरं सूतिकाज्वर इति ख्यातः ज्वरः च उदेति तत्र च दोषणामन्योऽन्यमूर्च्छनादुत्पन्न आम एव कारणम् न तु पाचकाग्निमान्द्यादुत्पन्नः । तथा आगन्तुव्याधिषु अभिघातादिष्वपि द्वितयिः प्रकार उत्पद्यते ।

सामदोषाणां लक्षणमेवमुक्तं वाग्भटेन - १-स्रोतोरोधः २-अनिलमूढता ३- मलसंगः ४- बलभ्रंश ५ - क्लमः ६ - गौरवम् ७, आलस्यम् ८-अपक्तिः ९- अरुचिः १० - निष्ठीवः । अत्राद्यं लक्षणं स्रोतोरोध उक्तः । स एव प्रधानः आमकृतः लक्षणविशेषः । तज्जन्येव तदनन्तरे द्वे लक्षणे । तत्परिणामेन धातूनां सम्यक् पोषणाभावात् बलभ्रंशः क्लमः, आलस्य च । स्रोतोरोधस्थले संचयात् गौरवम् । अग्निमान्द्यकृता अपक्तिः अरुचिनिष्ठीवौ रसस्यदोषकृतौ ।

सामेहि प्रधानतः कफलक्षणानि दृश्यन्ते, आमस्य स्निग्धापिच्छिल गुणवत्वात् !

आमसंसृष्टस्य प्रत्येकदोषस्य लक्षणान्यग्रे निर्दिष्टानि । तत्राऽपि प्रधानं प्रथमं च लक्षणं स्रोतोरोधः तेनैव वाते आध्मानादयः पित्ते दुर्गन्धादयः कफे आविलत्वादयो भवन्ति । ( अ.हृ. सू १३–अरुणदत्तोद्धृसंग्रहवचनम् )

| सामवातलक्षणानि | निरामवातलक्षणानि |
|---|---|
| विबन्धः | विशदः |
| स्तम्भः | रूक्षः |
| अन्त्रकूजनम् | निर्विबन्धः |
| वेदना ( सं ) | अल्पवेदना |
| शोफः | विपरीतगुणैर्विशेषतः स्निग्धैः शमं याति । |
| निस्तोदः ( सं ) ( एतैः क्रमशोऽगानि पीडयेत् स्नहोद्यैर्वृद्धिमायाति सूर्यमेघोदयेनिशि) | |
| आध्मानम् (सं ) | |
| असंचरः ( सं ) | |

| सामपित्तलक्षणानि | निरामपित्तलक्षणानि |
|---|---|
| दुर्गन्धि | विगन्धि |

| | |
|---|---|
| हरितम् | आताम्रं (ताम्रं) (सं) |
| श्यावम् | पीतं समेचकम् |
| अम्लम् | कटुकम् |
| घनम् | अच्छम् |
| गुरु | अस्थिरम् |
| अम्लीकाकरम् | रुचिप्रदम् |
| कण्ठहृद्दाहकरम् | पक्तिबलप्रदम् |
| सामश्लेष्मलक्षणानि | निरामश्लेष्मलक्षणानि |
| अविलः ( सं ) | अच्छः (सं) |
| तन्तुलः ( सं ) | पिण्डितः (सं) |
| स्त्यानः ( सं ) | विशदः ( सं ) |
| प्रलेपी ( सं ) | सफेनः ( सं ) |
| पिच्छिलः ( सं ) | धवलः ( सं ) |
| कण्ठदेशेऽवतिष्ठते | मधुरः ( सं ) |
| दुर्गन्धिः | अगन्धः |
| क्षुदुद्गारविघातकारः | निःसारः |
| | पाण्डुः |
| | छेदवान् |
| | वक्त्रशुद्धिदः |

रसः सज्जति यत्र तत्रैव व्याधिरुपजायते । तत्र च स्रोतोरोध आमेन विना न जायते। अतः सर्वेष्वपि रोगेषु पाचनमावश्यकं भवति । शमनचिकित्सायां दीपनपाचने द्रव्यरूपे " शमनं तच्च सप्तधा । दीपनं पाचनं क्षुत्तृड् व्यायामातपमारुताः ( अ–हृ– सू–१४ ) अत्र दोषाणां शमनं दीपनेन पाचनेन वा द्रव्येण क्रियते, नान्येन । तत्र दीपनमग्निमान्द्यनाशार्थे पाचनं चामपाचनार्थे येन च स्रोतोरोध अपैति ।

ननु सर्वेषु रोगेषु आमः विद्यत इति यदुच्यते यदुयुक्तम्। आमाशयपक्वाशयादन्यत्रोदभोतिषु रोगेषु सामतालक्षणाभावादिति चेन्न । रक्तपित्तेऽपि सामत्वमुक्तम् ।

" प्रायेण हि समुत्क्लिष्टमामदोषाच्छरीरिणाम् ।
वृद्धिं प्रयाति पित्तासृक् तस्मात्तल्लंघ्यमादितः ॥

( च–चि ४।२९ )



प्रमेहेऽपि अपरिपक्वा वातपित्तश्लेष्माणः अपरिपक्वं च मेदः
( सु. नि. ६।४ ) गयदासश्च

इत्यनेन दोषाणां सामत्वमेव निर्दिश्यते। अत्रच न पाचकाग्निमान्द्यं किन्तु धात्वग्निमान्द्यमेव । कुष्ठेऽपि त्वग्लसीकासृगामिषाणां शैथिल्यं तत्त्वथाग्निमान्द्यादेव भवति । तत्र यदा रसः सज्जति तदा तस्यामतैव भवति । अतएव चात्र " लघूनि चान्नानि हितानि...न गुर्वम्लपयोदधीनि इत्युक्तम्(च. चि. ७।८२ ) कुष्ठनिदानेऽपि... " सततमातिमात्रमजीर्णेच समश्नतः..." एतैरेवातिमात्रं सुहितस्य " ( च. चि. ५।६ ) इत्युक्तैः कारणैरवश्यमामोत्पत्तिरनुमीयते । राजयक्ष्मण्यपि–

स्रोतसां सन्निरोधाच्च भक्तादीनां च संक्षयात् ।
धातूष्मणां चापचयाद्राजयक्ष्मा प्रवर्तते ( च. चि. ८।४० )

इत्यनेन धातूष्मणां मान्द्यमुक्तं । अतः आमोत्पत्तिरवश्यं भवति। प्रत्यक्षतोऽपि श्लेष्मा सामलक्षणयुक्तो दृश्यते । उन्मादापस्मारेष्वपि अरुचिनिष्ठीवाग्निमान्द्यादेवः सामतामेव द्योतयन्ति ।

अपस्मारे आधुनिकैरपि किंचित् द्रव्यमामसदृशमनुनितम्[1]

एवं वातव्याधावप्यामेनैव स्रोतोरोधः—यथा अर्दिते कर्णमूले स्पर्शासहत्वं आमकृतस्रोतोरोधेन, पक्षाघातेऽपि स्रोतोरोधेनैवान्यतरपक्षे वातक्षयः क्रमेण धातूक्षयश्च। स्रोतोरोधश्चामकृत एव। अत एव वातव्याधिषु स्वेदः क्रियते। हर्षतोदरुगायामशोथस्तम्भग्रहादयः वातस्य शीतगुणकृतास्तथा आमेनस्रोतोरोधकृताश्च, ते च" •स्विन्नस्याशु प्रशाम्यन्ति मार्दवं चोपजायते "। ( च. चि. २८।८० ) रास्नागुल्वादीनां तिक्तरसानां वातरोगेषूपयोगः आमपाचनार्थमेव।दीपनपाचनाभ्यां विनाशमनौषधिर्नास्तीति पूर्वमेव प्रतिपादितम् । केचिच्च पक्षाघाते प्रथमं लघनंकारयन्ति तदप्यामपाचनार्थमेव ।

पाचनं चामस्यैव तथा चोक्तं—
स्वहेतुपचितान् दोषान् सामान् रसापथानुगान्
रसमामं पाचयित्वा कुर्याद्दोषं पृथक् ततः ॥

---

1. A metabolic dyscrasia, some unknown epileptogenous agent circulates in the blood from time to time. Thus the serum taken from a patient during an attack may induce convulsions on injection into an animal whereas the serum between the attacks is inocuous. ( Beaumont Page 339/1953 ).

स एवं पाचनो ज्ञेयो न च दोषान् विपाचयेत् ।
तथाऽत्र धातुसंश्लिष्टाः सामाः स्वहेतुदूषिताः ।
लंघनात्पाचनोल्लेखात्स्वप्रमाणं भजन्त्यपि ।
पच्यन्ते नैव दोषास्तु पचन्त्यामरसादयः ॥
( टोडरानन्दोद्धृतकृष्णात्रेय वचनम्-तृतीयहर्षः )

चरकेणापि शोथप्रकरणे उक्तं " अथामजं लंघनपाचनक्रमैः " ( च. चि. १२-१७) अत्र चक्रस्त्वाह-आमजमिति आमदोषजनितं, अपक्वता च प्रायो दोषाणां प्रथमदुष्टौ भवति " । " आमं हि सर्व रोगाणां " (आयुर्वेदसूत्र प्रथमप्रश्नः सूत्र ९)

ननु ज्वरातीसारादिषु निरामावस्थाप्यस्ति । तत्रामाभावः इति चेत्सत्यं-रोगारंभकालेऽवश्यं आमसद्भावः, चिकित्सया च निरामता सम्पाद्यते । आमोऽपगतेऽपि दोषदूष्यसम्मूर्च्छनाया अपगमः किंचित्कालानन्तरमेव भवति । अस्यामप्यवस्थायां आमः पुनर्नोत्पद्येते यथा तथा कर्तुं दीपनचिकित्साऽनुवर्त्यते । अत एव जीर्णज्वरे घृतपानं, ग्रहण्यां पर्पटीकल्प। एवमादि उपयुज्यते राजयक्ष्मणि आमस्रोतोरोधापगमानन्तर सर्वं बृंहणं क्रियते । अतीसारेऽपि निरामावस्थायां स्तंभनं संसर्जनक्रमश्च आमानुत्पादनार्थे दोषधातु-वैषम्यापगमार्थं चिकित्सा क्रियते ॥

रस एवं खलु अपक्वत्वात् व्यापन्नः आमो भवति । एवमेव व्यापन्नै र्दोषधातुभिरुत्पद्यन्तेऽन्यान्याति द्रव्याणि रोगावस्थायां यथा-पूयः, कोथः, भक्षितास्थि, क्रिमि, अश्मरी, मृतगर्भ, दन्तशर्करा, एवमाभ्यमामयऽपि व्यापन्नद्रव्याणि शरीरे शल्यभूतानि आबाधकराणि भवन्ति । उक्तं हि-" सर्वशरीराबाधकरं शल्यम्....तत्र शरीरं दन्तरोमनखादिधातवोऽमला दोषाश्च दुष्टाः । आगन्त्वपि शरीरशल्यव्यतिरेकेण यावन्तोभावा दुःखमुत्पादयन्ति "(सु.सू. २६-६)

एतानि पयादीनि द्रव्याणि दोषधातुमलस्वरूपं परित्यज्य शरीरे उत्पन्नानि व्यापन्नधातुरूपाणि । एतानि पुनः शरीरधातुत्वेन परिवर्तयितुं न शक्यानि । तेषां च संघातभेदं कारयित्वा बहिर्निष्कास्यानि । अत एवोक्तं सर्वेषु रोगेष्वपकर्षणविधिः प्रथमेति ।

" अपकर्षणमेवादौ क्रिमीणां भेषजं स्मृतम् ।
ततो विघातः प्रकृतेर्निदानस्य च वर्जनम् ॥
अयमेव विकाराणां सर्वेषामपि निग्रहे ।
विधिर्दृष्टस्त्रिधायोऽयं क्रिमीनुद्दिश्य कीर्तितः ।
( च-वि-८-२९ )



एतेषां व्यापन्नद्रव्याणां ज्ञानं तत्तद्विशिष्टलक्षणैः प्रत्यक्षयादि गृहीतैर्भवति तेषामवबोधे अपनयने च प्रयत्नः कार्यो भिषजा ।

## स्रोतोवैगुण्यं, स्रोतोदुष्टिश्च

आमेन स्रोतोरोधः, खवैगुण्याच्च रससंगः इतिचोक्तं । एवं स्रोतोदुष्टिरपि संप्राप्तिषट्केष्वन्यतमा । अतोत्र प्रथमं स्रोतः किमिति संक्षेपेण विचार्य स्रोतोवैगुण्यदुष्टी विमृश्येते ।

## स्रोतांसि

स्रोतांसि खल्वाकाशीयावकाशानि, तानि च सिराधमनीभ्यो व्यतिरिक्तानि । क्वचित् वृत्तस्थूलानि, क्वचिदणूनि, क्वचिद्दीर्घाणि, क्वचिच्च प्रतानसदृशानि । तानि द्विविधानि बाह्यान्याभ्यन्तराणि च । श्रवणनयनवदनघ्राणगुदमेढ्राणि नव बाह्यस्रोतांसि, स्त्रीणामपराणि च त्रीणि द्वे स्तनयोरधस्ताद्रक्तवहं च । तेषु बाह्यस्रोतःसु न प्रधाना स्रोतःसंज्ञा ।

आभ्यन्तराणि प्राणान्नोदक-धातुमलानामायतनानि प्रधानतः त्रयोदश, तेष्वेव मुख्या स्रोतः संज्ञा " तानि जीवितायतनानि " ( अ-सं-शा-६ ) तत्र प्रत्येक-स्रोतसो मूलद्वयमुक्तम् । अतस्तद्वितयसम्बद्धानि द्विविधानि स्रोतांसीति ज्ञायन्ते ।

यावन्तो मूर्तिमन्तो भावविशेषास्तावन्त एवास्मिन् स्रोतसां प्रकारविशेषाः सर्वेहि भावा पुरुषे नान्तरेण स्रोतांस्यभिनिर्वर्तन्ते ( च - वि - ५।३ ) स्रवणात्खलु स्रोतांसि । अतो यः कोऽप्यवयवविशेषः स्रवण स्वभावः तदेव स्रोतः । आमाशये अन्यत्रवा पित्तस्राविणः अथवा कफस्राविणो वा रचनाविशेषाः तान्यपि स्रोतांस्येव । वातपित्तश्लेष्मणां पुनः सर्वशरीरचराणां सर्वाणि स्रोतांस्ययनभूतानि ( च - वि - ५।७ ) वातस्य गमनागमनं प्राणवहस्रोतासि स्पष्टमेव । "प्राणाख्यस्य वायोर्विशिष्टं स्रोतः प्राणवहं स्रोतः । सामान्येनतु वायोः सर्वाण्येव धमन्य इति न विरोधः ( चक्रः - च - वि - ५।७ ) पित्तकफयोस्तु सर्वत्र शरीरे स्रावीणि स्रोतांस्युपलभ्यन्ते । अन्नसारस्य अन्तः शोषणार्थे याम्यातिसूक्ष्माणि च्छिद्राणि तान्येवान्नवाहीनि अत एव तेषां मूलमामाशयः वामं च पार्श्वमित्युक्तम् । पुरीषवाहीनि च स्थूलान्त्रस्थानि सूक्ष्मावकाशानि येभ्यो मलमुपचीयते आन्त्रेषु ।

धातुवाहीनि सप्त । स्रोतांसि खलु परिणाममापद्यमानानां धातूनामभिवाहीनि भवन्त्ययनार्थेन (च - वि - ५ )

यथास्वेनोष्मणा पाकं शारीरा यान्ति धातवः ।
स्रोतसाच यथास्वेन धातुः पुष्याति धातुतः ॥ ( च - चि - ७ )

तेषां मलप्रसादाख्यानां धातूनां स्रोतांस्ययनमुखानि, तानि यथाविभागेन यथास्वं धातूनापूरयन्ति ( च - सू - २८ )। एवं धातुपोषणक्रमः स्रोतोभिरेव भवती-त्युक्तं भवति । तत्र रसवहानि च रसवहधमनीनां सूक्ष्मेषु प्रतानाग्रेषु यान्याति सूक्ष्मच्छिद्राणि भवन्ति, येभ्यश्च रसो धातुपोषणार्थं स्रवति तान्येव । तेषां मूलत्वेन हृदयस्य रसवहधमनीनांचोल्लेखः । रक्तवहानिच यकृत्प्लीह्नोर्वर्त-मानानि सूक्ष्मावयवविशेषाः येषु रक्तं रसात् पोष्यते । तथाऽन्यत्राऽपि शरीरावयवविशेषे रक्तस्य निर्माणं रक्तवहस्रोतोद्वारेणैव भवति । एवमेव मांसमेदोमज्जावहानामपि तेषु वर्तमानाः सूक्ष्मावयवविशेषाः येषु तत्तद्धातवः पृथक् क्रियन्ते पोषकधातुतः । अस्थिषु मध्ये वर्तमानानि सूक्ष्मच्छिद्राणि ( हावर्शियन् कैनाल ) अस्थिवहस्रोतांसि। शुक्रवहानि च मुष्कयोर्वर्तमानानि सूक्ष्मावयवविशेषाः । स्वेदवहानि च त्वचि विद्यमानाः सूक्ष्मावयवविशेषाः यैः स्वेदः रसात् पृथक् क्रियते । उदकवहानि च स्रोतांसि प्रधानतः तालुन उपरि मस्तिष्कान्तः स्थितानि, सूक्ष्मावयवविशेषाः ( Villous projections of the choroid pleaxus ) यैश्चोदकम् प्रतिक्षणम् स्रवति । तथान्यान्यपि सूक्ष्मा-वयवविशेषाः ( Perivascular spaces etc. ) यैश्चोदकस्य गमनागमनं भवति ।

## स्रोतोमूलानि

प्राणवहानां स्रोतसां हृदयं मूलं महास्रोतश्च । प्राणवहं स्रोतश्च फुप्फुसः । तस्य रोगः प्रायशः श्वासः । अतः श्वासरोगे हृदयदुष्टिः, हृदयदुष्टेः श्वासरोगश्च भवति एवं श्वासरोगे आध्मानं, आध्मानपूर्वकं श्वासरोगोत्पत्तिश्च भवति ।

उदकवहानां तालुमूलं क्लोम च । अत्र तालुशब्देन तालूपरिविद्यमानः अवयवविशेषसहितः तालूपलक्षितप्रदेशोग्राह्यः । ( Pitutary of Ventricles ) तस्य भ्रूणावस्थायां तालुन एवोत्पत्तिः ।[1]

1. The pitutary body has a dual origin–from the ectoderm of the roof of the primitive mouth ( stomadium ) just in front of the buccopharingeal membrane, as well as from the base of the brain. In the early embryo a pouch grows upwards from the stomadium prolonged downwards from the floor of the third ventricle. ( Best and Taylor ).



तथा तस्य समीपे उपरिष्टात् विद्यमानः जलपूर्णः सुषिरभागः ( Third Ventricles ) सोऽपि तालु । यतः सः तालूपलक्षितप्रदेशो जलपूर्णः । यथा रस-वहस्रोतोमूले रसस्तिष्ठति, प्राणवहस्रोतोमूले प्राणास्तिष्ठन्ति, तथा उदकवहस्रोतो-मूलेऽपि उदकोपलब्धिरपेक्षते । तथा तेनच शरीरोदकस्य घनिष्ठः सम्बन्धश्च प्रति-पाद्यः । अत्र च मस्तिष्कान्तरस्थसुषिरभागे उदकं प्रदर्शयितुं शक्यते, तथा तदधस्थ ( पिट्युटरि ) अवयवविशेषस्य शरीरोदकस्य च घनिष्टः सम्बन्धो वर्तते ।[1]

याथऽन्यस्रोसां तथाऽम्बुवहानामपि द्वे मूलेवुक्ते । अन्येषु हि स्रोतोमूलयोः परस्परं घनिष्टः सम्बन्धो दृश्यते यथा वामपार्श्वामाशययोः, पक्वाशयगुदयोश्च । तथा तालुक्लोम्नोरपि परस्परसम्बन्धो न्याय्यः । क्लोम च कोष्ठांगेषन्यतमः पंचदश कोष्ठांगानि नाभिश्च हृदयं च क्लोम यकृच्च, प्लीहा च, वृक्कौ च .........( च - शा - ७-१० )कोष्ठांगानि न हि सूक्ष्माणि किन्तु स्थूलान्येव "एतादृश्यं शक्यमपि निर्देष्टुम्" ( च. शा. ७-१३ ) कोष्ठांगानि च प्रधानान्यंगानि येषु प्रधानतः शरीरकार्याणि सम्पद्यन्ते । तानि सर्वाण्यप्यन्तरा-धावेव तिष्ठन्ति । यथा चोदकपूर्णस्तालुप्रदेशः तद्वत् तत्सम्बद्धक्लोम्न्यपि उदकं भावितुमर्हति । तस्मात् कोष्ठांगत्वेन स्थितः तालुसम्बद्धः उदकयुक्तः अवयवः, पर्शुकामध्ये यथा हृदयं तद्वत् कशेरुकाणां मध्यस्थः सुषुम्नानाम्ना योगशास्त्रे ख्यातः हृदयसमीपे हृदयपार्श्वात् स्थितः अवयव एव क्लोम इति निर्णयः समीचीनः प्रतिभाति ।

उदकं च सर्वशरीरे भवति तत्राऽपि "दशोदकस्यांजलयः स्वेनां-जल-प्रमाणेन, यत्तुपच्यवमानं पुरीषमनुबध्नात्यतियोगेन तथा मूत्रं रुधिरमन्यांश्च शरीरधातून् । यत्तु सर्वशरीरचरं बाह्यात्वग्बिभर्ति, यत्तु त्वगन्तरे व्रणगतम् लसीकाशद्बं लभते, यच्चोष्मणानुबद्धं लोमकूपेभ्यो निष्पतत् स्वेदशद्बमवाप्नोति तदुदकं दशांजालिप्रमाणम् ( च. शा. ७।१५ ) प्रमेह – उदर – अतीसार – उरस्तोय – मूत्रवृद्धिः जलार्बुदादयो व्याधयः उदकधातुविमार्गगमनप्रधानाः रोगाः । तेषां मध्ये प्रमेहः उदररोगश्च प्रधानो, तत्र च तालुविकृतिमाधुनिका अपि मन्यन्ते, क्लोम च वातवाहिनीनामधिष्ठानं मन्यन्ते किंन्तु प्रमेहोदरयोः कारणत्वं, नाद्रियन्त इति तु चिन्तनीयम् । मस्तिष्कसौषुम्निकज्वरे च तालुक्लो मजलस्य विकृतिर्भवति ।

1. ( The antidiuritic principle of the hypophysis........ constitute part of the mechanism regulating the volume of body water. ( Best and Taylor Page 21/1955 ).

अन्नवहस्रोतसां आमाशयो मूलं वामं च, पार्श्वं, तत्राग्निमान्द्याजीर्णग्रह-
ण्यादयो रोगा भवन्ति । पुरीषवहानां स्रोतसां पक्वाशयो मूलं स्थूलगुदं च
अतीसारगुदभ्रंशशादय तज्जा रोगाः । मूत्रवहानां स्रोतसां बस्तिर्मूलं वंक्षणो च ।
मूत्रकृच्छमूत्राघाताश्मर्यादयः तज्जा रोगाः । यदि गवीन्योरश्मरी पीडयति तदा
वंक्षणयोरवश्यं शूल उत्पद्यते, तथा मूत्रे कृच्छ्रता सरक्तता च दृश्यते ।
अतः मूत्रावहाना वंक्षणौ मूलमित्युक्तं वृक्कयोश्च मूत्रं
प्रत्यक्षतयो नोपलभ्यते अतस्तयोर्मूलत्वं न स्वीकृतमित्यूनीह्यम् ( रसवहानां
स्रोतसां हृदयं मूलं दश च धमन्यः । हृद्रोगज्वरादयश्च तज्जा व्याधय । अत
एव अंगुष्ठमूले या जीवसाक्षिणी धमनी वर्तते सा विशेषेण रसवहस्रोतोगत-
व्याधिषु परीक्षणीया । रक्तवहानां स्रोतसां यकृन्मूलं प्लीहा च ( रक्तवहाधमन्य
(सु) रक्तपित्तवातरक्तप्लीहोदरादयः कुष्ठविसर्पादयश्च तज्जा रोगाः। मांसवहानां
स्रोतसां स्नायुर्मूलं त्वक् च । गण्डमालापूतिमांसपिंडकादयः तज्जा रोगाः,
कुष्ठविसर्पादिष्वपि तस्य दुष्टिर्भवति । मेदोवहानां स्रोतसां वृक्कौ मूलं वपावहनं
च । वृक्कौ तु कुक्षेरुभयतः पार्श्वयोरधस्तात् स्थितो कुक्षिगोलकौ प्रसिद्धौ ।
वपावहनं तु आमाशयसमीपस्थितो वर्तिरूप अवयव : ( pancreas ) तस्य
दुष्टौ प्रमेहश्च प्रवर्तते । एतच्च आधुनिकरीत्याऽपि स्पष्टीकृतम् । कैश्चिदेतत्
क्लोम इत्युच्यते तदसम्यक् तत्रोदकानुपलब्धेः उदकवहानां तस्य च सम्बन्धा
भावात् विशेषतः प्रमेहे तस्य दुष्टेः स्पष्टत्वाच्च । स्वेदवहानां मेदोमूलं रोमकूपाश्च
अत एव मेदस्विनः प्रमेहिणश्च स्वेदाधिक्यम् । अस्थिवहानां मेदोमूलं जघनं
च मज्जवहस्रोतसां अस्थिमूलं सन्धयश्च । अस्थि-मज्जगतज्वरकुष्ठव्याधिषु,
अध्यस्थ्यादिषु च तेषांदुष्टिः । शुक्रवहानां स्रोतसां वृषणौ मूलं मेढ्रं च । अत
एव क्लैब्ये मेढ्रस्यानुत्थानम् । वृषणयोश्च शुक्रोत्पत्तिरिति तदन्वयव्यतिरेकेण
स्पष्टीकर्तुं शक्यते । आर्तववहस्रोतसां गर्भाशयो मूलं आर्तववाहिन्यश्च धमन्यः ।
विंशतियोनिव्यापदः प्रदरश्च तज्जारोगाः । अन्यान्यपि स्तन्यवहाश्रुवहमनो-
वहानि स्रोतांसि उक्तानि शास्त्रेषु । स्तनयोः स्तन्यवाहीनि तत्र स्तन्यदुष्टिः,
नेत्रे अश्रुवहानि, तद्दुष्टौ अश्रुवहनाड्यादयश्च रोगाः सम्भवन्ति । मनोवहं
स्रोतः सर्वशरीरगतस्य मूलं हृदयम् । तद्दुष्टौ रोगाश्च उन्मादापस्मारादयः ।

आयुर्वेदे हि विकृतिविज्ञानपूर्वकं प्रकृतिविज्ञानविनिश्चयः कृतः ।
विकृतो यस्यांगस्य येन सम्बन्धी दृष्टः तस्य तन्मूलत्वेन ग्रहणम् । अतः
स्रोतोमूलविज्ञानं चिकित्सामुपयोगि भवति ।

प्रायशः सर्वाण्यपि कोष्ठांगानि स्रोतोमूलत्वेन निर्दिष्टानि । सिरा धमन्यश्च
स्रोतोमूलत्वेनोक्तानि । धातवः मला, दोषाश्च तेषु वहनद्रव्याणीत्युक्तानि ।



अतः सर्वं शरीरं त्रयोदशस्रोतासु विभक्तमित्युक्ते रोगिपरीक्षादिषु सौलभ्यमु-
पलभ्यते । यस्य कस्यापि स्रोतसः एकदेशे रोगे संजाते तत्सम्बन्धिष्ववय-
वेषु परीक्षा प्रथमं कार्या । स च रोगः तस्मिन्नेव स्रोतसि प्रायशः
प्रसरणशीलो भवति । अतः तस्य स्रोतसः प्रथमं रक्षा कर्तव्या चिकि-
त्सया । यथा प्राणवहस्रोतसो रोगेषु तत्सम्बन्धिनां हृदयादीनां प्रायो दुष्टिर्भवति ।
" तेषां प्रकोपात् स्थानस्थाश्चैव मार्गगाश्च धातवः प्रकोपमापद्यन्ते । इतरेषां
प्रकोपादितराणि च । ( च. वि. ५ ) तेचावकाशाः प्रकुपिताः स्थानस्थान्
मार्गस्थांश्च धातून् प्रकोपयन्ति, तेऽपि तान् स्रोतांसि च । स्रोतांसि धातवश्च
धातून् । तेषां सर्वेषामेव दूषयितारो दुष्टा दोषाः ( अ. सं. शा. ६ ) एवं
चैकस्मिन् स्रोतस्येकत्र संजाता दुष्टिः अन्यत्राऽपि तस्मिन्नेव स्रोतसि, तथा
समीपस्थस्रोतस्स्वपि प्रसरति तथा धातुष्वपि ।

यद्यपि स्रोतांसि तद्गतधातवश्च विभिन्नाः तथाऽपि तद्दुष्टिलक्षणानि
समानान्येव । यदा कश्चिद्धातुर्दुष्टत्युच्यते तदा तद्वहस्रोतो पि दुष्टमित्येव मन्तव्यं,
लक्षणसाम्योपदेशात् । अतो व्याधौ संजातेऽवश्यं कस्याऽपि स्रोतसो दुष्टिर्भवत्येव ।

रोगारम्भोऽपि स्रोतोवैगुण्यं विना नैव भवति ।

व्यानेन रसधातुर्हि विक्षेपोचितकर्मणा ।
युगपत् सर्वतोऽजस्रं देहे विक्षिप्यते सदा ॥

क्षिप्यमाणं खवैगुण्याद्रसः सज्जति यत्र सः ।
करोति विकृतिं तत्र खे वर्षामिव तोयदः ॥( सु - सू -२४-१०)

खवैगुण्यात् स्रोतोवैगुण्यादित्यर्थः ( डल्हणः )

रसेन सह दोषा अपि संचरन्ति –

प्रतिरोगामिति क्रुद्धा रोगाधिष्ठानगामिनीः ।
रसायनैः प्रपद्याशु दोषा देहे विकुर्वते ॥ ( अ-हृ-नि- १-१३ )

तत्रापथ्यं यथामुक्त रससेव्यथवा पुनः ।
कुर्यान्नरोगान् दीप्ताग्नी रसव्यापत्तिसम्भवान् ॥
शोणिताद्यात्मतां गच्छेत् परिणामवशात्तदा ।
यस्मिन् व्यापद्यते धातौ तस्मिन् व्याधीन् करोत्यथ ।
( भेल – पृष्ठ ११७ )

अत्र खवैगुण्यमित्यस्य स्रोतोवैगुण्यमित्येवार्थः कृतः सर्वैरपि व्याख्यातृभिः ।

अधुनाऽत्रवैगुण्यं दुष्टिश्च पृथक् वर्ण्येते। यत्र दोषाणां सम्बन्धो-नास्ति केवलं रचनायां विकृतिः तदेव वैगुण्यं, यथा नासावक्रता, अंगुलीवक्रता, दुःखानुत्पादकः हृदये शब्दविकृतिः। एवं स्रोतसामपि वैगुण्यं दुःखानुत्पादको विकृतिविशेषः स्थानिकदोषदूष्यवैषम्यकृतः। तच्च आहार-विहारादिभिः साक्षाद्भवत्येव। अव्याधिसहानि च शरीराणि विगुणस्रोतस्त्वा देव भवन्ति। वैगुण्यं च सापेक्षं। स्रोतः प्राकृतमेवाऽपि तत्स्थद्रव्यस्य वृद्धौ तत्स्रोतसः वैगुण्यमस्ति। यथा अन्नवहस्रोतसः अग्नेश्च साम्येऽपि अध्यशनेन तस्य वैगुण्यं ततः दोषप्रकोपे रोगोत्पत्तिश्च भवति। "शरीराणि चाति स्थूला-न्यातिकृशान्यानिविष्टमांसशोणितास्थानि दुर्बलान्यसात्म्याहारोपचितान्यल्पाहारा-ल्पसत्त्वानि च भवन्त्यव्याधिसहानि" (च–सू–२८) अत्रातिस्थौल्ये मेदोवृद्धौ मेदोवहस्रोतोवैगुण्यम्। कार्श्ये च रसवहस्रोतोवैगुण्यम्। दौर्बल्यं चोजः क्षयाद्भवति। तत्र च ओजोवहानां (रसवहानां) वैगुण्यं। असात्म्या-हारेणाल्पाहारेण च यस्य धातोर्वृद्धिः क्षयो वा भवति तत्स्रोतसो वैगुण्यं। अल्पसत्त्वेन च मनोवह स्रोतोवैगुण्यं। आहारेणवैगुण्यमिति रसायनाधिकारेऽपि सूचितम्... "अतोनिमित्तं हि शिथिलीभवन्ति मांसानि, विमुच्यन्ते संधयः, विदह्यते रक्तं, विष्यन्दते चानल्पं मेदः, न सन्धीयतेऽस्थिषु मज्जा, शुक्रं न प्रवर्तते, क्षयमुपैत्योजः स एवं भूतो ग्लायति, सीदति, निद्रातन्द्रालस्यसमन्वितो निरुत्साहः श्वसिति, असमर्थश्चेष्टानामुच्चावयानां, नष्टस्मृतिबुद्धि–च्छायो रोगाणामधिष्ठानभूतो न सर्वमायुरवाप्नोति (च –चि –अ १ –पा – २– ३) उक्तं च रक्तपित्तप्रकरणे तस्मिन् प्रमाणातिवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पद्यदेव यकृत्प्लीहप्रभावाणां लोहितवहानां च स्रोतसां लोहिताभिष्यन्दगुरूणि मुखान्या-साद्य प्रतिरुन्ध्यात् तदेव लोहितं दूषयति (च – नि – २।४) अत्र च लोहितवहानि स्रोतांसि लोहिताभिष्यन्दगुरूणि इति यदुच्यते तदेव स्रोतोवैगुण्यं। "प्रवृद्धलोहितस्यन्देन गुरूणि उत्सन्नानि विवृतानि यावत्" (चक्रव्याख्या) तत्स्थले यदा प्रकुपितं पित्तं शरीरमनुसर्पद्यदेव सज्जति तदा रोग उत्पद्यते। एवमेव गुल्मेऽपि कुपितो वायुः रौक्ष्यात् काठिनीभूते महास्रोतोभागे सज्जति तदा गुल्म उत्पद्यते (च– नि– ३।७) एवं प्रमेहे प्रसरमाणः श्लेष्मा यदा बहु बद्धे मेदसि सज्जति तदा प्रमेहो भवति (च – नि – ६।८)। अत्र मेदसो बहुबद्धत्वादेव मेदोवहस्रोतोवैगुण्यम्। कुष्ठेऽपि दोषाणां प्रकोपः, त्वग्रक्तमांसानां शैथिल्यं च पृथक् पृथक् निदानैरुत्पाद्यते। तेषु त्वगादिषु शिथिलेषु दोषाः प्रकुपिताः स्थानमधिगम्य सन्तिष्ठमानाः कुष्ठा-न्याभिनिर्वर्तयन्ति। (च-नि-५।६) एवं साहसजयक्ष्माणि उरःक्षतेव तत्स्थ-स्रोतसः वैगुण्यमुत्पद्यते। "तस्यातिमात्रेण कर्मणोरः क्षण्यते। तस्योरः क्षतमुप-



प्लवते वायुः, स तत्रावस्थितः श्लेष्माणमुरःस्थमुपसंग्रह्य पित्तं च दूषयन् विहरत्यूर्ध्वमधस्तिर्यक् च" (च-नि-६।४) उन्मादेऽपि मनः तद्वहस्रोतांसि च चिन्तादिभिरुपहतेषु यदा प्रकुपिता दोषाः विगुणस्रोतस्यागच्छन्ति तदोन्माद उपजायते (च-नि-७।४) यः कोऽपि दोष अहोरात्रे द्विः वृद्धिमेति, तथा ऋत्वनुसारमपि तत्तदृतुषु वृद्धिमेति। एवं प्रायः सर्वदा यस्य कस्याऽपि दोषस्य वृद्धिर्देहे अस्त्येव। यदात्वाहारविहारादिभिः स्रोतसि विगुणे, दूष्ये च [illegible] दोषः प्रसृतः खे सज्जति। अत एव वातश्लेष्मज्वराविमुक्तानां यदि रसायन-चिकित्सा न सम्यक्कृता तदा कालान्तरे कासः श्वासः राजयक्ष्मा वा यः कोऽपि प्राणवहस्रोतोरोग उदेति। स्त्रीणां च प्रसवानन्तरं यदि सम्यगुपचारो न क्रियते तदा तासां प्रायशः आर्तवहस्रोतोवैगुण्यं नापयाति, अतस्तासां दोषः प्रायशः गर्भाशय विकारानुपजनयाति।

निवृत्तोऽपि पुनर्व्याधिः स्वल्पेनायाति हेतुना।
क्षीणे मार्गीकृते देहे शेषः सूक्ष्म इवानलः॥
तस्मात्तमनुबध्नीयात्प्रयोगेणानपायिना।
सिद्ध्यर्थं प्राक्प्रयुक्तस्य सिद्धस्याप्यौषधस्य तु॥

(च-चि-३०।३२८)

अत्राऽपि देहस्य मार्गीकरणं स्रोतसः वैगुण्येनैव। वैगुण्येऽनपयाति स्वल्पे-नाप्यपचारेण स एव रोगो भवति। दोषसंचयनाशः संशोधनेन भवति। तदा यदि कुत्राऽपि वैगुण्यं वर्तेत तदा पुनः रोगसम्भवोः भवितुमर्हति। अत एव संशोधनानन्तरं रसायनसेवोपदिष्टा यथा च धातूनां प्रकृतिस्थापनद्वारा तद्वह-स्रोतसां च वैगुण्यापगमः स्यात्।

यथाक्रमं यथायोगमत ऊर्ध्वं प्रयोजयेत्।
रसायनानि सिद्धानि वृष्ययोगांश्च कालवित्॥
रोगास्तथा न जायन्ते प्रकृतिस्थेषु धातुषु।
धातवश्चाभिवर्धन्ते जरा मान्द्यमुपैति च। (च. सू. अ. ६)

यदा च दोषैः स्रोतो दूष्यते तदा स्रोतोदुष्टिर्भवति। तदा च दुष्टि-लक्षणान्युत्पद्यन्ते। दुष्टिकारणमेवमुक्तं—

आहारश्चविहारश्च यः स्याद्दोषगुणैः समः।
धातुभिर्विगुणश्चैव स्रोतसां स प्रदूषकः॥ (च–वि–५)

यत्र च स्रोतोदुष्टिलक्षणानि दृश्यन्ते प्रायशः तत्रैव रोगस्थानमिति अनुमन्तव्यम्।

कुरुतः । एव मांसादीनामपि दुष्टौ यथास्वगुणकर्मणामाभिभवो द्रष्टव्यः । तत्र मांसस्योपलेः कर्म, मेदसः स्नेहनम्, अस्थ्नां धारणं, मज्ज्ञः पूरणं, शुक्रस्य गर्भोत्पादश्च श्रेष्ठकर्माणि भवन्ति । ( अ-हृ-सू-११ ) "अवष्टम्भः पुरीषस्य, मूत्रस्य क्लेदवाहनं, स्वेदस्य क्लेदविधृतिः कर्मोक्तं । एतेषां मलानामपि रूपरसगन्धादिषु विकृतिर्भवति ' तथा तेषां कर्मणामभिभवोऽपि भवति ।

सर्वत्र रोगेषु रसः अवश्यं दूष्यं भवति ! तस्य संगं विना रोगः नैवोत्पद्यते । अन्नवहस्रोतोजन्यरोगेषु यदाऽतिभुक्तेन आमाशयावयवस्य परिपीडनं भवति तदाऽवश्यं रससंगो भवति । तदा च रोगः उत्पद्यते उक्तं च—

"... रसः सज्जति यत्र सः ।
तस्मिन् विकारं कुरुते खे वर्षमिव तोयदः " ॥

अलसके नोर्ध्वमधश्च यात्यामः, तत्रचान्त्राणां स्तब्धता, अन्त्रावयवेषु विद्यमानरसवहस्रोतसां आमकृतावरोधेन भवति । गुल्मेऽपि रस एव सजाति आन्त्रावयवेषु । ततश्चान्यत्रान्त्रमार्गेषु रसपोषणाल्पत्वे वातः अन्त्रावयं पिण्डीकृत्य अवस्थानं करोति । एव पित्तगुल्मकफगुल्मेष्वपि तत्तस्थाने रससंचारावरोधी भवत्येव । एवं श्वासरोगेऽपि रस एवं दूष्यं, प्राणवहस्रोतसि प्रायशः फुफ्फुसे रससंगदर्शनात् । रसस्य ( पोषकस्य ) हि प्रधानं कर्म शरीरधातुपोषणं, सर्वेष्वपि रोगेषु यस्य कस्याऽप्यवयवस्य धातोर्वा पोषणाभावो दृश्यते । अतो रसः सर्वत्र सज्जतीति मन्तव्यम् ।

यदा च प्रकुपिता दोषाः प्रसरन्ति तदा आहाररसेन साकमेव संचरन्ति । यदा रक्तवहस्रोतसो वैगुण्येन रसः सज्जति तदा तत्रस्थपोषकरक्तेन सह सम्मूर्च्छति । ततः सम्मूर्च्छनाजनितं द्रव्यमामादि दोषेण दूष्येण च सह यत्र यत्र संचरति तत्र तत्र लक्षणान्युत्पादयति । यदा अन्नवहस्रोतसि सज्जति तदा रसेनैव समूर्च्छति प्रायः । आशयावयवेषु हि रसोऽपि संचरत्येव तेन विना तस्य पोषणाभावात् । यदि दोष आमाशयान्तः प्रविश्य अन्नं दूषयेत् तदा वेदना नैवोद्भवेत् । उक्तं च–

वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः ।
केशलोमनखाग्रान्नमलद्रवगुणैर्विना ॥ (च. शा. १।१३६)

अतः अन्नोत्पन्नामस्य धातुसंसर्गम् विना, नैव रोगोत्पत्तिः । आमो रसः दोषेण साकं आशयावयवस्थितरसवहस्रोतःसु रोगमुत्पादयति । एवं गुल्मशूलाजीर्णादिषु रसो दूष्यमिति मन्तव्यम् ।



विकृतिर्हि धातूनां न वैषम्यादव्यतिरिक्ता ।

विकृतिरस्ति वैषम्यं च नास्तीत्येतादृश्यवस्था नास्त्येव । उक्तं च चक्रेण " रक्तादयोपि तत्तद्दुष्टदोषसंम्बन्धाधीनस्वगुणा वृद्धस्वगुणा वा भवन्ति, ततो गुणह्रानिवृद्धिभ्यां वृद्धिर्ह्रासो दूष्येपिऽतिश्चतः एवेति न प्रकृतिस्थस्य विकारकारित्वमिति पश्यामः " ( च – शा – ६।४ – चक्रः ) विकारो धातुवैषम्यमित्युक्तम् । अतः विकारावस्थायाम् धातुवैषम्यमस्त्येव यदा " यदा ह्यस्मिन् शरीरे धातवो वैषम्यमापद्यन्ते तदा क्लेशं विनाशं वा प्राप्नोति, वैषम्यगमनं हि पुनर्धातूनां वृद्धिर्ह्रासगमनमकात्स्न्येनैव " ( च. शा. ६-४ गंगाधरः ) यदा वृद्धेषु क्षीणेषु वा धातुषु दोषाः स्वलक्षणानि दर्शयन्ति तदा तेषां दुष्टिरित्युच्यते । अतो विकृतो धातुः क्षीणः वृद्धो वेत्यवश्यं वक्तव्यं क्षयवृद्धि विना विकारासम्भवात् ।

## रोगाधिष्ठाने दूष्यवृद्धिरेव

यदा च कुपितो दोषः रसायनीषु संचरन् स्रोतोवैगुण्यात् सज्जाति तदा तत्रस्थिधात्वाग्निमान्द्यं, आमेन स्रोतोरोधश्चावश्यं भवतः । तदा च रोगोत्पत्तिः तत्रैव च रोगाधिष्ठानम् । एवं रोगाधिष्ठाने धात्वग्निमान्द्येन आमधातुवृद्धिः, उक्तं च—

स्वस्थानस्थस्य कायाग्नेरंशा धातुषु संश्रिताः ।
तेषां सादातिदीप्तिभ्यां धातुवृद्धिक्षयोद्भवः ॥

( अ. हृ. सू. ११ )

यथा नद्यां अवरोधेन तत्स्थले वृद्धिः तद्वत् शरीरेऽपि स्रोतोरोधेन तत्रा वृद्धिरेव भवति । तदा यः कोऽप्याहारः स्वीकृतः स रोगाधिष्ठानं गच्छन् सज्जति । ततः सोऽप्यामत्वेन परिणतः तत्र दूष्यं तथा रोगं च वर्धयति । अतोऽन्यत्र शरीरावयवेषु पोषणाल्पत्वात् धातुक्षयो भवति । एतत्सर्वशरीरधातुक्षयाभिप्रायेणैव सुश्रुतेनोक्तम्–

दोषः प्रकुपितो धातून् क्षपयत्यात्मतेजसा ।
इद्धः स्वतेजसा वह्निऽरुखागतमिवोदकं ॥ ( सु. सू. १५-३६ )

अयं धातुर्ह्रासः पूर्वोक्तन्यायेन रोगाधिष्ठानादन्यत्रैवेति मन्तव्यं ।

एवं दोषदूष्यसंमूर्च्छनास्थलेषु वृद्धिरेवा भवति अग्निमान्द्यस्रोतोरोधाभ्यामिति निश्चितम् । यथा ह्यातिसारे उदकवृद्धिर्भवति । तत्र च पुरीषवहस्रोतसि

अम्बुवृद्धिरन्यत्र क्षयः तदा चाम्बु बहिर्गच्छाति तदाऽपि न तत्स्थले क्षयः, किन्तु अन्यस्मात् देहावयवात् अम्बु तत्स्थानमागच्छाति । यदा तादृशागमनं न भवति तदातीसारो निवर्तते । यावदतीसारो वर्तते तावत्तत्र पुरीषवहस्रोतस्यम्बुनो न्हासो न भवति, अन्यत्र शरीरावयवेषुत्ववश्यं न्हासो भवति । अथवातिसरणान्म्रियेत ।

एवं दकोदरेऽ पि उदकं उदरे वृद्धिमेवाप्नोति किन्त्वन्यत्राम्बुक्षयात् तृष्णाताल्वशोषमूत्रक्षयादयो भवन्ति ।

"......रक्तं विसर्पप्लीहविद्रधीन् ।
कुष्ठवातास्रपित्तास्रगुल्मोपकुशकामलाः ॥
व्यंगाग्निनाशसम्मोहरक्तत्वङ्नेत्रमूत्रताः । ( अ - हृ - सू - १२ )

एते सर्वेऽपि रोगा रक्तवृद्धिमवा इत्युक्तं । तत्र च कुष्ठे रक्तमण्डलादिषु रक्तवर्णदर्शनात् एकदेशे रक्तवृद्धिर्वाच्या । एवं विसर्पजोत्सेधे रक्तलक्षणदर्शनात् रक्तवृद्धिर्वाच्या । एवं विद्रधिवातास्रादिष्वपि । यकृत्प्लीहानौ च रक्तस्थानौ, तयोर्वृध्या रक्तवृद्धिः तत्स्थाने इति मन्तव्यम् । एवमन्येष्वपि रक्तवृद्धिजरोगेषु एकदेशे रक्तवृद्धिर्दृश्यते, अन्यत्र शरीरावयवेषु रक्तक्षयलक्षणान्येव भवेयुः । गण्डार्बुदग्रन्थ्यादयोहि मांसवृद्धिभवारोगा उक्ताः । अत्राऽपि एकदेशे मांसवृऽद्धिर्दृश्यते । यादि दोषदूष्यसम्मूर्च्छनास्थलेऽपि दोषतेजसा धातुक्षपणं स्यात्तदा क्रमेण रोगवृद्धौ गण्डादीनां नाशः स्यात् । तत्तु प्रत्यक्षऽविरुद्धम् । गण्डमालायां एकस्य नाशेऽप्यन्यस्य वृद्धिर्भवाति । उक्तं च " नश्यन्त्यन्ये भवन्त्यन्ये दीर्घकालानुबन्धिनः " । ( अ - हृ · २९ । २५ ) एवमर्बुदे ऽपि वाच्यम् । तत्र हि शस्त्रक्रिया अर्बुदे कर्तितेऽपिपुनरन्यत्र तत्रैव वा वृद्धिर्भवतीत्यनुभूयते । तस्मात् दोषतेजसा धातुक्षपणं यत् सुश्रुतेनोक्तं तत् रोग स्थलादन्यत्रैव भवतीति मन्तव्यम् । प्रमेहो हि मेदोवृद्धिप्रभव प्रायशः प्रमेहिणः स्थूला एव दृश्यते । कृशप्रमेहिषु मेदोवहस्रोतोमूलारम्भकबोजभागदृष्टया वृक्कवपावहनयोरेव मेदोवृद्धिरित्यूह्यीयम् ।

" तत्र सहजो मातृपितृ – बीजदोषकृतः ... ... तयोः पूर्वेणोपदुक्तः ( सहजप्रमेही ) कृशः रूक्षोऽल्पाशी पिपासुर्भृशं–परिसरणशीलश्च भवति " । ( सु – चि · ११।३ ) एवमास्थिरोगेष्वपि अध्यस्थयादिषु एकदेशे आस्थिवृद्धिः स्पष्टा । फक्करोगेऽपि यत्रचास्थनांनां मृदुत्वं दृश्यते तत्राऽपि अस्थनामग्रेषु वृद्धिरेव दृश्यते । मज्जवृद्धौ " पर्वसु स्थूलमूलानि कुर्यात्कृच्छ्राण्यरूंषि च " ( अ – हृ–सू– १२।१२ ) अत्राऽप्येकदेशे एव मज्जवृद्धिः । एवं शुक्राश्मर्यामेकदेशे शुक्रवृद्धिः । क्लैब्येऽपि यत्र स्रोतोरोधः तत्रैव वृद्धिरन्यत्र क्षयः ।



ननु राजयक्ष्मणि सत्यपि स्रोतोरोधे सत्यपि धात्वग्निमान्द्यै न धातुवृद्धिः किन्तु धातुक्षय एव । तथा चोक्तम् ।

" स्रोतसां सान्निरोधाच्च रक्तादीनां च संक्षयात् ।
धातूष्मणां चापचयात् राजयक्ष्मा प्रवर्तते ॥
तास्मिन् काले पचत्यग्निर्यदन्नं कोष्ठसंश्रितं ।
मलोभवति तत्प्रायः कल्पते किंचिदोजसे । (च. चि. ८-४०-४१)

तस्मात् रोगे संम्मूर्च्छनास्थले सर्वथा वृद्धिरेव भवाति यदुक्तं तदयुक्तं इति चेदत्रोच्यते । रसरक्तयोरेकदेशवृद्धिः राजयक्ष्मण्युक्ता

" रसः स्रोतस्सुवृद्धेषु स्वस्थानस्थो विदह्यते " । (विवर्धते)
सऊर्ध्वं कासवेगेन बहुरूपः प्रवर्तते ( च. चि. ८)

पिच्छिलम् बहलं विस्रं हारितं श्वेतपोतकं ।
कासमानो रसं यक्ष्मो निष्ठीवाति कफानुगम् ॥ (च. चि. ८-५१)

अत्र च रसस्य स्रोतोऽवरोधात स्वस्थाने वृद्धिः ततो बहिर्गमनं चोक्तं रक्तष्ठीवनरक्तच्छर्दनाभ्यां रक्तस्यैकदेशवृद्धिः ततस्तस्य विमार्गगमनं च मन्तव्यम् । उक्तं च—

अभिसन्ने शरीरे तु याक्ष्मणो विषमाशनात् ।
कण्ठात्प्रवर्तते रक्तं श्लेष्माचोत्क्लिष्टसंचितः ॥
रक्तं विबद्ध-मार्गत्वान्मांसादीन्नानुपद्यते ।
आमाशयस्थमुत्क्लिष्टं बहुत्वात्कण्ठमेति च । (च. चि. ८-५७-५८)

अत्र रक्तस्याप्येकदेशवृद्धिः स्पष्टतयोक्ता । एवं राजयक्ष्मणि सार्वदेहिनधातुक्षयेऽपि एकदेशवृद्धिराविरुद्धा ।

एवं चैकास्मिन्नेव रुग्णे दूष्यस्य क्षयवृद्धी युगपत् भवतुमर्हतः । रोगाधिष्ठाने तु अल्पांशेन महदंशेनवा वृद्धिऽरेव भावितुमर्हति ।

## रोगाधिष्ठानज्ञानप्रयोजनम्

दोषदूष्यावाभ्यन्तरकारणे रोगस्य । तत्र दूष्यं स्रोतश्च अधिष्ठाने रोगस्य । आशयाअपि धातुनिर्मिता एव, अतः आशया अपि दूष्ये स्रोतासि चान्तर्भवन्ति । अधिष्ठानज्ञानं च चिकित्सायामत्युपयोगकारिभवाति । अत एवोक्तं " तस्माद्विकारप्रकृतीरीधष्ठानान्तराणि च " समुत्थानाविशेषांश्च बुद्ध्वा कर्म समाचरेत् । ( च - सू - १८।४६ ) द्रव्याणि हि प्रतिनियतशक्तिकानि भवन्ति ।

कानिचन द्रव्याणि क्वचिदेवाधिष्ठाने कार्मुकाणि भवन्ति । अग्निमांद्यं, आमः, स्रोतोरोधश्च यत्राधिष्ठानं रोगस्य तत्रैव भवितुमर्हन्ति । तदाधिष्ठानगताग्नेः दीपनं द्रव्यं विशिष्टं भवति, तथा तत्रस्थामस्य पाचनं द्रव्यं विशिष्टं भवति । तथा तद्गतस्रोतोरोधानिवारकमपि द्रव्यं विशिष्टं भवति । अतो व्याधिप्रत्यनीकचिकित्साया निश्चये अधिष्ठानज्ञानमतिप्रयोजनकारि भवति ।

रोगश्च क्रमेण धात्वन्तरमाक्रामति ततश्च लक्षणविशेषः, अवस्थान्तरं चोत्पद्यते । यथा ज्वरे रसरक्तादिषु रोगस्य क्रमेणावास्थितिर्भवति । तत्र तत्तद्धातुविकृतिं लक्षणेभ्योऽवगम्य चिकित्सा पथ्यापथ्यादिकं च विधेयम् । एवं चिकित्सायां दूष्यज्ञानं महत्त्वपूर्णं भवति ।

## दोषाः

"सर्वेषां च व्याधीनां वातपित्तश्लेष्माण एव मूलं, तल्लिंगत्वाद्दृष्टफलत्वादागमाच्च" ( सु - सू - २४ ) आगन्तावपि हि वातादिलिंगं शरीरक्षोभादवश्यं भवति । ( चक्रः ) अतोऽत्र वातादयः एव संक्षेपेण विचार्यन्ते ।

धातु - मलान् ये दूषयितुं समर्थाः ते दोषाः ।
वायुः पित्तं कफश्चोक्तो शारीरो दोषसंग्रहः ।
मानसः पुनरुद्दिष्टो रजश्च तम एव च । ( च - सू १-५७ )

तेषां यद्यपि देहधारणात् धातुसंज्ञा तथाऽपि दूषणस्वभावात् दोषसंज्ञैव मुख्या । "ते च देह सम्भवहेतवः (सु-सू-२१-३) यथा घटनिर्माणे अनिलानलोदकानां हेतुत्वं तद्वत् देहोत्पत्तावपि दोषाणां हेतुत्वम् । "शुक्रशोणिते पांचभौतिकाहारश्च शरीरस्य समवायिकारणानि । अविकृता वातदयः शुक्रार्तवादिसहकारितया देहजनका अभिप्रेताः । ( डल्हणः ) तत्र शरीरस्योत्पत्तिकाले प्रलयकाले च वायुना विक्षेपकर्म (चलनकर्म) पित्तेन आदानकर्म (अग्निकर्म) श्लेष्मणा विसर्गकर्म ( अम्बुकर्म ) च क्रियन्ते । शरीरे अन्तर्बहिश्च ये स्पन्दनादयश्चेष्टाविशेषाः तेषां कारणत्वेन एवं द्रव्यमनुमीयते, तच्च नाडीतंत्रं वा भवेत् ( *nervous system* ) स्रावविशेषो वा भवेत् ( *hormone* ) अन्यद्वा यत्किंचित् बाह्यान्तश्चेष्टाहेतुकम् । यथा बाह्यजगति वृक्षादिकम्पनहेतुकत्वं वायोस्तद्वत् शरीरान्तरपि । तस्य न शक्तिरूपता, द्रव्यत्वेन शास्त्रे उक्तत्वात्, गुणकर्मवत्त्वाच्च । गुणकर्मसमवायिकारणं हि द्रव्यं । यच्च वचनभ्राजनरागादितैजसं कर्म देहे दृश्यते तस्य समवायिकारणत्वेनैकम् द्रव्यं सर्वशरीरगं निश्चीयते । तच्च पित्तमेव । स्रावविशेषो वा भवतु ऊष्मा वा भवतु सर्वमपि पित्तमेव । यश्चाम्बुकर्मणानुगृह्णाति क्लेदनसंश्लेषणादि पृथिव्यम्भसोः कर्म करोति, धातूनामुपचयं च करोति स श्लेष्मा । तथाचोक्तं—



विसर्गादानविक्षेपैः सोमसूर्यानिला तथा ।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा ॥ ( सु-सू-२१,८ )

तत्र वायुः प्रायशः कर्मानुमेयः अन्यत्र निश्वासोच्छ्वासयोः आध्मानान्त्रकूजानादौ वा । पित्तं प्रायशः प्रत्यक्षोपलभ्यं पाचकं हि वमनादिषु उदरपाटनादिना वा दृश्यम् । रक्ते रंजकपित्तं ताम्रवर्णं प्रत्यक्षीकर्तुं शक्यते । भ्राजकं त्वचः भ्राजनानुमेयम् । आलोचकं साधकं च कर्मानुमेयम् । श्लेष्मा बोधकः, क्लेदकः, श्लेषकः, तर्पकश्च प्रत्यक्षीकर्तुं शक्यंते । अवलम्बकस्त्वनुमेयः ।

## दोषाणामुत्पत्तिः

शुक्रशोणितसंयोगकाले तदनन्तरं च तत्तत्स्रोतःसु सूक्ष्मरूपेण स्थिताः वातपित्तश्लेष्माणो बीजभूताः येष्ववरोहन्ति वैकृता वातपित्तश्लेष्माणः । तथा चोक्तं संग्रहे—

"तथा च केचिदाहुः - द्विविधा वातादयः प्रकृता वैकृताश्च, तत्र प्राकृता सप्तविधायाः प्रकृतेर्हेतुभूताः शरीरैकजन्मानःते शरीरधारणाद्धातुसंज्ञाः । दोषाख्यानां विकृतानां बीजूभताः मुमूर्षोः स्वरूपाच्चलन्ति । सर्वेष्वपि देहे सन्निहितेषु प्रकृतावुल्बणेन व्यपदेशः । वैकृतास्तु गर्भादिभिनिःसृतस्याहारस्य मलाः सम्भवन्ति, प्राकृतेष्ववरोहन्ति" । ( अ-सं-शा-८,११ ) .........तथाऽपि ते सम्भूतास्तत्रैव प्राकृतेष्वेव वातादिष्ववरोहन्ति सजातीयत्वादेकोभवन्तीत्यर्थः । (इन्दुः) । जन्मप्रभृति किट्टरूपेणैव तेषामुत्पत्तिः। बीजन्तु प्राकृतधातुः । तथा चोक्तं तत्राहारप्रसादाख्यो रसः किट्टं च मलाख्यमभिनिर्वर्तते । किट्टनात् स्वेदमूत्रपुरीषवातपित्तश्लेष्माणः कर्णाक्षिनासिकास्यलोमकूपप्रजननमलाः केशश्मश्रुलोमनखादयश्चावयवाः । ( च-सू-२८।४ ) तत्रान्नमलो वायुः । उक्तं च—

"वायुः पुनरग्नेराहारस्य च बह्वल्पतया तस्मात्तस्मान्मूर्च्छनाविशेषादमूर्तः शद्बवानीषच्छब्दः प्रचुरोऽल्पो वा पंचात्मा कोष्ठे प्रादुर्भवति । एवं कृत्स्नान्नमया एव देहे सर्वे भावाः। ( अ-सं-शा-६ )

वायौ-स्त्वयं विशेषः सः शरीरे बाह्यजगति चैकरूपो वर्तते । अत एवोक्तम् "वायोरात्मैवात्मा" । ( सु-सू-४२।५ ) तस्मात् वायुः बाह्यजगतः प्राणवहस्रोतोद्वारा वाय्वाग्निना पच्यमानः अन्तर्याति ततो बहिरपिगच्छाति ।

शिरा धमन्यो नाभिस्थाः सर्वा व्याप्य-स्थितास्तनुं ।
पुष्णान्ति चानिशं वायोः संयोगात्सर्वधातुभिः ॥ ( शारंगधरः )

" प्राणवहानाामिति प्राणसंज्ञकवातवहानां एतच्च प्राणाख्याविशिष्टस्य वायोर्विशिष्टं स्रोतः " (च-वि-५।८-चक्रः) पित्तकफौ तु न स्वात्मरूपेण बाह्यजगति वर्तते । अतस्तयोरुत्पत्तिः न साक्षाद्भवति किन्तु पांचभौतिकादाहारादेव । तत्राऽपि रसस्य मलः श्लेष्मा रक्तस्य तु पित्तं । अनयोश्चान्य उत्पादनक्रमः नैवोक्तः शास्त्रे । केचिच्चात्र—

मधुराद्यात्कफो भावात्फेनभूत उदीर्यते ।
आशयाच्च्यवमानस्य पित्तमच्छमुदीर्यते ॥ च-चि-१५

इत्येतौ धातुभूतसूक्ष्मकफपित्तयोरुत्पत्तिबोधकाविति वदन्ति तत्तु न सम्यक्। अत्र हि केवलं उदीरणमात्रमुक्तम्, न तूत्पत्तिः । प्रत्यक्षतोऽपि तत्रोदीरणमेव भवतीति सिद्धम् । अन्ये त्वेतत् सुश्रुत वचनमुदाहरन्ति——

माधुर्यात् पिच्छिलत्वाच्चऽप्रक्लेदित्वात्तथैव च ।
आमाशये सम्भवति श्लेष्मा मधुरशीतलः ॥ सु-सू-२१।१३

तत्राप्युदीरणमेवार्थः। तं व्याख्यानयति डल्हणः-सम्भवति इति प्रकुप्यति, न पुनरभूतप्रादुर्भावेण, कफस्य रसधातुतः एवोत्पन्नत्वात् ।

तथा दोषाः द्विविधाः प्रसादभूता मलभूताश्च—"शरीरगुणाः पुनर्द्विविधाः संग्रहेण मलभूताः प्रसादभूताश्च । तत्र मलभूतास्ते ये शरीरस्याबाधकराः स्युः । तद्यथा--शरीरच्छिद्रेषूपदेहाः पृथग्जन्मानो बहिर्मुखाः परिपक्वाश्च धातवः प्रकुपिताश्च वातपित्तश्लेष्माणः येचान्येऽपि केचिच्छरीरे तिष्ठन्तो भावाः शरीरस्योपघातायोपपद्यन्ते, सर्वास्तान् मलेसंचक्ष्महे, इतरांस्तु प्रसादे । ( च. शा. ६-१७ ) अतः अकुपिता वातपित्तश्लेष्माणः प्रसादा इत्युच्यन्ते, कुपितास्तु मलसंज्ञां लभन्ते। तेषां तु मलप्रसादाख्यानां धातूनां स्रोतांस्यनमुखाानि । तानि यथाविभागेन यथास्वं धातूनापूरयन्ति । ( च. सू. २८-५ ) एतच्च चरकवचनं विचार्यताम्—

" ते सर्वं एव धातवो मलाख्याः प्रसादाख्याश्च रसमठाभ्यां पुष्यन्तः स्वं मानमनुवर्तन्ते यथावयः शरीरं । एवं रसमलौ स्वप्रमाणावस्थितावाश्रयस्य समधातोर्धातुसाम्यनुवर्तयतः । ( च. सू. २८-४ ) अनेन वाक्येन किंचित्किट्टरूपं पोष्ये, अन्यच्चपोषकमित्युच्यते । एवमाहाररसरक्तानां किट्टरूपत्वेनोत्पन्नाः वातपित्तश्लेष्माणः प्रथमं स्वाशयमेव यान्ति, ततश्च अन्येषां दोषस्थानानामनुग्रहम् कुर्वन्ति । तथाचोक्तं—

" तत्रस्थमेवात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्मणानुग्रहं करोति, तस्मिन् पित्ते पाचकोग्निरिति संज्ञा " ( सु. सू. २१-१० )



" स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्मणानुग्रहं करोति । " ( सु. सू. २१-१४ ) एवं पक्वाशयस्थवायुनाऽपि सर्ववायुपोषणं भवितुमर्हति यस्मादत्रावाजिते वाते सर्ववातविकारावजयो भवति। अयं च किट्टरूपः सर्वेषां पोषकः ।

एवं किट्टरूपेणोत्पन्नः कफः पित्तं वायुश्च प्रथमं स्वाशयं यान्ति । तत्र च क्लेदकपाचकापानसंज्ञां लभन्ते । तत्रस्था एव शेषाणां कफपित्तवातानाम् अनुग्रहम् कुर्वन्ति । वमनविरेचनबस्तिभिरेतेषां निर्हरणं दोषचिकित्सायां लाभप्रदमिति प्रत्यहमनुभूयते ।

## संचयादिदोषावस्थाः

संचयः-तत्तद्दोषवृद्धिकारणैः कालार्थकर्मभिः दोषाणां वृद्धिर्भवति । वृद्धिश्च द्विधा चयकोपभेदेन । ( अ. सं. सू. २० )

चयो वृद्धिः स्वधाम्न्येव प्रद्वेषो वृद्धिहेतुषु ।
विपरीतगुणेच्छा च...............(अ. हृ. सू. १२-२२)

एतानि खलु दोषस्थानानि एषु संचीयन्ते दोषाः ( सु. सू. २१-१८ ) यावानेवाशयः संचारवता दोषेण व्याप्तस्तावानेव निःसंचारेण व्याप्यते स च संहतिरूपत्वात् संचयाख्यः । यदा सर्व एवाशयो व्याप्यते तदा वृद्धिहेतुषु समानगुणेषु प्रद्वेष उत्पद्यते (हेमाद्रिः) यदा तुल्यकालं पुरुषस्य वातसमानगुणेषु तद्वृद्धिहेतुषु प्रद्वेषे जायते । वातगुणप्रतिपक्षेषु तत्क्षपणहेतुषु चाभिलाषः तदा सम्यक् निश्चीयते वातस्योपचितिः इति द्वयमप्येतदुक्तम् " ( अरुणदत्तः )

प्रकोपः-स्वस्वप्रकोपणकारणैः बलवद्विग्रहादिभिः प्रसरोन्मुखत्वमेव प्रकोपः ।

प्रसरः—कोपान्तरं प्रसरो भवति दोषाणाम् । तेषामेभिरातंकविशेषैः प्रकुपितानां किण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरोभवति । तेषां वायुर्गतिमत्वात् प्रसरणहेतुः सत्यप्यचैतन्ये । सहि रजोभूयिष्ठः रजश्च प्रवर्तकं सर्वभावानां । यथा महानुदकसंचयोऽति वृद्धः सेतुमवदार्यापरेणोदकेन व्यामिश्रः सर्वतः प्रधावति, एवं दोषाः कदाचिदेकशो द्विशः समस्ता शोणितसहिता वा अनेकधा प्रसरन्ति । ( सु. सू. २१-२८ )

तेषां प्रसरश्च सिरामार्गेण—

प्रतिरोगमिति क्रुद्धा रोगाधिष्ठानगामिनीः ।
रसायनोः प्रपद्याशु दोषा देहे विकुर्वते ॥ (अ. हृ. नि.१)

...४

तत्र प्रायशः स्वाः स्वाः सिरा गच्छन्ति तथाऽपि तत्र नियमो नास्ति सर्वत्र सर्वे-दोषा गच्छन्ति ।

प्रदुष्टानां हि दोषाणां मूर्च्छितानां प्रधावताम् ।
ध्रुवमुन्मार्गगमनमतः सर्ववहाः सिराः ॥ ( सु. शा.)

## संचयप्रकोपप्रसराणां लक्षणसंग्रहः

### (१) संचये लक्षणानि

स्तब्धपूर्णकोष्ठता–वातः
पीतावभासता–पित्तं–रूपतः
मन्दोष्मता–पित्तं–उष्णगुणतः
गौरवं–श्लेष्मा–गुरुगुणतः
आलस्यं–श्लेष्मा–मन्दगुणतः
चयकारणाविद्वेषः –यथास्वदोषस्य

### (२) प्रकोपे लक्षणानि

कोष्ठतोदः –वातः –कर्मतः
कोष्ठसंचरणम्–वातः –शब्दतः
अम्लीका–पित्तं–अम्लरसतः
पिपासा–पित्तं–उष्णगुणतः
परिदाहः – पित्तं–उष्णगुणतः
अन्नद्वेषः–श्लेष्मा–कर्मतः
हृदयोत्क्लेदः श्लेष्मा–कर्मतः

### (३) प्रसर लक्षणानि

विमार्गगमनं–वातः –कर्मतः
आटोपः –वातः –शब्दतः
ओषः –पित्तं –उष्णगुणतः
चोषः –पित्तं-उष्णगुणतः
परिदाहः –पित्तं–उष्णगुणतः
धूमायनम्–पित्तं– उष्णगुणतः
अरोचकः श्लेष्मा–कर्मतः
अंगसादः –श्लेष्मा –मन्दगुणतः
अविपाकः –श्लेष्मा – मन्दगुणतः
छर्दिः – श्लेष्मा–रूपतः

एतानि च दोषलक्षणानि न व्याधिलक्षणानीत्युक्तं गयादासेन (सु. नि.१) दोषाणामेतदवस्थात्रितयं सर्वेषु रोगेष्वेकविधमेव भवति । चतुर्थावस्थायां स्थान-संश्रये यानि लक्षणानि भवन्ति तान्यप्यव्यक्तान्येवेत्युक्तम्, ततोऽपि पूर्वतनेष्वेतेष्व-वस्थाविशेषेषु उत्पद्यमानानां लक्षणानानां सुतरामव्यक्तत्वमेव । अतस्तेषां ज्ञानं रुग्णेन वैद्येन वा अतिदुष्करम् । एतास्ववस्थासु दोषवैषम्यस्यास्तित्वेऽपि तस्या-व्यक्तत्वात्, तज्जन्यदुःखस्याप्यव्यक्तत्वात् न रोगसंज्ञा । स्थानसंश्रयानन्तरमेव रोगारम्भ उक्तः शास्त्रेषु । दोषाणां चयप्रकोपप्रशमाः प्रतिऋतु, प्रत्यहं च भवति

चयप्रकोपप्रशमाः वायोर्ग्रीष्मादिषु त्रिषु ।
वर्षादिषु तु पित्तस्य श्लेष्मणः शिशिरादिषु ॥ (अ. हृ. सू. १२-२४)



वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात् (अ. हृ. सू. १)
यदा च स्थानवैगुण्येन संगः तदैव रोगोत्पत्तिः ।

## स्थानसंश्रयः

एवं प्रकुपितास्तांस्तान्, शरीरप्रदेशानागम्य तांस्तान्व्याधीन् जनयन्ति । तेषामेवमभिसंन्निविष्टानां पूर्वरूपप्रादुर्भावः ( सु-सू - २१ । ३२) पूर्वरूपाणि च प्रतिरोगंभिन्नानि भवन्ति । यदा प्रथमम् स्थानिनमभिभूय अन्यस्थानव्याप्तिस्तदा स्वेषां लिंगानां रौक्ष्यादीनादर्शन, स समन्तादन्यस्थानाश्रयणात् स्थानसंश्रयाख्यः ( हेमाद्रिः ) ( अ - हृ - सू - १२।२३ ) अत्र च हेमाद्रिणा अन्यस्थान एव स्थानसंश्रयः इत्युक्तम् तथा स्थानिदोषश्चाभिभूयत इत्युक्तम् । स्थानिक दोष-विचारश्चाग्रे करिष्यते । यदा च स्थानिको दोषः आगन्तुकेन दोषेणाभिभूयते तदा स्थानिकदोषे तथा तत्समीपस्थान्येषु दोषेषु दूष्ये च कश्चित् संक्षोभः उत्पद्यते तदा च कानिचन लिंगान्युत्पद्यन्ते । शरीरे सर्वत्रापि व्यापिनां त्रयणामपि दोषाणामुपस्थितिरस्ति खलु । अत एव पूर्वरूपे रोगारम्भकदोषाऽकृतानामपि लिंगानामुपलब्धिः । तान्येव लिंगानि स्थानसंश्रयकृतानि पूर्वरूपाणीत्युच्यन्ते । क्वचिदेतेषां व्यक्तवस्थायामनुवृत्तिः, क्वचिच्च नानुवृत्तिरिति पूर्वमेव पूर्वरूप प्रकरणे प्रतिपादितम् ।

## व्यक्तिः

शोफार्बुदग्रन्थिविद्रधिविसर्पप्रभृतीनां प्रव्यक्तलक्षणता, ज्वरातीसार प्रभृतीनांच (सु - सू - २१ )। प्रव्यक्तलक्षणताच व्याधिजातिलक्षणकथनं, तद्यथा शोफार्बुदादीनां त्वङ्मांसस्थानस्य दोषस्य संघातता तथा संतापलक्षणो ज्वरः सरणलक्षणोऽतीसारः । पूरणलक्षणमुदरमिति । (डल्हणः) प्रव्यक्तलक्षणैर्हि व्याधि-रुत्पन्नो व्यज्यते, साच व्याधिव्यक्तिर्व्याध्यारम्भकदोषलिंगवतो तथा प्रातिस्विक व्याधिलिंगवती च । (चक्रः) । अत्र च सामान्यलक्षणानां व्यक्तिः ।

## भेदः

उर्ध्वमेतेषामवदीर्णानां व्रणभावमापन्नानां षष्ठः क्रियाकालः ज्वरातीसार-प्रभृतीनांच दीर्घकालानुबन्धः ( सु - सू - २१) वातादिलक्षणभेदादभिन्नत्वं भेदः (डल्हणः) । शोफादिषु यद्यपि अवदीर्णत्वं भेद उच्यते तथाऽपि ज्वरातीसा-रादिषु वातादिभेदभिन्नत्वं भेदः इति दिक् ।

## स्थानिकागन्तुदोषविचारः

विभिन्नस्थानेषु संश्रितेन दोषेण विभिन्ना रोगा उत्पाद्यन्ते । " यद्यपि ते यदोदरसान्निवेशं कुर्वन्ति गुल्मविद्रध्युदराग्निसंगानाहविसूचिकातीसारप्रभृतीजन-

यन्तीत्युक्तम् " ( सु- सू -२१।३२ ) तथाऽपि तेषां रोगाणां प्रत्येकस्य उदरे भिन्न स्थानमिति मन्तव्यम् । उदरसन्निवेशे साधारणेऽपि विद्रध्यादिकार्यभेदात् स्थानसंश्रयभेदः सूक्ष्मोज्ञेयः, न ह्येकस्मात् स्थानसंश्रयात् एकजातीयदोषकृताद्भिन्ना रोगा भवितुमर्हन्ति, एवमन्यत्राऽपि व्याख्येयम् । संश्रयस्थसंशब्दस्य गच्छतो मार्गसम्बन्धमात्रस्य व्याधिहेतोर्निरासः प्रयोजनम् ( चक्रः )

दोषाः खलु सर्वशरीरव्यापिनः ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः (अ–हृ – सू– १) । यद्यपि नाभिप्रदेशः पित्तस्य स्थानं तथाऽपि तत्समीपे वातकफावपिस्तः । आमाशये हि क्लेदकः कफः, पाचकं पित्तं, समानो वायुश्च सन्ति । एवं पक्वाशयेऽपि अपानो वायुः तदवयवस्थधातुषु तत्तत्पाचकांशाः तथा श्लेषकः श्लेष्मा च वर्तन्ते । तथा तत्तत्स्थानेषु रसादयः नैका धातवोऽपि वर्तन्ते । संचयप्रकोपप्रसरानन्तरं दोषः यदा स्थानसंश्रयं करोति तत् स्थाने यः कोऽपि दोषः अवश्यं भवति । स च स्थानिकोदोषः इति हेमाद्रिणा निर्दिष्टः । तं स्थानिनं संचयादिक्रमेणागतः आगन्तुर्दोषः यद्यपि अभिभवतीत्युक्तं तथाऽपि तस्मिन् स्थानिके दोषे काचन प्रतिक्रिया विक्षोभोवाऽवश्यं भवति, तेन च स्थानिदोषवैषम्यं भवति । आगन्तुर्दोषः स्थानिनं स्थानादपकर्षेत्, तत्रैव सम्मूर्च्छ्य वेदनाविशेषान्वोत्पादयेत् ।

प्रत्येकस्मिन्नपि रोगे स्थानस्य सूक्ष्मो भेदः वर्तत इति पूर्वमेवोक्तम् । प्रत्येकस्मिन् स्थानेऽपि विशिष्टो दोषः आगन्तुदोषेण प्रभावितो भवति । अतः एव प्रत्येकस्मिन्नपि रोगे विशिष्टः स्थानिको दोषः । एवं प्रत्येकस्मिन् रोगे यद्यप्यागन्तुदोषा विभिन्ना स्युस्तथाऽपि स्थानिकदोषः समान एव स्थानैकत्वात् ।

यथा वातज्वरे संचयादिक्रमेणागतो दोषः वातः, सचामाशयमनुप्रविश्य पाक्तिस्थानात् नर्हि बहिर्निरस्यति, स च पाचकपित्तोष्मा एव स्थानिको दोषः । अष्टस्वापिज्वरेषु पित्तमस्त्येव । उक्तं च " ऊष्मा पित्तादृते नास्ति ज्वरोनास्त्युष्मणा विना " । ( अ – हृ – चि – १।१६ )

अतः वातज्वरेऽपि पित्तमास्ति न तस्य वातपित्तज्वरमिति संज्ञा, वातपित्तज्वरस्य पृथकत्वेन पठितत्वात् । यदि ज्वरसामान्यस्य कारणत्वेन पित्तं दृष्ट्वा पित्तमपि वातसमकक्षत्वेन दृश्यते तदा एकदोषजो ज्वर एव न स्यात् । एतादृश एव प्रश्नः रक्तपित्त प्रकरणे उद्भावितः चक्रपाणिना-"ननु पित्तमेव रक्तपित्तमित्युक्तम् तत् कथं श्लेष्मिकं भवति ? उच्यते । सामान्यसम्प्राप्तौ पित्तमेव रक्तपित्तनिर्वर्तकम्, यथा सर्वगुल्मेषु वायुः, तथा सर्वज्वरेषु पित्तमारम्भकं, तदेव यदोल्बणेन कफेन स्वलक्षणकारिणा युक्तम् रक्तपित्तकरं भवति, तदा सामान्यसंप्राप्तिसम्प्राप्तम् पित्तमुत्सृज्य श्लेष्मणैव सान्द्रत्वादिस्वलक्षणकारिणा व्यपदिश्यते श्लेष्मिकं



रक्तपित्तमिति यथा श्लैष्मिके गुल्मे सामान्यसम्प्राप्त्यागतं वातं परित्यज्य श्लेष्मणैव व्यपदेशो भवति, तथा वा कफज्वरे, सर्वज्वरानपायिकारणमनादृत्य विशेषलक्षणकारिणा श्लेष्मैणव व्यपदेशो भवति, एवं वातिकेऽपि रक्तपित्ते व्याख्येयम् । यत्तु कफवातविरहितेन केवलेनैव पित्तेन बलवता जनितं रक्तपित्तं पैतिकरक्तपित्तलक्षणं भवति तत् पैतिकं रक्तपित्तमित्युच्यते ( च. चि. ४,१२-चक्रः )। "पौत्तिकं रक्तपित्तेऽत्युल्बणं पित्तं भवति इत्यत्र मतान्तरमुपन्यस्यति चक्रः "अन्येतु प्रदेशान्तरचितेन पित्तेन यदोत्तरकालं रक्तपित्तस्य सम्बन्धो भवति तदेव पौत्तिकं रक्तपित्तं भवति। द्वितीयं मतमेव समीचीनम् प्रतिभाति । यतः तस्मिन्नेवस्थाने पित्तस्योल्बणानुल्बणत्वं कथं संजातम् ? उल्बणेनैव हि रक्तपित्तमुत्पादितम्। पुनस्तस्योल्बणत्वं कथं भवति ? अन्यपित्तस्थाने संचयादिक्रमेणागतपित्तेनैव पुनः तस्योल्बणत्वं कर्तव्यम् । अत्र च यत् संचयादिक्रमेणागतंपित्तं तदेव आगन्तुर्दोष इत्युच्यते, रोगस्थानापेक्षया तस्यागन्तुत्वात् ।

अयमेव प्रश्नः मधुकोशकारेण विजयरक्षितेनाऽपि गुल्मप्रकरणे उद्भावितः। सर्वेगुल्मेषु वातकारणत्वं ज्ञेयम्, न चैतावता नानात्मजत्वप्रसंगः, वातस्यानुबन्धरूपत्वात् ज्वरे पित्तवत् । ननु वाताऽव्यभिचारात् द्विदोषजस्त्रिदोषजो वा गुल्मः स्यान्न केवलं कफजः पित्तजो वेति, ततश्च पंचधेति विरोधः। नैतत्, अनुबन्धरूपेण वातव्यपदेशो न त्वनुबन्धरूपेणेति । ( मा. नि. २८–३– मधुकोशः ।

एवं रोगस्य प्रधानलक्षणारम्भकत्वात् आरम्भक इति चक्रेण निर्दिष्टः आगन्तुदोषापेक्षयास्यप्रधानत्वात् अनुबन्धः इति विजयरक्षितेन निर्दिष्टः, रोगस्थाने विद्यमानत्वात् स्थानिक इति निर्दिष्टः हेमाद्रिणा । तत्र स्थानिकसंज्ञा संहितास्वपि सूचिता यथा " आगन्तुम् शमयेद्दोषं स्थानिनं प्रतिकृत्य वा " ( अ - हृ - सू-१३-२१ ) अत्र संचयादिक्रमप्राप्तः आगन्तुः स्थानस्थः स्थानो, गुल्पप्रकरणे ययोरनुबन्ध्यानुबन्धसंज्ञा दत्ता मधुकोशकारेण तयोरेव आगन्तुस्थानिकसंज्ञा निर्दिष्टा भेलसंहिताम् ।

आगन्तुर्दूषयत्यत्र धातून् स्थानस्य उल्बणम् ।

चिकित्सितंतु स्थानस्य सहितत्र बलाधिकः ।। ( भेलसंहितागुल्मचिकित्सा ) अत्र स्थानस्येति स्थानिकदोषस्येत्यर्थः । सुश्रुतेऽप्युक्तम् – " तत्र वायोः पित्तस्थानगतस्य पित्तवत् प्रतीकारः पित्तस्य च कफस्थानगतस्य कफवत्, कफस्य च वातस्थानगतस्य वातवत् एष क्रियाविभागः (सु. सू. २१-३१) अत्रार्थे चरकः—" दोषस्थानगतं दोषं स्थानिवत् समुपाचरेत (चक्रः) (च. चि. अ. २३ ६४ ) एतच्च बलवत्स्थानिकदोषविषयं । हेमाद्रिणाप्युक्तम्—"यदा प्रथमं स्थानिनमभिभूयाऽन्यस्थानव्याप्तिस्तदा सर्वेषां लिंगानां रौक्ष्यादीनां दर्शनम्

स समन्तादन्यस्थानाश्रयणात् स्थानसंश्रयाख्यः ''-हेमाद्रिः (अ. हृ. सू.१२-२३)
वातज्वरे हि आगन्तुर्वातः आमाशयस्थाने स्थितं पित्तोष्माणं निष्कास्य ज्वर-
मुत्पादयति । अतः पित्तं स्थानिकोदोषः । रक्तपित्तं स्थानिको दोषः यकृत्प्लीहा-
स्थितंरजकपित्तम् । गुल्मे आमाशयस्थितः समानवायुः स्थानिको दोषः । यस्यः
रोग इत्युच्यते सः दोषः आगन्तुः यथा वातजः पित्तजः कफजश्च गुल्मः इत्यत्र
वातपित्तकफाः आगन्तुदोषाः ।

स्थानिकदोषस्य प्रतीतिः तत्तत्स्थानस्यदोषवैषम्येणैव भवति । स्थानस्थित-
दोषवैषम्यं तत्तत्स्रोतोवैगुण्यजनितम् । तस्मात् केवलं स्थानिकदोषस्य वृद्धिक्षयौ
एकसमयावच्छेदेन निर्णीयते । यथा ज्वरे कोष्ठाग्नेः बहिर्निरसनात् पाचकपित्तोष्मा
सर्वत्र शरीरे ( त्वचि ) वृद्धो दृश्यते तथा आमाशये तस्यक्षयः तज्जन्यमग्निमान्द्यं
च दृश्यते उक्तं च चक्रेण - " अत एव च वह्नेर्निरसनादग्निमान्द्यम् ज्वरे
दर्शितं भवति " । ( च. नि. १।२० - चक्रः ) पित्तक्षये ह्यग्निमान्द्यम्
भवति । " पित्तेमन्दोऽनलः " ( अ. हृ. सू. ११ ) । ज्वरोष्माणं दृष्ट्वा
अपूर्वोत्पादरूपा वृद्धिर्नाशंकनीया, किन्तु प्राकृतस्यैव पित्तस्य स्थानापकर्षणेन
वैषम्यं सर्वशरीरे वृद्धिः आमाशये क्षयः । एवं रुद्धपथकामलायां तिलपिष्टनिभं
पुरीषं उपलभ्यते तथा हारिद्रनेत्रत्वक् च पुरुषो भवति । अत्राऽपि शाखाश्रिता
पित्तवृद्धिः कोष्ठस्थितः पित्तक्षयः इत्येवं प्रकारं स्थानिकदोषपित्तकृतम् वैषम्यमुप-
लभ्यते । एवमेव सर्वत्र स्थानिकदोषविषये चिन्तनीयम् । रोगपरीक्षायां स्थान-
विशेषे दोषक्षयलक्षणानि यद्युपलभ्यन्ते तदा तानि स्थानिकदोषविनिश्चयार्थे
सहायकानि भवन्ति । उदाहरणत्वेन त्रीण्यातुरपत्रकाण्यन्ते संयोजितानि ।

## वृद्धा एव दोषा रोगजनकाः

आगन्तुदोषः वृद्धो भवति तदैव प्रकोपप्रसरादिसमर्थोभवति, ततश्च
स्थानसंश्रये रोगोत्पत्तिः । असंचितपित्तस्य न कोपः अत्र च केचन अचयप्रकोपम्
वर्णयन्ति-कुपिता इति कोपोऽत्र द्विविधा चयपूर्वकोऽचयपूर्वकश्च, तत्र चयपूर्वकं
कोपमागताः संशोधनविधानेनैव शमयितव्याः ( डल्हण सु. चि. ३३-२ ) तथा
चोक्तम्

काठिन्यादूनभावाद्वा दोषोऽन्तः कुपितो महान् ।
पथ्यैर्मृदुत्वतां नीतो मृदुदोषकरो भवेत् ॥ (च. चि. ३०-३२९)

काठिन्यादिति दोषचयरूपसंहतत्वात् ऊनभावात् अचयप्रकोपात्, अचयेऽपि
दोषाणां प्रकोपो भवत्येव ( चक्रः ) यथा बलवद्विग्रहादिभिर्वायोः पित्तस्यक्रोधा-
दिभिः श्लेष्मणश्च दिवास्वप्नादिभिः, अयं चाचयप्रकोपो घनावयवोपचयाकर्तृ-
त्वात् ऊनभावात् प्रकोपः इत्युच्यते ( चक्रः ) । अत्र चयावस्थां परित्यज्य सद्य-



प्रकोपरूपावस्थां समर्थयति । अत एवोक्तम् वाग्भटेन-चयादीन् यान्ति सद्योऽपि
दोषाः कालेऽपि वा न तु । ( अ. हृ. १२-२९ ) प्रकोपोऽपिवृद्धिरेवेति वाग्भटे-
नोक्तम् । वृद्धिर्हिद्विधा चयकोपभेदेन ( अ. सं. सू. २० ) " वृद्धिर्हि द्विविधा
चयलक्षणा प्रकोपलक्षणाच, तत्र संहतिरूपा वृद्धिश्चयः विलयनरूपा वृद्धिः प्रकोपः
डल्हणः " ( सु. नि. ३३-३ ) अतः प्रकोपोऽपि वृद्धिः प्रकोपविना रोगो
नास्ति । अतः वृद्धः एव दोषः रोगजनकसमर्थः ।

अशीतिर्वातविकाराः, चत्वारिंशत्पित्तविकाराः विंशतिः श्लेष्मविकाराश्च ये
नानात्मजा विकारा उक्तास्तेषु सर्वेष्वपि वृद्धवातस्यैव लक्षणान्युक्तानि उक्तं च-
" सर्वेष्वपि खल्वेतेषु वातविकारेषूक्तेष्वन्येषु चानुक्तेषु वायोरिदमात्मरूपम
परिणामि कर्मणश्च स्वलक्षणम्, यदुपलभ्य तदवयवं वा विमुक्तसंदेहाः वातविकार-
मेवाध्यवस्यन्ति कुशलाः रौक्ष्यं शैत्यं,......वायोरात्मरूपाणि । एवंविधत्वाच्च
वायोः कर्मणः स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः तद्यथा-स्रंस-भ्रंस-
व्यास-संग......तैरन्वितं वातविकारमेवाध्यवस्येत् "(च.सू. २०) अत्र च वात-
विकारनिश्चये सहायकं वातस्यैव स्वलक्षणानां रौक्ष्यादीनां उपलब्धिरित्यस्य कोऽर्थः ?
प्रकृतावस्थायां यत्र रौक्ष्यादीनामभाव आसीत् तत्रैव रौक्ष्यादीनां व्यक्तिर्भवती
त्यर्थः । एतच्च वातगुणानां वर्धनेनैव भवति, न तु क्षयेण । गुणवृद्धिरस्ति वातवृद्धिश्च
नास्तीति वक्तुं न किमपि प्रमाणमस्ति । गुणकर्मवृद्धिक्षयाभ्यामेव वातवृद्धिक्षया-
वनुमीयते । वाते क्षीणे सति स्वं लिंगं जहाति । तस्मात् वातविकारेषु सर्वत्र
वातवृद्धि लक्षणोक्तेः वृद्धेनैव वातेन रोगारम्भः चरकाभिमत इति निश्चीयते ।
एवं पित्तजश्लेष्मजेष्वपि विकारेषु मन्तव्यं । तेषां चिकित्सायामपि वातक्षयकराणा-
माहारविहाराणामेवोपयोगः उक्तः । यदि वातक्षयेणापि वातरोगः स्यात् तदा
वातविकारचिकित्सायाम् वातवर्धकाहारविहारोपदेशः स्यात् । तथा न कृतमाचार्यै-
श्चरकादिभिः । एवं पित्तकफयोरपि चिकित्सोक्ता । ( च. सू. २० ) अतोऽपि
निश्चीयते वृद्धैरेव दोषैः रोगोत्पत्तिरिति ।

ननु एतत्तु नानात्मजेषूक्तम्, सामान्यजेषु दोषक्षयेणापि स्यादिति चेत्तदपि
न । सामान्यजेषु ज्वरादिषु वातक्षयकारणैर्निदानैः वातजोरोगः उत्पन्न इति न
कुत्राऽपि संहितासूक्तम् । दोषाणां संसर्गसन्निपातानां गणानावसरे यथा वृद्धिस्त्र-
योदश सन्निपात उक्ता तथा क्षीणैरपि त्रयोदश सन्निपाता उक्ताः ( च-सू-
१७।४१-४३ ) सन्निपातज्वरवर्णने तु केवलं वृद्धैरेव त्रयोदश सन्निपातज्वरा
उक्ताः ( च.-चि. - ३ -८९ ) एवं वाग्भटे दोषोपक्रमणीयाध्याये वातस्यो-
पक्रमः स्नेहः स्वेदः संशोधनं मृदु । ( अ.- हृ.- सू - १३-१ ) इत्यादिना
वृद्धवातस्यैव चिकित्सोक्ता न तु क्षीणस्य ।

ननु दोषाणां क्षयेणाऽपि रोगा उक्ताश्चरके यथा " प्रकृतिस्थं यदा पित्तं मारुतः श्लेष्मणः क्षये । स्थानादादय गात्रेषु यत्र यत्र विसर्पति । गात्रदेशे तत्तस्य भ्रमोदौर्बल्यमेव च " (च – सू – १७·४५) तदपि न सम्यक्, अत्र हि क्षीणश्लेष्मणः रोगकर्तृत्वं नोक्तम् किन्तु मारुतस्यैव कर्तृत्वमुक्तामिति सूक्ष्मदर्शिभिरवगन्तव्यम् । श्लेष्मा हि क्षीणः न किमपि लक्षणमुत्पादयति, श्लेष्मक्षययुक्ते शरीरे हि वातस्य आनुकूल्यात् स वातः पित्तं गृहीत्वा तत्र तत्र विसर्पन् भ्रमदाहादिकान् करोति । अत्र च पित्तं कर्मपदत्वेनोक्तम् स्वयं पित्तं प्रकृतिस्थ न किमपि विकृतिमुत्पादयति । यदा तत् वायुः अन्यत्रानयति दाहादीनुत्पादयति । तथा चोक्तं चक्रेण " स्वमानास्थितस्यापि पित्तादिविकारकर्तृत्वं, तच्छरीरप्रदेशान्तरमीतस्य पित्तादेस्तत्र तत्र प्रदेशे वृद्धस्यैव विकारकर्तृत्वं, स्वमानस्थितोऽपि दोषः प्रदेशान्तरं नीतः सन् तत्प्रदेशस्थ दोषापेक्षया वृद्ध एव भवति । तेन तत्रापि वृद्धस्यैव विकारकर्तृत्वं " । ( च. शा. ६–४, चक्रः ) तथा यत्र वातक्षयः तत्र न वातस्य किन्तु पित्तस्यैव कर्तृत्वमुक्तम् यतस्तत्र पित्तस्यैव वृद्धिः न तु वातस्य । एवं यत्र श्लेष्मा वृद्धः तत्र श्लेष्मण एव कर्तृत्वमुक्तं न त्वन्ययोः ( च. सू. १७–४५–६१ ) ।

केचित्तु पक्षाघाते चेष्टानाशादर्शनात् वातजकारणात्वमाहुः । ते च वदन्ति " चेष्टाहि वातकर्म क्षीणा जहति लिंगम् एवं इति न्यायेन तत्र वातक्षय एव वक्तव्यः "–इति । सत्यम् । चेष्टानाशे सति अवश्यं वातक्षयो वक्तव्यः । तथाऽपि क्षीणवातस्य रोगकारणत्वेनोक्तिर्भ्रममूला । वृद्धेनैव हि वातेन इन्द्रियमूल–विघातात् पक्षाघातो भवति । वातक्षयस्तु कर्मेन्द्रियेषु भवति । पक्षाघाते वायुः स्थानिकोदोषः । अतस्तस्यैकदेशे क्षयः अन्यत्र वृद्धिश्च द्रष्टव्या । करचरणादयो हि कर्मेन्द्रियाणि । करचरणादिषु हि बहवो रोगाः विश्वाच्यवबाहुकगृध्रस्यादयः आमवातशोथवातरक्तादयः तथा पक्षवधश्चापि भवति । न हि एकस्मिन्नेव स्थाने अनेके रोगा भवितुमर्हन्तीति पूर्वमेव प्रतिपादितम् । तत्र इन्द्रियस्थाने भवति पक्षाघातः । हस्तौग्रहणकर्मणि, पादौ गमनकर्मणि, तयोः कर्मणोर्नाशात् इन्द्रियनाशः स्पष्टः । इन्द्रियाणां मूलं शिरसीत्युक्तं प्राणा प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च । तदुत्तमांगमंगानां शिरस्तदभिधीयते ( च. सू. १७–१२ ) । " शिरसि इन्द्रियाणि इन्द्रियप्राणवहानि च स्रोतांसि सूर्यमिव गभस्तयः संश्रितानि " ( च. सि. ९–४ ) । " तदुपघातात्तु घोरतरव्याधिप्रादुर्भावः । तस्मादेतानि विशेषेण रक्ष्याणि बाह्याभिघाताद्वातादिभिश्च । अत्र उपघातादिति किंचिद्वैकृतात् " ( च. सि. ९–५- चक्रः ) एषां कर्मणामपघाते के विकारा भवन्तीति प्रतिपादयति दृढ-बलः " शिरस्यभिहते मन्यास्तम्भार्दितचक्षुर्विभ्रममोहोद्वेष्टनचेष्टानाशकासश्वासहनुग्रहमूकगद्गदत्वाक्षिनिमीलनगण्डस्पन्दनजृम्भणलालास्रावस्वरहानिवदनजि‍ह्मत्वादीनि । (च. सि. ९–६) एवं इन्द्रियमूले शिरसि वातेनोपहते सति अर्दितादयः चेष्टानाशश्च भवितुमर्हन्ति इति स्पष्टम् । अतः पक्षाघाते इन्द्रियमूलोपघातकृतः चेष्टानाशः । मूलोपघातश्च वृद्धेनैव दोषेण कृतः अत एव पक्षाघातारम्भे वातवृद्धिलक्षणानामेषामन्यतमस्यावश्यं प्रादुर्भावः–



संकोचः पर्वणां स्तंभो भेदोऽस्थ्नां पर्वणामपि ।
रोमहर्षः प्रलापश्च पाणिपृष्ठशिरोग्रहः ॥

एतानि वातव्याधिसामान्यलक्षणान्युक्तानि । एषु बहूनां लक्षणानां व्यक्तिः पक्षाघातप्रारंभे भवत्येव । तथा भ्रमतिमिरदर्शनादयोऽपि वातवृद्धिलक्षणानि दृश्यन्ते ।

रोगश्च क्वचिदुद्भवति अन्यत्र च परिणामं दर्शयेत् । पक्षाघाते वातोहि स्थानिको दोषः । स च प्राणः तस्यैव इन्द्रियधारकत्वात् । तस्य शिरसिवृद्धिः अन्यतरपक्षे क्षयश्चेऽति मन्तव्यम् । करचरणयोरेव रोगाधिष्ठानं मन्वानाः तत्र चेष्टानाशं दृष्ट्वा वातक्षयजन्योऽयमिति वदन्ति । तत्तु न सम्यक् । रोगाधिष्ठानंहि शिरस्येव । आधुनिकरीत्यापि पक्षाघाते शिरसः आभ्यन्तरभागे इन्द्रियमूलेषु दुष्टिरिति बहुपरीक्षासिद्धम् । तत्रैव स्रोतोरोधः । स्रोतवैगुण्यं च वार्धक्यादिकृतम् । सर्वशरीरे वृद्धोवातः केवलः कफानुगोवा स्थानसंश्रयं करोति । अतएव पक्षाघातः प्रायशः सिरागतवातरोगवतामेव भवति ( रक्तचापः–रक्तप्रपीडनम् ) पक्षघातकालेऽपि रक्तप्रपीडनाधिक्यं वातवृद्धिमेव द्योतयति । सुश्रुतेणाप्यत्र वातवृद्धिरेवोच्यते ।

अधोगमः सतिर्यगाधमनीरुर्ध्वदेहगाः ।
यदा प्रकुपितोऽत्यर्थं मातरिश्वा प्रपद्यते ॥
तदान्यतरपक्षस्य सन्धिबन्धान् विमोक्षयेत् ।
हन्तिपक्षं तमाहुर्हि पक्षाघातं ॥ ( सु. नि. १।६०।६१ )

अत्रचात्यर्थं प्रकुपितो वायुरित्युक्तम् । प्रकोपश्च वृद्धि रेवेति पूर्वमेवप्रतिपादितम् । पक्षाघातनिदानान्यपि वातव्याधिसामान्योक्तान्येव तानि च वातवर्धनान्येव न तु क्षयकराणि, चिकित्सितमपि वातविपरीतगुणं वातहरमेव, न तु वर्धकम् । अतः पक्षाघातः वातवृद्धिजन्य एव इति सिद्धम् ।

एवं वृद्धनामेव दोषाणां रोगकर्तृत्वं न तु क्षीणानामिति प्रतिपादितम् । चक्रपाणिना चोक्तम् " लिंग रूपं जहातीत्यनेन क्षीणानां प्रकृतिलिंगक्षयव्यतिरिक्तं विकारकर्तृत्वं नास्तीति दर्शयति, यतो वृद्धा उन्मार्गगामिनो दोषाः दूष्यं दूषयन्तो ज्वरादीन् कुर्वन्ति न क्षीणाः, स्वयमेव दुःस्थितत्वात् " ( च. सू. १७ ) ।

रोगावस्थायांतु क्षयोऽपि भवितुमर्हति। अतः रुग्णे दृश्यमानलक्षणानि दोषवृद्धिकृतानि वा क्षयकृतानि वा इति निश्चित्य कस्य वृद्धिः कस्य क्षयश्चेति निश्चेतव्यम्। तत्र क्षयेण स्थानिकदोषविनिश्चये साहाय्यं भवतीति पूर्वमेव प्रतिपादितम्।

एवं संक्षेपेण दोषस्वरूपं दोषोत्पत्तिः संचयाद्यवस्थाः आगन्तुकस्थानिक-दोषौ वृद्धेन दोषेण रोगोत्पत्तिश्च प्रतिपादितः।

एवमेतावता सम्प्राप्तिघटकानि, प्रत्येकस्मिन्नपि निजरोगे प्रारंभावस्थाया-मवश्यं भावीनि अग्निमान्द्यास्रोतोरोध दोष - दूष्याणि उक्तानि।

एतेऽभ्योऽन्यान्यपि कानिचन कारणानि सम्प्राप्तिघटकत्वे नानुप्रविश्य रोगानुत्पादयन्ति। यथा मृज्जपाण्डुरोगे मृत्, स्रोतोरोधं कृत्वा रोगमुत्पादयति। स्थावरं जंगमं वा विषं शरीरे प्रविश्य प्रथमम् दूष्यान् ततः दोषांश्च दूषयित्वा विविधानि लक्षणानि उत्पादयति। तथा दूषीविषकृत्रिमविषाणि अपि शरीरे सम्प्राप्तिघटकानि भूत्वा रोगानुत्पादयन्ति। तथा शल्यबालशर्करातृणकाष्ठास्थ्यादयः ये केचित् शरीरान्तास्थिताः रोगोत्पादका भवन्ति तेऽपि सम्प्राप्तिघटका भवन्ति यथा बद्धगुदोदरच्छिद्रोदरादिषु। भयशोकक्रोधहर्षचिन्तोद्वेगादिभिर्मानसै-भावैरु-त्पाद्यमानेषु ज्वरातीसारप्रभृतिषु तेऽपि मानसिका भावा सम्प्राप्तिघटका भवन्ति। उन्मादापस्मारप्रभृतिषु भयादिजन्यज्वरादिषु च मानसरोगेषु मानसौ दोषौ रजस्तमसो अपि सम्प्राप्त्यन्तर्गतो भवतः। तौ हि सहैव भवतः न तु पृथक् तथा चोक्तम् " नियतस्त्वनुबन्धो रजस्तमसो परस्परं। न ह्यरजसकं तमः प्रवर्तते। (च. वि. ६-९) तयोर्विकाराः कामक्रोधलोभमोहेर्ष्यामानमदशोकाचित्तो-द्वेगभयहर्षादयः। ते च विकाराः परस्परमनुवर्तमानाः कदाचिदनुबध्नाति कामादयो ज्वरादयश्च। (च. वि. ६-८) एवं मानसौ दोषौ शारीरैर्दोषैः, शारीरा मानसाभ्यां चानुबध्नन्तः सम्प्राप्तिविशेषानुत्पादयन्ति।

अभिघातजादिष्वागन्तुरोगेष्वपि दूष्यदुष्टिः प्रथमं ततः दोषदुष्टिः ततः आग्निमांद्यम् आमः स्रोतोरोधश्च सम्प्राप्तिघटकाः प्रादुर्भवन्ति।

एवं प्रत्येकस्मिन्नपि रोगे विशिष्टान् सम्प्राप्तिघटकान् प्रत्यक्षादिप्रमाणो-पलब्धलक्षणैर्ज्ञात्वा चिकित्सा कर्तव्या। तदा साध्यान् साधयन्, याप्यान् यापयन् असाध्यांश्च प्रत्याख्यापयन् भिषक् प्राणाभिसरो भवति, तिस्र एषणाश्च साधयाति।

# लक्षणैः सम्प्राप्तिज्ञानम्

एते च सम्प्राप्तिघटका यदा समग्रतया ज्ञाता भवन्ति तदा रोगज्ञानं सम्पूर्णं भवति। तेषां ज्ञानं च लक्षणैरेव भवति कथं वा लक्षणैः सम्प्राप्तिर्ज्ञायत इत्यत्र प्रतिपाद्यते।

एतेषु सम्प्राप्तिघटकेषु दोषाः द्रव्यमेवेति पूर्वमेव प्रतिपादितम्। दूष्यमपि द्रव्यमेव, स्रोतोऽप्याकाशीयं द्रव्यम्, स्रोतोमूलान्यपि तथा। आमोऽपि द्रव्यं, रसस्यैव रूपान्तरत्वात्। आग्निश्च पित्तमिति पूर्वमेव प्रतिपादितम्। मनोऽपि द्रव्यमेव, " खादीन्यात्मा मनः कालो दिशश्च द्रव्यसंग्रहः" ( च. सू. १।४८ ) मनसः गुणो रजस्तमसो। आगन्तुष्वपि रोगेषु प्रायशो द्रव्याण्येव सम्प्राप्तिघटका भवन्ति क्वचित्तु गुणानां भयशोकादीनां सम्प्राप्तिघटकत्वं भवति।

द्रव्याणां ज्ञानं हि गुणकर्मभिर्भवति। गुणकर्मसमवायिकारणं हि द्रव्यं। उक्तं च- "यत्राश्रिताः कर्मगुणाः कारणं समवायियत् तद्द्रव्यं। ( च. सू. १-५१) द्रव्यं प्रत्यक्षतया दृश्यत इत्युक्ते तस्य रूपं दृश्यते इत्यर्थः। स च गुण एव। प्रत्येकस्य द्रव्यस्य विशिष्टरूपवत्वात् घटकुड्यादीनां तैर्विना द्रव्यज्ञानं नैव भवति। दोषधातुमलानां च द्रव्याणां पृथक्तया ज्ञानं भवति।

तत्र गुणा अपि द्विविधाः वैशेषिकाः शब्दस्पर्शरूपरसगन्धाः, तथा गुर्वादयश्च विंशतिः। तत्र वैशेषिका गुणाः पंचेन्द्रियैर्ज्ञायन्ते, द्रव्यस्य प्रत्यक्षीकरणं तैरेव भवति। गुर्वादयस्तु गुणाः क्वचित् प्रत्यक्षोपलभ्याः, शरीरेतु प्रायशः कर्मोपलभ्या एव। तत्र गुर्वादीनां गुणानां प्रधानकर्माण्येवमुक्तानि हेमाद्रिणा "द्रव्यस्य बृंहणे शक्तिर्गुरुः, लंघनेलघुः, शमने मन्दः, शोधने तीक्ष्णः, स्तम्भने हिमः स्वेदने उष्णः, क्लेदने स्निग्धः शोषणे रूक्षः, रोपणे श्लक्ष्णः, लेखने खरः, प्रसादने सान्द्रः, विलोडने द्रवः श्लथने मृदुः, द्रढने कठिनः, धारणे स्थिरः प्रेरणे चलः विवरणे सूक्ष्मः, संवरणे स्थूलः, क्षालने विशदः, लेपने पिच्छिलः,' ( हेमाद्रिः – अ. हृ. सू. १-१८ )। विस्तरश्च सुश्रुते सू. अ. ३४-५१५ तमे श्लोके उक्तम्। विस्तरभयादत्र नोद्धृतम्।

एतेषु विंशति गुणेषु मध्ये अष्टो प्रधानाः। अत एव अष्टौ वीर्याणीत्युक्तम् तत्र च कारणमेवं प्रतिपाद्यते वाग्भटेन

" गुर्वादिष्वेव वीर्याख्या तेनान्वर्थेति वर्ण्यते।
समग्रगुणसारेषु शक्त्युत्कर्षविवर्तिषु ॥
व्यवहाराय मुख्यत्वाद्बहवग्रग्रहणादपि।( अ. हृ. सू. ९-१४-१५)

मृदुतीक्ष्णगुरुलघुस्निग्धरूक्षोष्णशीतलम् ।

वीर्यमष्टविधं केचित्...... ॥ ( च. सू. २६–६४ )

एतेषां प्रधानगुणानां कर्माणि प्राकृतावस्थायाम् शरीरे दर्शयितुं शक्यन्ते ।

मृदुः– श्लथनः–मृद्वत्र मातृजं रक्तमांसमज्जगुदादिकम् । (अ. हृ. शा. ३–४) आदिशब्देन नाभिहृदययकृत्प्लीहामाशयादीनां ग्रहणम् । ( अरुणदत्तः ) तथा कोष्ठांगान्यपि मृदुनि ( च. शा. ३–६ ) अत एव तानि शिथिलानि । आप्यद्रव्यगुणोऽयम् ।

तीक्ष्णः– शोधनः , पाककरः , आहारस्य संघातभेदनः जरयति, तथा दोषधातुमलानां प्रतिक्षणं पाकः शरीरेभवति तीक्ष्णगुणात् उष्णगुणसहकृतात् । आग्नेयोऽयम् ।

गुरुः– बृंहणः– दोषधातुमलानां निर्माणं, शरीरस्य प्रत्यहं शीर्यमाणस्य भारहानिर्यथा न भवति तथा स्थापनम्, बालेषु तु भारवृद्धिश्च गुरुगुणकर्म, पार्थिवोऽयं गुणः ।

लघुः– लंघने, शरीरस्य लाघवकरः, चलनं स्पदनं रसविक्षेपादिगतिक्रियानुकूलताकरः जीवनानुवृत्तिप्रत्ययभूतः, अग्निवाय्वाकाशीयोऽयम् ।

स्निग्धः– क्लेदनः–, शरीरे उदककर्म, तथा शरीरपरमाणूनां परस्पराश्लेषताकरः शरीरपरमाणूनां संयोगे शरीरस्थितिः वियोगे विनाशः आप्यद्रव्यगुणोयम् ।

रूक्षः– शोषणः, आहाररसं शोषयति । वायव्योऽयं प्रधानतः, आग्नेयाकाशीयेष्वपि वर्तते ।

उष्णः– स्वेदनः , शरीरे उष्णतासंपादकः , सर्वयन्त्रतन्त्राणां कार्यानुकूलताकरः ।

शीतः– स्तम्भनः, आमाशयपक्वाशय हृदयबस्त्याद्यवयवानां गतिं नियमयति, तस्मात् शरीरबलस्थापकः । तथाऽन्येषामपि गुणानां कर्मभिः सम्बन्धः शरीरस्य प्राकृतावस्थायां दर्शयितुं शक्यते । यथा सूक्ष्मः अवकाशकरः सिरादीनां विकासकरणेन, स्थूलः अवरोधकरः, स्थिरः अस्थ्यादिषु शरीरधारणकरः , चलः गत्युत्पादकः हृदयादिनां, कठिनः धातूनां दृढतापादकः । एवं शरीरे दशगुणाः गुर्वादयः स्वविरुद्धगुणैर्युक्ताः शरीरं धारयन्ति यथा स्निग्धस्य क्लेदनाधिक्ये रूक्षः शोषयति, उष्णाधिक्ये शीतः तं शमयति ।

वातपित्तकफानां कर्मभिस्तेषां गुणा अनुमीयन्ते । खरपरुषताभिः खरगुणः वैशद्येन विशदगुणः सौषिर्येण सूक्ष्मगुणः, कम्पेन चलगुणः, संकोचहर्षशैत्यादिभिः सुप्तिस्तम्भैश्च शीतगुणः, भ्रमास्वप्नादिभिश्च लघुगुणः वातस्यानुमीयन्ते रुग्णावस्थायां । ऊष्माधिक्यातिस्वेदादिभिरुष्णगुणः, पाकेन तीक्ष्णगुणः, क्लेदकोथावश्रस्रैद्रवः सस्निग्धः, पूतिमुखतादिभिर्विस्रता, अतिसरणेन सरगुणश्च पित्तस्याप्राकृतावस्थायामनुमेयाः । गौरवनिद्राधिक्यादिभिर्गुरुता, हृदयोपलेपकण्ठोपलेपादिभिः पिच्छिलता, आलस्यचिरकारित्वादिभिर्मन्दगुणः, स्तैमित्येन च स्थिरता, स्नेहबन्धादिभिः स्निग्धता, शरीरस्य श्लक्ष्णताधिक्यदर्शनात् श्लक्ष्णता, शैथिल्येन च मृदता चोन्नेयाः श्लेष्मणः ।



लक्ष्यते ज्ञायतेऽनेनेति लक्षणम् । शरीरभावानां प्रकृत्या विकृत्या वा ज्ञापकाः । क्वचित् विशेषगुणाः स्युर्यथा रक्तस्य ज्ञापको रक्तवर्णः पित्तस्य पीतवर्णः इत्यादि, क्वचित्तु तेषां सामान्यगुणाः ज्ञापकाः स्युः यथा शरीरे रौक्ष्यं शैत्यमित्यादि तानि च गुणात्मकानि लक्षणानि, क्वचित्तु न द्रव्यत्वेन न गुणत्वेन वा भवन्ति लक्षणानि किन्तु कर्मत्वेनैव । यथा शोषः शूलः एवमादिः । एतानि च कर्मात्मकानि लक्षणानि भवन्ति । तान्यपि द्विविधानि–कैश्चिल्लक्षणैर्गुणा अनुमातुं शक्यन्ते, यथा शोषेण रौक्ष्यमनुमीयते क्वचित्तु न गुणा अनुमीयन्ते, केवलं एतदस्य द्रव्यस्य कर्मेत्यनुमीयते यथा शूलादीनि । एतच्च विशिष्टम् कर्म । तानि च केवलकर्मात्मकानि । क्वचित्तु अभावात्मकान्यपि लक्षणानि भवन्ति यथा चेष्टानाशः । तत्रापि या चेष्टा वायोः कर्मात्मिका पूर्वमासीत् तस्यैवाभावात् तल्लक्षणमपि कर्मात्मकमेवोच्यते । उक्तं च कर्मणां प्राकृताद्धानिः इति ।

शब्दस्पर्शरूपरसगन्धात्मकानि लक्षणानि प्राकृतानि विकृतानि वा यदाऽवलोक्यन्ते तदा तैः पार्थिवादिद्रव्यविशेषाणां ज्ञानं भवति । विशेषगुणा एव हि पंचभूतद्रव्यबोधकाः । उक्तं च

महाभूतानि खं वायुरग्निरापः क्षितिस्तथा ।

शब्दःस्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः ॥ ( च. शा १-२७ )

शब्दादयो खादीनां नैसर्गिका गुणा ज्ञेयाः । यस्तु गुणोत्कर्षाभिधा यस्तु गुणोत्कर्षोऽभिघातव्यः स हि अनुप्रविष्टभूतसम्बन्धादेव तेन पृथिव्यां चतुर्भूतप्रवेशात्पंचगुणत्वं, एवं जलादावपि चतुर्गुणत्वं ज्ञेयम् ( चक्रः ) । एतैर्विशेषगुणात्मकैर्लक्षणैर्ज्ञातानि द्रव्याणि द्रव्यतः ज्ञातानीत्युच्यन्ते। तत्राऽपि विशिष्टविशेषगुणज्ञानेन विशिष्टद्रव्यं ज्ञायते यथा पीतरूपदर्शनेन पित्तं श्वेतरूपदर्शनेन कफः श्यावारुणवर्णदर्शनेन वातश्च ज्ञायन्ते । रौक्ष्यशैत्यलाघवादीनि गुणात्मकानि यानि लक्षणानि तैर्ज्ञायमानं द्रव्यं गुणतः ज्ञातमित्युच्यते । यदा च लक्षणैः न गुणाः अनुमातुं शक्यन्ते तदा तैर्ज्ञायमानं द्रव्यं कर्मतः ज्ञातमित्युच्यते । अत्रेदमवधेयम् केवलं रूपादिभिर्ज्ञाते द्रव्यं सर्वथा ज्ञातमिति न भवति केवलं पंचभूतेष्वन्यतमज्ञानं भवति । न हि केवलं पंचभूतज्ञानेनैव व्यवहारः चिकित्साशास्त्रे, तत्र हि दोषधातुमलानां ज्ञानमावश्यकम् । तेषां पंचभूतनिर्मितत्वेऽपि यथार्थतः भिन्नत्वमेव ।

यथा श्लेष्मा ह्याप्यः, रसोऽपि तथा शुक्रमपि आप्यमेव । तेषां वर्णोऽपि श्वेत एव तथाऽपि तानि भिन्नान्येव द्रव्याणि । अतः एकं द्रव्यं द्रव्यगुणकर्मभिः सर्वथा परीक्ष्य निश्चेतव्यं । तत्र शुक्रे मधुगन्धित्वम् गर्भकर्तृत्वं च दृष्ट्वा शुक्रत्वं निर्णेयम् । रसे प्रीणनं कर्म दृष्ट्वा रसत्वं निश्चेतव्यं । एवमुदररोगे उदरे आकोटितमशब्दमुदकपूर्णदृतिवत् क्षोभकंपंच दृष्ट्वा किंचिदाप्यद्रव्यं वर्तत इति ज्ञायते । तच्च रक्तम् रसः अम्बु वा स्यात् । तत्र उदरवेधनेन तद्द्रव्यं बहिर्निःसार्य परीक्ष्यते चेत् स्पष्टं भवति । अथवोदरे रक्तस्य संचयेऽस्यत्राऽवश्यं पाण्डुता दृश्येत, यदि रसः तर्ह्यन्यत्र प्रीणनाल्पता, यद्यम्बु तदान्यत्र अम्बुक्षयलक्षणानि तृष्णाशोषमूत्रक्षयादीनि दृश्यन्ते तथा आप्यायनक्लेदनकर्माणिच न दृश्यन्ते । एवमेतादृशयुक्तिभिर्द्रव्यनिश्चयः कर्तव्यः । द्रव्ययोर्भेदः अवयवभेदादिरुच्यते तार्किकैः । अवयवविवचनेनैवाधुनिकैर्द्रव्यानिश्चयः क्रियते । एतदर्थमेव सूक्ष्मदर्शकयन्त्रक्षकिरणयन्त्रादिकान्युपयुज्यन्ते तैः । तैश्च उपकरणैः यद्यायुर्वेदसिद्धान्तानुसारं दोषधातुमलाः निश्चेतुं पार्यन्ते तदा तेषामप्यायुर्वेद उपयोगः कर्तुं शक्यते । तत्राऽपि गुणकर्मणोः परीक्षा आवश्यकी भवति ।

तत्र श्लेष्मनिष्ठीवने, रक्तनिष्ठीवने, अतिसारे चेत्यादिषु द्रव्यतः प्रत्यक्षता भवति । एतानि च लक्षणानि द्रव्याण्येव शैत्यरौक्ष्यौष्ण्यस्निग्धत्वपैच्छिल्यादीनि लक्षणानि गुणाः एव, तथा शूलस्तम्भमोहसुप्त्यादीनि च लक्षणानि कर्माण्येव । एवं शरीरभावानां तदतिरिक्तानां वा भावानां विकृतानां सम्प्राप्तिघटकानां द्रव्याणि गुणाः कर्माणि एव व्याधिलक्षणशब्देनोच्यन्ते । अस्मिन् प्रकृतानां शरीरभावानां द्रव्यगुण कर्माण्यारोग्य लक्षणान्युच्यन्ते । निबन्धेतु प्रयशः विकृतानामेव लक्षणानां सम्प्रातिबोधकानां विचारः क्रियते । प्राकृतानामपि दोषधातुमलानां लक्षणानि क्वचित् विचार्यन्ते येषां साहाय्येन् विकृतिज्ञातुं शक्यते ।

तानि च लक्षणानि द्विविधानि वेदनाः लिंगमिति यानि केवलं रुग्णवेद्यानि ताः वेदनाः, यथा तृष्णाभ्रमशूलादयः । वैद्यवेद्यानि तु लिंगानि यथा नखनयनपीतत्वोत्सेधादयः । एतच्च द्वैविध्यं वेदनालिंगशब्दयोरेकत्रोपादानेन सूचितम् । यथा गुल्म " समुत्थानपूर्वरूपलिंगवेदना......( च. चि. – ३ ) । यथा एवं वेदनमेवंसंस्थान... ... ( च. वि. ४ -६ ) गयदासेन तु दोषलिंगं व्याधिलिंगमिति द्वैविध्यमुक्तम् । ( सु. नि. १– १– गयदासः ) स्थानसंश्रयात्पूर्वं व्याधिपदाऽव्यवहारात् दोषलिंगमुच्यते, ततः परं व्याधितयाऽव्यवहारात् व्याधिलिंगमुच्यते । व्याधिलिंगमपि सामान्यं विशिष्टंचेति द्विविधं । तत्र सामान्यसम्प्रातिकृतं सर्वेष्ववान्तरभेदेषु समानं सामान्यलिंगं, यथा ज्वरे स्वेदावरोधः सन्तापः



सर्वांगग्रहणं इति लक्षणं अष्टस्वपि ज्वरेषु समानम् । प्रत्येकावान्तरभेदबोधकं विशिष्टं लक्षणम् ।

रोगेषु हि सर्वास्वप्यवस्थासु विकृतदोषदूष्ये स्तः । तथा रोगस्य प्रथमावस्थायामाग्निमान्द्यं, आमः, स्रोतोरोधः, तथाऽन्येऽपि सम्प्राप्तिघटकाः भवन्ति । तत्र योऽपि सम्प्राप्तिघटको वर्तते सोऽवश्यं कंचिल्लक्षणमुत्पादयेत् । लक्षणानि च सम्प्राप्तिघटकानामेव द्रव्यगुणकर्माणीति पूर्वमेव प्रतिपादितम् । गुणकर्मणी च द्रव्येसमवायसम्बन्धेन वर्तेते । अतः सम्प्राप्तेर्लक्षणानां च समवायः सम्बन्धः । सम्प्राप्तिर्यद्यपि व्यापाररूपा तथाऽपि व्यापारवत् एवात्र सम्प्राप्तिपदव्यवहारः इति पूर्वमेव प्रतिपादितम् । सम्प्रातिघटकाः दोषादयः लक्षणानां समवायिकारणानि, क्वचित्तु, निमित्तकारणान्यपि भवन्ति यथा धातुक्षये वातलक्षणानि । तेषां लक्षणानां रौक्ष्यादीनां धातुक्षयः निमित्तकारणं, वातस्तु समवायिकारणम् । लक्षणः तत्समवायिकारणद्रव्यानुमानमेव न्याय्यमन्यथा अनवस्थापत्तेः स्रोतोदुष्टिलक्षणेषु यद्यपि दोषाः समवायिकारणत्वेनावगन्तुं शक्यन्ते तथाऽपि अतिप्रवृत्यादीनां स्रोतोदुष्टेर्विशेषलक्षणत्वात् तेषां रोगाधिष्ठाननिर्णये प्रयोजकत्वाच्च अतिप्रवृत्यादिभिः स्रोतोदुष्टिरित्येव निश्चेतव्यम् । तत्राऽपि स्रोतोमूलानां हृदयादीनां विस्तृतिः, स्थानचलनं, अन्त्रसम्मूर्च्छनम्, सिराग्रन्थिः इत्यादिषु स्रोतसां स्रोतोमूलानां वा समवायिकारणत्वमेव घटते । मलसंगः, अतिसारः, रक्तस्य बहिर्गमनं, इत्यादिष्वातिप्रवृत्तिसंगविमार्गगमनेषु दोषाणां धातूनां वा समवायिकारणत्वेऽपि स्रोतोदुष्टिः मुख्यत्वेन ग्राह्या विशिष्टलक्षणत्वात् ।

तत्राग्निमान्द्यं जरणशक्त्यानुमीयते । धात्वग्निमान्द्य च धातुवृद्ध्या, धातोः सम्यगनिर्माणेन च निश्चेतव्यम् । आमलक्षणानि पूर्वमुक्तानि सामावस्थावर्णने चाग्रे विचार्यन्ते ।

स्रोतोदुष्टिलक्षणानि च पूर्वमुक्तानि । क्षकिरणादि यन्त्रसहायेन च स्रोतसां अतिप्रवृत्तिसंगविमार्गगमनसिराग्रन्थ्यादयः दुष्टिलक्षणानि स्पष्टतरं ज्ञातुं शक्यन्ते । यथा आमाशयास्यातिप्रवृत्तिः मूत्रवहेष्वश्मर्याद्यवरोधः, हृदये रसस्य विमार्गगमनै, धमनीषु ग्रन्थयः एवमादयः । क्षकिरणसाहाय्येन ज्ञातानि लिंगान्यपि आयुर्वेदरीत्या स्रोतोदुष्टिनिर्णयद्वारा रोगाधिष्ठाननिर्णये सहायकानि भवन्ति । इदानीं दोषदूष्यलक्षणानि विचार्यन्ते ।

सम्प्राप्तिघटकेषु दोषा दूष्याश्च प्रधानाः चैर्विना रोगो नास्ति । तत्राऽपि रोगाधिष्ठानप्राधान्यात् दूष्यनिश्चयः प्रथममुच्यते । तेषां हि प्राकृतगुणकर्मविकृत्या विकृतिरुपलभ्यते । अतः प्रथमं धातूनां मलानां च प्राकृतगुणकर्माणि भूतसंघटनं चोच्यन्ते ।

| धातवः मलाश्च | उपादानभूताः [ प्रधानाः ] | कर्माणि |
|---|---|---|
| रसः | अप् | प्रीणनं तुष्टिः रक्तपुष्टिः |
| रक्तं | तेजः, अप् | जीवनम्, वर्णप्रसादः मांसपुष्टिः |
| मांसं | पृथिवी | लेपः, शरीरपुष्टिः, मेदोपुष्टिः |
| मेदः | अप्, पृथिवी | स्नेहः,स्वेदः, दृढत्वम्, अस्थ्नांपुष्टिः |
| अस्थि | पृथिवी, अनिलः तेजः | देहधारणं, मज्ज्ञःपुष्टिः, |
| मज्जा | अप् | अस्थ्नां पूरणं,स्नेहः,बलं,शुक्रपुष्टिः |
| शुक्रं | अप् | गर्भोत्पादः, धैर्यम्, च्यवनं, प्रीति, देहबलं, हर्षः बीजार्थं च |
| पुरीष | पृथिवी | अवष्टम्भः, वाय्वग्निधारणम् |
| मूत्रं | अप् अग्निः | क्लेदवाहनम्, बस्तिपूरणम् |
| स्वेदः | अप् | क्लेदविधृतिः, त्वक्सौकुमार्यम् |
| आर्तवं | अग्निः | गर्भकृत् |

अत्रेदमवधेयम् यत् दोषदूष्याणां वृद्धिः प्रमाणवृद्धिरेव। तेषां वृद्धिर्हि गुणवृध्योपलभ्यते । गुणवृद्धिश्च वैशेषिकगुणवृद्धिः सामान्यगुणवृद्धिर्वा भवेत् । गुणवृद्धिर्हि तदाश्रितद्रव्यवृद्धिं विना नैवभवति। उक्तं च—

यथास्वं स्वं च पुष्णन्ति देहे द्रव्यगुणाः पृथक्।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च कृत्स्नशः॥ ( च. चि. १५ )

......द्रव्यपोषणं तु गुणपोषणेन लभ्यते, गुणपोषणं द्रव्यपोषणमन्तरा कर्तुमशक्यत्वात्। अतः गुणवृद्ध्या द्रव्यवृद्धिरेवावगम्यते ।

दूष्यवृद्धिः प्रायशः प्रत्यक्षोपलब्ध्या एव ज्ञायते। तत्र रसवृद्धिः प्रथमं विचार्या। रसश्लेष्मणोर्गुणसाम्यात् रसवृद्धिलक्षणानि श्लेष्मवृद्धिलक्षणानि च समानान्येवोक्तानि। रसोऽपि श्लेष्मवत् ( अ. हृ. सू. ११ )। किन्तु श्लेष्मा हि दोषः रसश्च दूष्यम्। अतः दोषदूष्यविनिश्चयार्थमवश्यं तयोर्व्यवच्छेदः कर्तव्यः। तत्र रसप्रदोषजेषु व्याधिषु विशेषतया सामतादर्शनात् यत्र यत्र सामता तत्र तत्र रसवृद्धिरित्यनुमीयते। रस एव विकृतः आमः इति पूर्वमेवोक्तं। मुखस्याविशुद्धिः साममलता च सामताज्ञापकैर्लक्षणौ। स्रोतोरोधश्च सर्वत्र भवतीति पूर्वमेव प्रतिपादितम्। स्रोतोरोधस्थले हि रस एव सज्जति। अतस्तत्रामता रसवृद्धिश्चावश्यं भवतः। अतः स्रोतोरोधं दृष्ट्वा रसवृद्धिरनुमातुं शक्यते। राजयक्ष्मी च "रसं निष्ठीवति कफानुगम् ( च. चि. ८-५१ ) इत्युक्तम्। अत्र च श्लेष्मणा साकं साक्षात् रसः बहिरागच्छतीति अवगम्यते। तच्च कफस्य सामतालक्षणैर्ज्ञायते।



एवं पाण्डुरोगाधिष्ठाने त्वचि श्वैत्यं दृष्ट्वा रसवृद्धिर्वाच्या। सर्वरोगेषु सामता स्रोतोरोधश्च रसवृद्धिज्ञापकौ भवतः।

रक्तवृद्धिः—प्रत्यक्षतः रक्तदर्शनं यथा रक्तपित्तप्रदररक्तार्श रक्तातीसारादिषु। एकदेशे रक्तवर्णदर्शनं यथा कुष्ठवातरक्तविसर्पादिषु। रक्तस्थानस्य वृद्धिदर्शनं यथा यकृत्प्लीहावृद्धिः, सिरापूर्णत्वेन सिरासु वृद्धिर्वाच्या।

मांसवृद्धिः—गलगण्डगण्डमालाग्रन्थ्यर्बुदादिषु प्रत्यक्षतो मांसवृद्धिः दर्शनान्निश्चेतव्या।

मेदोवृद्धिः—स्फिक्स्तनोदरलम्बनेन तथा गण्डादिषु मेदसः प्रत्यक्षदर्शनाच्च निश्चेतव्या।

अस्थिवृद्धिः—अध्यस्थ्यधिदन्तादिषु प्रत्यक्षतोऽस्थिवृद्धि दर्शनात्।

मज्जवृद्धिः—प्रत्यक्षतैयैकदेशे मज्जवृद्धिदर्शनम् मज्जाप्रमेहे मूत्रे मज्जदर्शनम् मज्जपरीपाकादिषु च। तथा नेत्रगौरवं च मज्जवृद्धिज्ञापकम्।

शुक्रवृद्धिः—प्रत्यक्षतयैकदेशे शुक्राश्मर्यादिषु शुक्रदर्शनम्, अतिस्त्रीकामता च बोधकानि लक्षणानि। आर्तवमपि तथा।

पुरीषमूत्रस्वेदानां प्रत्यक्षतया वृद्धिदर्शनादेव वृद्धिर्वाच्या। दूषिकादीनामपि बाहुल्यगुरुत्वादिभिः वृद्धिर्वाच्या। ओजोविवृद्धौ तुष्टिपुष्टिबलोदयः।

अथ धातुक्षयलक्षणानि विचार्यन्ते। धातुक्षये ह्यवश्यं वातकोपः। अतः धातुक्षयलक्षणेषु बहूनि वातवृद्धिलक्षणान्युक्तानि शास्त्रे। तानि च न निर्णायकानि व्यभिचारात्। अतःनिर्णायकानि लक्षणानि कानिचिदुच्यन्ते।

रसक्षये—प्रीणनाभावः, तस्मादुत्पन्नोगात्रशोषः। तथा शब्दासहिष्णुत्वम्।
रक्तक्षये—सिराशैथिल्यं त्वङ्म्लानता नखादिषु रागाल्पता।
मांसक्षये—स्फिग्गण्डोदरशुष्कता।
मेदःक्षये—कृशांगता, स्तनोदरादिषु मेदोऽल्पता।
अस्थिक्षये—प्रत्यक्षतोऽस्थिक्षयदर्शनं यथा कुष्ठादिषु, केशनखपातः।
मज्जक्षये—अस्थिसौषिर्यानुभवः, तिमिरदर्शनम्।
शुक्रक्षये— चिरात्प्रसेकः।
ओजक्षये—दौर्बल्यं, दुच्छायत्वम्, व्यथितेन्द्रियत्वम्।
पुरीषक्षये—वायुरन्त्राणि सशब्दो वेष्टयन्निव, कुक्षौ भ्रमति यात्यूर्ध्वं हृत्पार्श्वे पीडयन् भृशम्।
मूत्रक्षये—अल्पमूत्रता।
स्वेदक्षये—रोमच्युतिः स्तब्धरोमता।

एवमेतानि लक्षणानि रुग्णे दृष्ट्वा तत्तद्दूष्यवृद्धिक्षयौ निश्चेतव्यौ ।

## दोषलक्षणानां विचारः

दोषाणां विविधा गतिरुक्ता—

क्षयः स्थानं च वृद्धिश्च दोषाणां त्रिविधा गतिः ।
ऊर्ध्वं चाधश्च तिर्यक्च विज्ञेया त्रिविधाऽपरा ॥
त्रिविधाचापरा कोष्ठशाखामर्मास्थिसन्धिषु ।
इत्युक्ता विधिभेदेन दोषाणां त्रिविधा गतिः ॥
चयप्रकोपप्रशमाः कालकृता गतिरित्युच्यते ।
गतिश्च द्विविधा दृष्टा प्राकृती वैकृती च या । ( च. सू. १७ )

दोषाणां वृद्धिक्षयनिश्चयश्च स्वगुणकर्मणां वृद्धिहानिभ्यां कर्तव्य इति संक्षेपेण वक्तुं शक्यते । उक्तं च—

दोषाः प्रवृद्धाः स्व लिंगं दर्शयन्ति यथाबलम् ।
क्षीणा जहति लिंगं स्वं समाः स्वं कर्म कुर्वते ॥ ( च. सू. १७-६७ )
दोषप्रकृतिवैशेष्यं नियतं वृद्धिलक्षणम् । ( च. सू. १८-५३ )

वैकृती गतिः विकारकरणसमर्थत्वम् । तच्च वृद्धस्य दोषस्य प्रकोपप्रसराभ्यां भवति । अत एव वैकृतगत्याः रोगकर्तृत्वमुक्तम्—

पित्तादेवोष्मणः पक्तिर्नराणामुपजायते ।
तच्च पित्तं प्रकुपितं विकारान् कुरुते बहून् ॥
प्राकृतस्तु बलं श्लेष्मा विकृतो मल उच्यते ।
सचैवोजः स्मृतः कोये स च पाप्मोपदिश्यते ॥
सर्वा हि चेष्टा वातेन स प्राणः प्राणिनां मतः ।
तेनैव रोगा जायन्ते तेन चैवोपरुध्यते ॥ ( च. सू. १७ )

अनेन च प्रकुपितत्वं विकारकर्तृत्वं च वैकृतीगतिरित्युच्यते । इति ज्ञायते । अतः शरीरे विकारान् दृष्ट्वा दोषाणां वैकृती गतिर्ज्ञायते । विकारकारकदोषाधिष्ठानज्ञानेन ऊर्ध्वाधस्तिर्यग् गतिः, कोष्ठशाखामर्मास्थिसन्धिश्च ज्ञायते । चयादीनां लक्षणानि पूर्वमेवोक्तानि । प्रशमश्चाविकारकर्तृत्वेनैव ज्ञायते ।

इदानीं दोषाणां प्राकृतानां गुणाः कर्माणि, तथा विकृतानां वृद्धानां क्षीणानां च लक्षणानि विचार्यन्ते ।



## प्राकृतवातस्य गुणकर्माणि

( १ ) द्रव्यसंघटना—वाय्वाकाशीयः ।

( २ ) गुणाः— रूक्षः, शीतः, लघुः, सूक्ष्मः, चलः, विशदः, खरः, दारुणः, अमूर्तः, तिर्यग्गः, रजोबहुलः ।

( ३ ) कर्माणि— उत्साहः, उच्छ्वासः, निःश्वासः, चेष्टा, समाधतुगतिः, गतिमतां समोमोक्षः, इन्द्रियोद्योजकः, इन्द्रियार्थानामभिवोढा, सन्धानकरः शरीरस्य, प्रवर्तको वाचः, प्रकृतिः, स्पर्शशब्दयोः, समीरणोऽग्नेः, दोषसंशोषणः स्थूलाणुस्रोतसांभेता, गर्भाकृतिकरः ।

## पंचधाभिन्नस्य वायोः स्थानं चारो व्यापारश्च ।

प्राणः—स्थानम् – मूर्धा –
चारः—उरः, कण्ठः, जिह्वा, आस्यं, नासिका ।
व्यापारः,—बुद्धिहृदयेन्द्रियाचित्तधारणम्, ष्ठीवनं, क्षवथुः, उद्गारः, निःश्वासः, अन्नप्रवेशः, अन्नविधारणम् ।

उदानः– स्थानं – उरः ।
चारः—नासा, नाभिः, गलः ।
व्यापारः,—वाक्प्रवृत्तिः, प्रयत्नः, ऊर्जा, बलं, वर्णः, स्मृतिः ।

समानः—अग्निसमीपस्थः ।
चारः—कोष्ठे चरति सर्वतः, स्वेददोषाम्बुवहस्रोतस्वाधिष्ठितः, ।
व्यापारः—अन्नंगृह्णाति पचति विवेचयति मुंचति । अग्निबलदः ।

व्यानः—स्थानम्– हृदयम् ।
चारः—कृत्स्नदेहचारी, महाजवः ।
व्यापारः— पंचधाचेष्टयाति, स्वेदासृक्स्रावणं रसवहनं ।

अपानः—स्थानम् – पक्वाशयः ।
चारः—वृषणौ, बस्तिः, मेढ्रं, नाभिः, ऊरू, वंक्षणौ, गुदम् ।
व्यापारः—शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रमणं ।

प्राणादिषु क्रुद्धेषुसत्सु रोगाः—प्राणे—हिक्काश्वासप्रतिश्यायस्वरभेदादयः । उदाने—ऊर्ध्वजत्रुगता रोगाः, समाने— गुल्माग्निसादातीसार प्रभृतयः । व्याने— सर्वदेहगाः ज्वरातीसार—रक्तपित्तयक्ष्मप्रभृतयः । अपाने बस्तिगुदाश्रया रोगाः ।

## प्राकृतपित्तस्य गुणकर्माणि

द्रव्यसंघटना—तैजसम् ।
रूपं—नीलं, पीतं । रसः-अम्लं, कटु च । गन्धः-विस्रम् ।

गुणाः—उष्णं, तीक्ष्णं, सस्नेहं, द्रवं, सरम् ।

कर्माणि—पक्तिः, दर्शनम्, ऊष्मा, क्षुत्, तृष्णा, देहमार्दवम् । प्रभा, प्रसादः, मेघा, भ्राजिष्णुता, अन्नरुचिः ।

## पंचधाभिन्नस्य स्थानानि कर्माणि च ।

( १ ) पाचकः—स्थानं—पक्वामाशयमध्यं ( पित्तधरा कला ) ।
कर्म – आहारपचनं, सारकिट्टविभजनम् । अग्निकर्म, अन्य-पित्तस्थानानुग्रहः ।

( २ ) रंजकः—यकृत्प्लीहानौ, आमाशयश्च ।
कर्म—रसरागः ।

( ३ ) साधकः—स्थानम् हृदयम् ।
कर्म—बुद्धिमेवाभिमानाद्यैरभिप्रेतार्थसाधनम् ।

( ४ ) आलोचकः—स्थानं—दृष्टिः ।
कर्म—रूपालोचनम् ।

( ५ ) भ्राजकः—स्थानं—त्वक् ।
कर्म—अभ्यंगपरिषेकावगाहादिपाकः त्वग्भ्राजनं ।

आलोचकं पित्तं द्विविधं—चक्षुर्वैषयिकः बुद्धिवैषयिकश्चेति । तत्राद्यः आत्ममनः संनिकर्ष ज्ञानमुदीरयित्वा चित्ते चित्तमव्याधाय संस्वेदजाण्डजोद्भिज्जानां चतुर्णां भूतग्रामाणां लक्षणसंस्थान—रूपवर्णस्वरैश्चानां पुष्पफलपत्राणां रूपानिर्वृ-स्यर्थमेकैकं द्वौ ( द्वयोः ) पात्र ( द्र्ध ) या ( : ) सर्वेषां वा युगवत् प्रणिपति-तानां चक्षुषा वैषम्यमुत्पादयतीति चक्षुर्वैषयिकः । बुद्धिवैषयिकः भ्रूवोर्मध्ये शृंगाटकस्थः सुसूक्ष्मानर्थानात्मकृतान् गृह्णाति, गृहीतं धारयति, धारितं प्रत्युदाहरति, अतीतं स्मरति, प्रत्युत्पन्नं कृत्वानागतं प्रार्थयति जातमात्रश्च पुनरनुपादिष्टस्वभावः मातुस्तन्यमभिलषति ध्याने प्रत्याहारे याजनाच्च बुद्धिवैशे-ष्यमुत्पादयाति ( भेलसंहिता )

## श्लेष्मणः प्राकृतगुणकर्माणी ।

द्रव्यसंघटनाः—पृथिव्यम्ब्वात्मकम् ।

रूपं—शुक्लम्, रसः मधुरः, ।

गुणाः—गुरुः, शीतः, मृदुः, स्निग्धः, स्थिरः, पिच्छिलः, मन्दः, श्लक्ष्णः, मृत्स्नः ।



कर्माणिः—गौरवं, स्नेहः, स्थिरत्वं, बन्धः, वृषता बलम् क्षमा, धृतिः, अलोभः, दार्ढ्यम्, उपचयः, वृषता, ज्ञानम् ।

## पंचधाप्रविभक्तस्य स्थानकर्माणि ।

( १ ) क्लेदकः—स्थानम्—आमाशयः ।
कर्म—अन्नसंघातक्लेदनम्, अन्यश्लेष्मस्थानानुग्रहः । उदककर्म

( २ ) अवलम्बकः—स्थानं-उरः ।
कर्म—त्रिकसन्धारणमात्मवीर्येणान्नरससंहितेन हृदयावलम्बनं करोति ।

( ३ ) बोधकः—स्थानं—जिह्वामूलः कण्ठः ।
कर्म—जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्तते ।

( ४ ) तर्पकः—स्थानम्-शिरः ।
कर्म—स्नेहसन्तर्पणाधिकृतत्वात् इन्द्रियाणामात्मवीर्येणानुग्रहं करोति ।

( ५ ) श्लेषकः—स्थानं-सन्धिस्थः ।
कर्म—सर्वसंधिसंश्लेषात् सर्वसन्ध्यनुग्रहं करोति ।

## वात-वृद्धिलक्षणानि

द्रव्यात्मकानिः— रूपतः–श्यावः, अरुणवर्णः । रसतः–कषायमुखः, विरसमुखः ( ग्रहण्यां ) । शब्दतः-श्वासः-कर्णक्ष्वेडः ( पाण्डौ ) । स्वनः कर्णयोः-उच्छ्वासाधिक्यं,- ( उन्मादेः ) । अल्पेऽपिचेष्टितेश्वासः-आध्मानम्- ( उदरे ) । उद्गारबाहुल्यं-अन्त्रकूजनं-आटोपः ( गुल्मेः ) । सशब्दमुपवेशः ( अतीसारे ) । स्पर्शतः-आनाहःगुल्मेः ।

गुणात्मकानि—रूक्षगुणतः—तर्षः । रौक्ष्यं-त्वक्स्फोटः, ( पाण्डुः ) पुरीषस्याति-वर्तनं( गुल्मे ) । शोषः-रौक्ष्यं ( कुष्ठे ) ।

शीतगुणतः—शैत्यं, संगः, सुप्तिः, संकोचनं, स्तम्भनम्, खंजता । शिशिरद्वेषः ( पाण्डौ ) । सततं लोमहर्षः ( उन्मादे ) । अंगेषु सुप्तता ( प्रमेहे ) वातपुरीषसंगः ( उदरे ) । सुप्तता-परिहर्षः-लोमहर्षः ( कुष्ठे ) । हृद्ग्रहः ( अपस्मारे ) ।

लघुगुणतः—लाघवं । अल्पाल्पमुपवेशः ( अतिसारे ) । निद्रानाशः ( अपस्मारे )

चलगुणतः—गतिः, अनवास्थितता, स्रंसः, भंगः व्यासः कम्पः चालः चेष्टा । भ्रमः ( पाण्डौ ) । सत्वपरिप्लवः-भक्तिविभ्रमः-पर्याकुलादृष्टिः-अबद्धवा-

[illegible]म् ( उन्मादे ) । अभीक्ष्णं काये विसर्पागमनम् ( कुष्ठे ) । अग्निवैषम्य-[illegible]वान् ग्रन्थिः ( गुल्मे ) । यदात्वब्धातुः मूत्रमार्गेण प्रवर्तते तदाऽपि [illegible]समकालम्-पुरीषं विना-सम्यग्वायुर्न गच्छति गुदेन ( अतिसारे ) स्फुरणं । [illegible]ः ( अपस्मारे ) । जृम्भणं ( मूर्छायां-ज्वर-पूर्वरूपे )

विशदगुणतः—अमूर्तत्वं, वैशद्यं सौषिर्यं । शिरसः शून्यता ( उन्मादे )

खरगुणतः—खरत्वं-परुषत्वं ( कुष्ठे ) दारुणगुणतःमलस्य काठिन्यं ।

[illegible]गुणतः—

कर्मात्मकानि—भेदः, मर्दः, व्यथा । सादः-शूलः-श्रमः-पिण्डिको-द्वेष्टनं ( पाण्डौ ) तोदः-स्पर्शाज्ञत्वं-अतिस्वेदनं अस्वेदनं वा-तोदः-पक्वदग्धादिषु [illegible]वेदना श्रमः-क्लमः- ( कुष्ठे ) । तृष्त्य-क्षमत्वं-शरीरसादः-कुक्षिशूलः ( गुल्मे ) । सशूलमुपवेशः ( अतिसारे ) । पक्वचेत्सरुजं-अस्थिपर्वरुक्-सामं [illegible]जीर्णेऽप्यजीर्णे पक्वंतु नैव वा ( ग्रहण्यां ) ।

## पित्तवृद्धिलक्षणानि ।

द्रव्यात्मकानि—रूपतःशुक्लारुणवर्ज्यो वर्णः रागः । विण्मूत्रपीतता-हरितत्वं-हारिद्रत्वं ( पाण्डुरोगे ) । रसतः-कटुकः, अम्लः-तिक्तः । तिक्ताम्लोद्गारः धूमोद्गारः ( ग्रहण्यां ) गन्धतः-विस्रः । लोहाम्लगन्ध्युद्गारः-धूमोद्गारः-पक्वंचेद्विस्रंपुरीषम् ( ग्रहण्याम् ) । दुर्गन्धश्वासः-अंगगन्धः ( प्रमेहे )

गुणात्मकानि—उष्णगुणतः—औष्ण्यं, स्वेदः, मूर्च्छा, ओषः, प्लोषः, दवथुः, धूमकः, क्षुत् । अन्नस्य विदाहः-तृष्णा-दाहः-ज्वरः-तमकः- ( ग्रहण्याम् ) ज्वरश्चाभीक्ष्णं ( उन्मादे ) भुक्तस्य विदाहः ( गुल्मे ) । अंगेषु-परिदाहः पिपासा-शीत--प्रियत्वं ( प्रमेहे ) । भुक्तं विदह्यते ( उदरे ) । परिदाहः-उष्मायणम् ( कुष्ठे ) ज्वरः ( पाण्डौ ) संतापः-वैचित्यं-अरतिः-ग्लानिः ( ज्वरे ) स्वेदः। ( अपस्मारपूर्वरूपे ) ।

तीक्ष्णगुणतः—अंगावदरणं । बह्वाशित्वं ( प्रमेहे ) । पाकः ( उदरे ) ।

द्रवगुणतः—क्लेदः, कोथः, स्रावः, शोणितक्लेदः, मांसक्लेदः ।

अनतिस्नेहगुणतः—मार्दवम् ।

लघुगुणतः—

सरगुणतः—अतिसारः । अतिद्रवमुपवेशः ( ग्रहण्यां ) भ्रमः ( पाण्डौ )

कर्मात्मकानि—कण्डूः, सदनं, चर्मदलनं, रक्तकोठः, रक्तविस्फोटः, रक्त-पित्तम्, अल्पनिद्रता । अधीरता-हृदयं च शून्यं ( उन्मादे साधकपित्तदुष्टिः ) क्रोधनत्वं ( पाण्डुरोगे ) तमसोदर्शनम् ( अपस्मारेपूर्वरूपे )



## श्लेष्मवृद्धिलक्षणानि ।

द्रव्यात्मकानि—रूपतः-श्वैत्यम्, मुखस्रावः, श्लेष्मोद्गिरणं, श्वेतमूत्र-वर्चस्त्वम् । मलस्याधिक्यं ( अतिसारे ) लालास्रुतिः सिंघाणकस्रुतिः ( अपस्मार-पूर्वरूपे ) शुक्लमूत्रता – मुखमाधुर्यम् ( प्रमेहे )

गुणात्मकानि—

गुरुगुणतः—गौरवम्, तृप्तिः, गुरुगात्रता, ( ज्वरपूर्वरूपे ) अतिस्थौल्यम् गुरुगात्रता–तन्द्रा–घनांगता ( प्रमेहे ) । तन्द्रा ( उदरे ) गौरवं ( कुष्ठे–पाण्डौ च ) निद्रालुत्वं ( पाण्डौ ) ।

शीतगुणतः—शैत्यं, शीताग्निता, सुप्तिः । सुप्तता–परिहर्षः– लोमहर्ष : ( कुष्ठे ) । शिशिरद्वेषः ( पाण्डा ) ।

मृदुगुणतः–शैथिल्यं ( ग्रहण्यां ) । शिथिलांगता ( प्रमेहे ) ।

स्निग्धगुणतः–स्नेहः, क्लेदः । स्निग्धांगता ( प्रमेहे ) ।

स्थिरगुणतः—स्थैर्यः, स्तैमित्यं । आलस्यं ( प्रमेहे–ज्वरपूर्वरूपे च )

पिच्छिलगुणतः—उपलेपः, बन्धः, धमनीप्रतिचयः । पिच्छिलगात्रता ( प्रमेहे ) केशानां जटिलीभावः ( प्रमेहे ) ।

मन्दगुणतः—अपाक्तिः, चिरकारित्वम् ।

श्लक्ष्णगुणतः—श्लक्ष्णांगत्वं । अतिश्लक्ष्णता ( कुष्ठे ) ।

कर्मात्मकानिः—कण्डूः, काठिन्यं । शोफः, गलगण्डः । ज्ञानविभ्रमः संज्ञाविभ्रमः– बुद्धिविभ्रमः ( तर्पककफदुष्टिः–उन्मादे ) नखानां वृद्धिः–शय्यास-नस्वप्नसुखे रतिः ( प्रमेहे ) । स्वल्पानामपि व्रणानां दुष्टिः असंरोहण च ( कुष्ठे ) अरुचिः–शूनाक्षिकूटत्वं ( पाण्डौ ) ।

## दोषक्षयलक्षणानि ।

वातक्षये—मन्दचेष्टता अल्पवाक्त्वं अप्रहर्षः, मूढसंज्ञता ।

पित्तक्षये—मन्दोष्माग्निता, निष्प्रभता ।

श्लेष्मक्षये—रूक्षता, अन्तर्दाहः, आमाशयेतरश्लेष्मशयशून्यता, सन्धि-शैथिल्यं, भ्रमः हृद्रवः ।

तत्तत्प्राकृतगुणकर्महान्या तत्तदोषक्षयो वाच्यः । अत्र चायं विशेषः एकत्र क्षये दृष्टेऽप्यन्यत्र तस्यैव वृद्धिर्भवेत् । यथा ज्वरे कोष्ठेऽग्निमान्द्येन पित्तक्षयेऽनुमितेऽपि त्वाचि तस्योष्मणः आधिक्यं दृश्यते । अथवा तद्विरुद्धगुणवतो वृद्धिर्भवेत् ।

यथा श्लेष्मक्षये रूक्षता तद्विपरीतगुणस्य वातस्य वृद्धया भवति। एवमन्तर्दाह पित्तवृद्धया भवति। दोषाणांक्षयविनिश्चये बहुशः प्रमादो भवति। अतोऽत्राप्रमत्तेन विचार्य रुग्णलक्षणानि बहुशः परीक्ष्य निश्चेतव्यानि।

दोषाणां क्षयः एकदेशीय एव भवति। उक्तं च वैषम्यगमनम् पुनर्धातूनां वृद्धिह्रासगमनमकात्स्न्येनैव ( च. वि. ६ ) नित्यं शरीरे उत्पद्यमानानां तेषां सार्वदेहिकक्षयः नैव सम्भवति। वातोहि नित्यं प्राणवहस्रोतसा पूर्यते तथा भुक्तान्नात् किट्टरूपेणोत्पद्यते। अनशने सति किट्टोद्यपि वायुर्नोत्पद्येत तथाऽपि धातूनां क्षपणात् रिक्तेषु स्रोतःस्यु लब्धास्पदो वृद्धिमेति। अत एवातिलंघनेन निद्रानाशः हृन्मूर्धादिरुजा, उर्ध्वानिलादयो भवन्ति। आहारवर्जितः अग्निः धातून् पचति। रक्तस्य पाकेन तन्मलरूपतया पित्तोत्पत्तिः भवत्येव। ज्वरतृष्णादयश्चात्र पित्तवृद्धिलक्षाणानि भवन्ति। वृद्धपित्तस्योपशमनार्थमेव निम्बूपानकपानमुपवासकाले कर्तव्यतयोपादिश्यते नैसर्गिकोपचारकैः। अरुच्यादयश्चात्रकफवृद्धिलक्षाणानि भवन्ति।

यस्यकस्याप्याहारस्य सेवनेन एकस्यह्रासेऽप्यन्यस्य वृद्धिरवश्यं भवत्येव। वृद्धिह्रासयोः सापेक्षिकत्वात्। उक्तं च – यद्धि यस्य धातोर्वृद्धिकरं तत्ततो विपरीतगुणस्य प्रत्यवायकरं सम्पद्यते ( च. शा. ६-५ ) अव्यायामातिस्वप्नादयः वातक्षयकरा अपि श्लेष्मणां वर्धयन्त्येव। तत्राऽपि श्लेष्माणि वृद्धे मेदसि च वृद्धे तयोरावृतमार्गत्वात् कोष्ठे वायोर्वृद्धिः तथा ऽग्नेरपि वृद्धिः। एवं वातक्षयकारकैरप्याहारविहारैः एकदेशे एव तस्य क्षयो भवति अन्यत्रैकदेशे वृद्धिर्भवति इति ज्ञायते। अत एव रुग्णे एकत्र एकस्य दोषस्य क्षयलक्षणानि उपलभ्यन्तेऽन्यत्र च तस्यैव वृद्धिलक्षणान्यनुमीयन्ते।

वातस्य क्षयः प्रायशः स्रोतोरोधादेव भवति। यथा वातकफज्वरे प्राणवहेषु स्रोतस्सु कफावरुद्धेषु सत्सु वातक्षयेण अंगावसादो भवति। तत्राऽपि मुखादिषु श्यावतादर्शनेन वातवृद्धिरप्यनुमीयते। तदानी पाश्चात्यचिकित्सकैः विशिष्टवायोः ' जारक ' आख्यस्य प्रदानेन वातक्षयापनोदने प्रयत्यते। ग्रहणीरोगे मलेन साकं पित्तस्यातीव बहिर्गमनात् पित्तक्षयलक्षणान्युत्पद्यन्ते। तत्र गोपित्ताद्युपयोगेन पित्तवर्धनकर्म क्रियते। अत्राऽपि प्रथमं वृद्धस्येव पित्तस्य क्षयः, नह्यवृद्धं पित्तं मलेन बहिरायाति। राजयक्ष्मारोगे श्लेष्मा बहिर्गच्छति। ततः श्लेष्मक्षये सति उरसि शून्यता भवति। श्लेष्माशयानां शून्यत्वं च तदैवोपलभ्यते। तत्राऽपि कासेन साकं श्लेष्मणो बहिरागमनं दृष्ट्वा कफवृद्धिप्युनुमीयते। अत एव तस्यैकदेशीयक्षय इत्युच्यते।

दोषक्षयोक्तलक्षणानि सर्वाण्यपि तद्विरुद्धगुणावद्दोषवृद्धावपि भवन्तीत्युक्तानि संहितासु। यथा भ्रमः कफक्षयोक्तोऽपि रजःपित्तानिलाद्भवतीत्युक्तम्



शैत्यं पित्तक्षयोक्तोऽपि वातकफयोः शीतगुणवृद्ध्याऽपि भवति। अंगसादो वातक्षयेऽपि वातवृद्धाप्युक्तः। अतः कफक्षये वातपित्तवृद्धया भ्रमः, पित्तक्षये शीतगुणवृद्धया शैत्यमित्यादि ज्ञेयम्।

# रोगविनिश्चयः

रुग्णस्य सर्वाणि स्रोतांसि तत्रस्थान् भावविशेषांश्च द्विविधया त्रिविधया वा परीक्षया सम्यग् सर्वथा परीक्ष्य तत्तत्स्रोतास्सु ज्ञातानि लक्षणानि संग्राह्याणि। तत्र प्राकृतलक्षणैः रुग्णस्य प्रकृतिः निश्चेतव्या। विकृतिलक्षणैश्च पूर्वोक्तरीत्या सम्प्राप्ति घटकानि निश्चेतव्यानि। रुग्णेषु प्रायशो दोषवृद्धिलक्षणान्येव दृश्यन्ते। यत्र च स्रोतोदुष्टिलक्षणानि दृश्यन्ते यत्र च दूष्यवृद्धिलक्षणानि दृश्यते तत्रैव रोगाधिष्ठानमित्यनुमेयम्। यस्य च धातोर्वृद्धिः दृश्यते तस्यैव दूष्यत्वं मन्तव्यम्। यस्य धातोः युगपत् वृद्धिक्षयौ दृश्येते तस्य दूष्यत्वविनिश्चयः सुकरः। रोगाधिष्ठितस्रोतासि यस्य दोषस्य युगपत् वृद्धिः क्षयश्च दृश्येते तस्य स्थानिकत्वविनिश्चयः कर्तव्यः। यस्य च दोषस्य लक्षणानि बहुषु स्रोतःसु दृश्यन्ते तस्यैव आगन्तुदोषत्वं निश्चेतव्यं। एवमागन्तुदोष स्थानिकदोषं, दूष्यं, स्रोतः अधिष्ठानं च सम्यग्विनिश्चित्य रोगविनिश्चये प्रयतितव्यं। रुग्णवचनैश्च रोगसम्प्राप्तिरुद्भवप्रकारः अतीतावस्था चोन्नेया। आप्तवाक्याच्च प्रत्येकरोगस्य सामान्यसम्प्राप्तिं सामान्यलक्षणानि चावगम्य रुग्णे दृश्यमानलक्षणेषु सम्प्राप्तिघटकेषु च आप्तोक्तसामान्यलक्षणसामान्यसम्प्राप्तिं दृष्ट्वा रोगो निश्चेतव्यः ततो विशिष्टलक्षणविशिष्टसम्प्राप्तिभ्यां रोगोवान्तरभेदो निश्चेतव्यः। यदि ग्रंथोक्तरोगसामान्यसम्प्राप्तिर्नोपलभ्यते तदा केवलं सम्प्राप्तिघटकज्ञानेनैव चिकित्सा निश्चेतव्या। रोगनामानिश्चयेऽपि न हानिः, सम्प्राप्तिज्ञानमेव चिकित्सायां प्रयोजकमिति पूर्वमेव प्रतिपादितं। उदाहरणत्वेनास्य निबन्धस्यान्ते त्रीण्यातुरपत्रकाणि संयोजितानि।

## रोगलक्षणयोर्भेदनिश्चयः

एकस्मिन् रोगे बहूनि लक्षणानि भवन्ति। कुपिता दोषाः दूष्येण आमेन च साकं यत्र यत्र प्रसर्पन्ति तत्र तत्र लक्षणान्युत्पादयन्ति। समाने एव रोगे भिन्नव्यक्तिषु विभिन्नानि लक्षणानि भवेयुर्दोषांशांशविकल्पानुसारं। यानि च रोगत्वेन भवन्ति तानि च लक्षणत्वेनाऽपि भवितुमर्हन्ति। यानि च लक्षणत्वेन भवन्ति तानि रोगत्वेनाऽपि भवितुमर्हन्ति। उक्तं च–

लिंगचैकमनेकस्य तथैवेकस्य लक्ष्यते।
बहून्येकस्य च व्याधेर्बहूनां स्युर्बहूनि च॥ ( च. नि. ८-२७ )

ज्ञानार्थं यानि चोक्तानि व्याधिलिंगानि संग्रहे ।
व्याधयस्ते तदात्वे तु लिंगानीष्टानि नामयाः । ( च. नि. ८-४० )

ये निदानस्थाने ज्ञानार्थे प्रधानभूतज्वरादिज्ञानार्थे व्याधयः सन्ति, तेऽपि पाकारुच्यादयः, स्वातन्त्र्येणोत्पद्यमाना व्याधय एव व्याधित्वेनैव व्यपदेष्टव्या इत्यर्थः. तदात्वे तु लिंगानीति यदा ज्वरादिपरतन्त्रा जायन्तेऽरुच्यादयः तदा पारतन्त्र्याल्लिंगान्येव ते नामयाः । आमयो हि स्वतन्त्रः स्वचिकित्साप्रशमनीयो भवतीत्यायुर्वेदस्थितिः, ज्वरलिंगरूपास्त्वरुच्यादयो ज्वरचिकित्साप्रशमीया एवेति भावः । ( चक्रपाणिः ) अत्र च स्वचिकित्साप्रशमनीय आमयः परचिकित्साप्रशमनीयानि लिंगानीति चक्रपाणिवचनं वस्तुस्थितिमात्रकथनं । यथार्थतः चिकित्सानिश्चयात्पूर्वमेव रोगविनिश्चयः कर्तव्यः । यदा सर्वथा कर्तुमशक्यता तदा चिकित्सया रोगविनिश्चयः कर्तव्यः । चिकित्सानिश्चयात्पूर्वं रोगलक्षणयोर्भेदज्ञानं कथमिति विचार्यं । तदर्थे प्रथमं रोगः कः इति विचार्यते ।

## रोगः कः ?

दोषवैषम्यं रोगः, धातुवैषम्यं रोगः, दोषदूष्यसम्मूर्च्छनाजनितो रोगः, लक्षणसमुच्चयात्मको रोगः, इति च बहवो मतभेदाः आपाततो विरुद्धाः दृश्यन्ते शास्त्रेषु तद्व्याख्यानेषु च । यथार्थतस्तु चरककृतं विकारवर्णनं अपवादं मन्ये तत्र हि–

विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते ।
सुखसंज्ञकमारोग्यं विकारो दुःखमेव च ।। ( च. सू. ९ )

यद्दुःखकरं स विकार इत्युच्यते । सुश्रुतोऽप्येतदनुसारेण दोषधातुमलानां वैषम्यं व्याह " तस्मात् पुरुषोऽधिष्ठानं, तद्दुःखसंयोगाव्याधयः " ( सु. सू. १-२० ) तस्य पुरुषस्य दुःखं कायवाङ्मानसपीडा, विविधं दुःखमादधातीति व्याधयः, तस्य पुरुषस्य दुःखाय अथवा तस्य पुरुषस्य येषु सत्सु यैर्वा कारणभूतैः येभ्यो वा दुःखं जायते ते व्याधयः ( डल्हणः ) तस्य च व्याधेः दोषवैषम्यादयः अवस्थाविशेषा एव । तत्र यथा दुष्टेन दोषेणेति दोषदुष्टिरेव व्याध्येकदेशः । प्रकोपप्रसरौ च दोषस्यैषावस्थाविशेषौ । तत्रैव यदि न प्रतिकारः क्रियते तदा स दोषः विगुणस्रोतःसु सज्जन् धातून् प्रदूषयन् पूर्वरूप क्रमेण व्यक्तलक्षणानि च करोति । एषैव आमयस्य निर्वृत्तिः । लक्षणसमुच्चयस्यव्यक्तावस्थायां व्याधिपदव्यवहारो मुख्यः । अत एव " स्वधातुवैषम्यनिमित्तजा ये विकारसंघाः " इत्युक्तं (च. सू. १९-६) तथा तेषामागन्तवोऽभिघातनिमित्ताः, शारीरास्त्वन्नपानमूलाः वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः ( सु. सू. १-२० ) तथा स्थानसंश्रये व्यक्त्यवस्थायां च



व्याधिपदप्रयोगः कृतः सुश्रुतेण न ततः पूर्वावस्थासु ( सु. सू. २१ ) " रोगस्तु दोषवैषम्यं " इति वदता वाग्भटेनाऽपि तुशब्दः हेत्वर्थकः प्रयुक्तः ( अ. हृ. सू. अ. १ अरुणदत्तः )

दोषदूष्यसम्बन्धं विना न रोगोत्पत्तिरिति चरकेणाऽप्युच्यते । "इहखलु निदानदोषदूष्याविशेषेभ्यो विकारविधातभावाभावप्रीतीविशेषा भवन्ति, यदा ह्येते त्रयो निदानादिविशेषाः परस्परं नानुबध्नन्त्यथवा कालप्रकर्षादबलीयांसोऽथवानुबध्नन्ति न तदा विकाराभिनिर्वृत्तिः,चिराद्वाप्यभिनिर्वर्तन्ते, तनवो वा भवन्त्ययथोक्तसर्वलिंगावा, विपर्यये विपरीताः ( च. नि. ४-४ ) अत्र च निदानदोषदूष्याणां परस्परसम्बन्धे रोगाः नोत्पद्यन्तु इत्युक्तं भवति दूष्यविशेषाद्धि विकारविशेषा भवन्ति 'प्रकुपितास्तु खलु ते प्रकोपविशेषादूष्यविशेषाच्च विकारविशेषानभिनिर्वर्तयन्त्यपरिसंख्येयान् " । ( च. नि. ६-७ ) किंच तत्र त्रयः शरीरदोषाः वातपित्तश्लेष्माणः, ते शरीरं दूष्यन्ति, द्वौ पुनः सत्वदोषौ रजस्तमश्च तौ सत्वं दूष्ययतः । ताभ्यां च सत्वशरीराभ्यां विकृतिरूपजायते नोपजायते चाप्रदुष्टाभ्याम् ( च. शा. ४-३४ ) अत्र च दोषेभ्यः शरीरदूषणं विकारोत्पत्तावावश्यकमित्युक्तं भवति । शरीरं हि दोषधातुमलमूलं भवति, अतो दोषेभ्यः शरीरदुष्टिरित्युक्ते दोषेभ्यो दूष्यदुष्टिरित्यायातम् ।

अयं चात्र गमनार्हो विषयः । दोषाः दुष्टा इति कथं ज्ञायते ? लक्षणैः खलु, लक्षणानि च कुत्रोत्पाद्यन्ते, धातुमलेषु मनसि वा, अतः दुष्टेभ्यो दोषेभ्यो दूष्यसंसर्गं विना लक्षणानि नोत्पोद्यन्ते । अतो व्यक्तलक्षणानि दृष्ट्वा दूष्ये अवश्यं वैषम्यं निश्चीयते । केवलं दोषैर्हि वेदना नोत्पाद्यते ।

वेदनानामधिष्ठानं मनोदेहश्च सेन्द्रियः ।
केशलोमनखाग्रान्नमलद्रवगुणैर्विना ।। ( च. शा. १-१३६ )

येच रोगाः दोषदुष्टदूष्येषूक्ताः तेषु दुष्टदोषाणां गतिः दूष्येष्वेवभवति । सर्वेषामेव रोगाणामन्तर्भावः कृतः चरकेण " तेषां सर्वेषामेव वातपित्तश्लेष्माणो दुष्टा दूषयितारो भवन्ति दोषस्वभावात् । वातादीनां पुनर्धात्वन्तरे कालान्तरे प्रदुष्टानां विविधाशितपीतीयेध्याये विज्ञानान्युक्तानि । एतावत्येव दुष्टदोषगतिर्यावत् संस्पर्शनाच्छरीरधातूनाम् ।" (च. शा. ६-१८) "......विविधाशितपीतीयोक्तदुष्ट्या सर्वदुष्ट्युपसंग्रहो भवतीति दर्शयन्नाह–एतावत्येवेति–यावत् स्पर्शनादिति स्पर्शसम्बन्धात् तेन, शरीरधातूनां यावत् स्पर्शनाद्दुष्टदोषगतिर्भवति, सा च सर्वाविविधाशितपीतोयोक्तैव न ततोऽधिका दुष्टिर्देहस्यास्ति ( चक्रः )

यदा रोगाऽबोधकानि संचयादिकृतानि अव्यक्तानि लक्षणानि ज्ञायन्ते तदा अत्यल्पदूष्यावैषम्यमनुमीयते । अल्पत्वादेवात्र विकारत्वेऽपि न मुख्यत्वेन

व्याधिपदव्यवहारः। यदा चामुकोज्वरादी रोगविशेषः उत्पत्स्यते इत्यनुमातुं शक्यते
तदा दोषस्य दूष्ये सम्यगाश्रयणप्रारम्भः, अधिष्ठाने क्षोभोत्पत्तिश्चानुमीयते। यावत्
स्थानस्थितदोषदूष्यप्रक्षोभस्य असम्पूर्णता तावत् पर्यन्तं न लक्षणानां व्यक्तिर्भवति।
आगन्तुदोषेण स्थानिकदोषदूष्येषु विक्षोभोत्पत्त्या सम्मूर्च्छनानुमीयते। मेलनविशेषः
संक्षोभकारकः सम्मूर्च्छनाशब्देनोच्यते। तत्रागन्तुदोषेण स्थानिकदोषस्य प्रकोपणं,
दूष्यगुणकर्माभिभवश्च भवति। सम्मूर्च्छनाशब्दश्च स्थानिकदोषस्य प्रकोपणार्थे
संहितासु क्वाचिदुपयुक्तः यथा—

आमशेषे निरूहेण मृदुना दोष ईरितः।
मार्गं रुणद्धि वातस्य हन्त्यग्निं मूर्च्छयत्यपि ॥ ( च. सि. अ. ७-१५ )

मूर्च्छयतीति मार्गावरोधात्कोपयति। ( चक्रः )।

कफसम्मूर्छितो वायुः स्थानात्पित्तं क्षिपेद्बली। ( च. चि. १६-१२६ )
अत्रापि कफावरोधेन कुपितो वायुरित्यर्थः—मेलनविशेषे—प्युक्तः— यथा " कफ)
पित्तावरुद्धस्तु मारुतो रसमूर्च्छितः ( सु. उत्तर-४२-१३१ ) रसमूर्च्छितो
रससंयुतः ( डल्हण )

स्रोतःसु रुद्धमार्गेषु कफश्चोदकमूर्च्छितः। ( च. चि. अ. १३-४६ )

मधुरव्योषतिवृतैस्तु रक्ते कफविमुर्च्छित। ( च. सि. ८-३३ )

अत्र च दूष्ये संसृष्टेन दोषेण दूष्यगुणाभिभवः क्रियते।

मूर्च्छनाद्यच्च सम्मूढमन्त्रं। ( च. चि. १३-१८७ )

अत्र च मूर्च्छनात् अन्त्राणां क्रियानाशो भवति। पारदमूर्च्छनायामपि
पारदस्य क्रियानाशः चंचलत्वादिनाशेनोपलभ्यते।

एवमागन्तुदोषेण स्थानिकदोषे दूष्ये च यदा विक्षोभः उत्पाद्यते, उभयोर्मेलनं
च भवति तदा रोगः प्रव्यक्तो भवति। अभिघाताद्यागन्तुकारणेन च प्रथमं स्थानिक
दोषदूष्यदुष्टिः स्रोतोदुष्टि ततश्च आगन्तुदोषसम्बन्धः आमोत्पत्तिश्च भवति। तत्र हि
वेदनानुभवः स्थानिकदोषदूष्यवैषम्यादेव। ततश्च आगन्तुदोषसम्बन्धे आमोत्पत्तौ
च विशिष्टलक्षणोत्पत्तिः। तत्सम्बधाभावे स्थानिकदूष्यदोषोपशमात् वेदनोपशमो
भवति। उक्तं च चक्रेण—आगन्तावपिहि वातादिलिंगं शरीरक्षोभादवश्यं भवति।
परं तत् कियन्तमपि कालं वातादिचिकित्साप्रयोजनकं न भवति, यदुक्तं " तत्रा-
भिघातजो वायुः प्रायो रक्तं प्रदूषयन् " ( च. चि. अ. ३) तथा आगन्तुरन्वेति
निजं विकारं ( च. सू. अ. १९ )। मानसेऽपि कामादौ दोषकोपो भवत्येव
यदुक्तं कामशोकभयाद्वायुः ( च. चि. अ. ३ )..... आगन्तावपि कालानु-
बन्धाद्दोषक्रियया फलं भवति ( चक्रः सु. सू. २४-८ )



एवं सम्मूर्च्छनायां सम्पूर्णायां लक्षणानि प्रव्यक्तानि भवन्ति। प्रव्यक्त-
लक्षणैश्चाभ्यन्तरविकृतिर्ज्ञायते। सा चाभ्यान्तरविकृतिः प्रव्यक्तावस्थायां विद्य-
माना दोषदुष्यवैषम्याग्निमान्द्यस्रोतोरोधादिरूपा तथा आमपूयकोथाश्मरीप्रभति-
व्यापन्नद्रव्यरूपा च भवति। एतेषामाभ्यन्तरविकृतिघटकानां समूह एव रोगः।
तेनैव दुःखमुत्पाद्यते। प्रतिक्षणं तेषां दोषादीनां वैषम्यगमनरूपव्यापार एव संप्राप्तिः।

" निरोधे कारणं तस्य नास्ति नैवान्यथा क्रिया " ( च. सू. १६-३३ )
इति न्यायेन यद्यपि धातुवैषम्यं क्षणिकत्वेन विनश्वरं, तथाऽपि विनश्यदपि
तद्धातुवैषम्यं स्वकार्यं विषममेव धातुमारभते, एवं सोऽप्यपरं विषममिति न
धातुवैषम्यसन्ताननिवृत्तिर्धातुसाम्यजनकहेतुं विना " ( चक्रः ) अतस्संप्राप्ति-
घटकानां विषमानां सन्तानानुवृत्तिर्यावत्तिष्ठति तावद्रोगस्तिष्ठति। सा सन्तानानु-
वृत्तिरूपसत्तानुकूलव्यापारः सम्प्राप्तिः। अतस्सम्प्राप्तिरोगयोर्भेदोऽत्यल्पः।

एवं लक्षणसमुच्चयज्ञायमानाभ्यन्तरविकृतिपरंपरा एव रोगः, दोषवैषम्या-
दयो रोगनिष्पादकाः, तत्र दुष्टो दोष एव विभिन्नावस्थासु परिवर्तमानः दूष्या-
दीन् दूषयन् रोगमुत्पादयाति। लक्षणानिचाभ्यन्तरविकृतिबोधकान्येव न तु साक्षा-
द्रोगः अत एव केवलं लक्षणानां धात्वादिव्यापन्नजनित क्रियादीनां वा नाशे न
रोगनाशः, यथा संततज्वरादिषु विशिष्टप्रभाववद्द्रव्यसेवनेन लक्षणेश्वपगतेष्वपि
आयुर्वेददृष्ट्या न रोगापगमः। यथार्थतो धातुवैषम्यापगम एव रोगापगम
उच्यते। निरोधे कारणं नास्ति इति न्यायेन विषमधातूनां नाशः स्वयमेव भवति।
किंतु वैषम्यगमनात्मकव्यापारस्य नाशे पुनर्वैषम्यानुत्पादः। अतस्तद्व्यापाररू-
पायाः सम्प्राप्तेर्नाशे रोगः सर्वथा नष्टो भवति।

एवं केवलं लक्षणं लक्षण-समुच्चयो वा न रोगः इति सिद्धम्। न हि
विकृतसंत्तापमात्रं ज्वररोगः किन्तुविकृतसन्तापादिभिर्लक्षणसमुच्चयैः ज्ञायमाना
ज्वरोक्तसम्प्राप्तिमतो विकृतिरेव रोगः। यदा च लक्षणसमुच्चयेन दोषस्यामाशाय-
प्रवेशः, पक्तिस्थानाद्वह्नेर्निरसनं, रसस्वेदवहस्रोतोरोधः दोषाणां रसानुगत्वं,
पाचकाग्न्यूष्मणः देहेन्द्रियमनस्तापकरत्वम् च ज्ञायन्ते तदा ज्वररोग इति निश्चीयते।
एतादृशविशिष्टसम्प्राप्तिकस्यैव शास्त्रे ज्वररोगः इति नामकरणं कृतम्।

अत्रेदमवधेयम्—दोषदूष्यसम्मूर्च्छनायाः पूर्णत्वे यदा रोगस्य व्यक्तिरारभ्यते
तदा सम्प्राप्तेर्लक्षणानां वा यादृश्यवस्था, तस्मिन् काले यस्य सम्प्राप्तिघटकस्य
प्राधान्यं तदनुसृत्य नाम रमते। अत एव हृदयादुत्पन्नो व्याधिः यदा त्वाचि
आश्रयं कृत्वा पाण्डुतामुत्पादयाति तल्लक्षणाऽव्यभिचारात् पाण्डुरोग उच्यते।
दोषाः कोष्ठादाग्नि बहिर्निरस्य यदा यदा त्वाचि औष्ण्यमुत्पादयन्ति तदा ज्वर
इत्युच्यते। तत्र हि सम्मूर्च्छना कोष्ठ एवारभ्यते। राजयक्ष्माणि दोषदूष्यसम्मूर्च्छे-

नायाः पूर्णताप्रत्यायकं लिंगं शरीरशोषः । अत एव तस्य शोषः इति नामः । एवं रोगेषु तत्तद्रोगोक्तसामान्यसम्प्राप्तिबोधकलिंगानां सत्वे रोगत्वं वाच्य- मन्यथा लक्षणत्वं मन्तव्यम् । यदाचैकास्मिन् रुग्णे ज्वरः आतिसारश्च दृष्येत तदा अतिसारस्य रोगाशंकायां वायुमूत्रयोः प्रवृत्तिसमकालमुच्चारप्रवृत्तिः, अतीवसरणं, कोष्ठगौरवं, अग्निमान्द्यं इत्यादिसामान्यसम्प्राप्तिबोधकलक्षणानां सत्वे रोगत्व- मन्यथा लक्षणत्वं वाच्यम् । अत्र च निबन्धे कतिचन रोगाणां सामान्यसम्प्राप्ति तद्बोधकलक्षणसमुच्चयश्च प्रदश्यते, एवमेवान्येषामप्यूह्यम् ।

क्वचिच्च विशिष्टलक्षणैर्विशिष्टसम्प्राप्ति ज्ञात्वा रोगलक्षणाविभेदः क्रियते यथा वातकफज्वरे संताप-कास-श्वासादीन् दृष्ट्वा कोऽत्र रोगः किं च लक्षणमिति सन्देहो भवति । तत्र श्वासस्य आशुकारित्वात् सामान्यसम्प्राप्तिज्ञापकलक्षणसमुच्च- याभावाच्च विशिष्टलक्षणैरेव विशिष्टसम्प्राप्तिः निश्चितव्या । तथा चात्र श्वासो रोगश्चेत् पंचश्वासेष्वन्यतमस्य विशिष्टलक्षणं दर्शयेत् यथा महाश्वासे मत्तर्षभ इवा- निशं श्वसेत्, ऊर्ध्वश्वासे ऊर्ध्वमेव श्वसेत् न च प्रत्याहरत्यधः, छिन्नश्वासे विच्छिन्नं श्वासिति । तमकश्वासे आसीनो लभते सौख्यं शयानः श्वासपीडितः, तमसा वर्धते अत्यर्थं । क्षुद्रश्वासे कोष्ठस्थो वातः आध्मानादिकं कुर्यात्, रूक्षायासोद्भवो भवति । इत्यादिविशिष्टलक्षणेष्वन्यतमस्य दर्शने श्वासरोगो निश्चेतव्यः, अन्यथा लक्षणत्वं वाच्यम् । ज्वरे लक्षणात्मकश्वासेस्यैतादृशविशिष्ट लक्षणाभाव इत्यनुभवसिद्धम् । कासादिष्वपि क्वचिदाशुकारिषु रोगेषु यत्र च सामान्यलक्षणसमुच्चयेन सामान्यसम्प्राप्तिर्नानुमातुं शक्यते तत्र एतादृश्येव परि- पाट्यनुसर्तव्या ।

इतः परं कतिचिद्रोगाणां सामान्यसम्प्राप्तिः तद्बोधकलक्षणानि च विमृश्यन्ते ।

---

# अतीसारसम्प्राप्तिलक्षणयोः सम्बन्धः

| सम्प्राप्तिः | लक्षणानि<br>( पूर्वरूपाणि ) |
|---|---|
| [१] उद्भवः—अन्तः कोष्ठः (आमाशयः) अग्निमान्द्यं | हृन्नाभिपाय—दरकुक्षितोदः — वातः— कर्मतः अनिलसन्निरोध,—स्रोतोरोधः |
| उपहताग्नीनामुपहतमनसां चातीसारः | विट्संग—स्रोतोरोधः |
| पूर्वमुत्पन्नः पृषश्रयशे,...... | आध्मानं—स्रोतोरोधः—वातः—शब्दतः |
| अथावरकालंरूक्षाल्पप्रमिताशन...वायुः | अविपाकः—अग्निमान्द्यं |



| सम्प्राप्तिः | लक्षणानि |
|---|---|
| प्रकोपमापद्यते पक्ताच्चोपहन्यते ( च.चि. १९-५) । ... पित्तं द्रवत्वादूष्माणमुपहत्य ...श्लेष्मा स्वरतोऽग्निमुपहत्य... (च.चि. १९-७) अतीसारो हि भूयिष्ठं भवत्या- माशयान्वयः ( अ. हृ. चि. ९-१ )<br>[ अन्वयः—जन्मभूरुत्पात्तिः ] | गात्रसादः—वातवृद्धिः—कर्मतः |
| [२] संचारः—पुरीषाशयः | |
| [३] आश्रयः—पुरीषाशयः | |
| [४] अवयवः—उदरं | |
| [५] स्रोतोदुष्टिः—पुरीषवहं स्रोतः । पुरीषवहानांस्रोतसां पक्वाशयोर्मूलं स्थूलगुदं च ( च. वि. ५-८) | सद्रवपुरीषातिप्रवृत्तिः — अम्बुवृद्धिः अतिप्रवृत्तिः विमार्गगमनं |
| ...तद्विधैः कुपितोऽनिलः विस्रंसयत्य- धोऽब्धातु हत्वा तेनैव चानलम् । व्यापद्यानुशकृत्कोष्ठं पुरीष द्रवता नयन् । ( अ. हृ. नि. ८-३ ) | कृच्छ्रेणोपवेशः — वातवृद्धिः कर्मतः अपानः<br>अल्पाल्पमुपवेशः— ,, कर्मतः अपानः<br>सशब्दमुपवेशः— ,, कर्मतः शब्दतः<br>सशूलमुपवेशः— ,, कर्मतः |
| ...पुरीषाशयमुपहत्य ताभ्यां पुरीष द्रवी- कृत्यातिसाराय कल्पते (च.चि.१९-५) | अतीद्रवमुपवेशः—पक्वाशये अग्निमान्द्यं<br>अतिग्रथितं — आगन्तुवातेन वाता- तीसारे<br>अतिबहूपवेशः—आगन्तुश्लेष्मणा ( च. वि. ५-८ )<br>जीर्णे अतिसार्यते—आमाशयदुष्ट्यभावः |
| [६] द्रव्यसंग्रहः—<br>स्थानिक दोषः—वातः आभिः<br>दूष्यम्—अम्बु—पुरीषं<br>रक्तजाद्यतिसारेषु तत्तधातूनां दूष्यत्वम्, | अतीवसरणं—वातवृद्धिः चलगुणतः<br>सद्रवपुरीषमतिसार्यते यदा तु अब्धातुः मूत्रमार्गेण प्रवर्तते तदापि मूत्रप्रवृत्ति- समकालं (मा. नि. ३-२३ मधुकोशः, पुरीषं विना सम्यग्वायुर्न गच्छति |

| सम्प्राप्तिः | लक्षणानि |
|---|---|
| | गुदेन। रक्ताद्यतिसारेषु तत्तद्धातु-दर्शनं पुरीषे। |

यस्ययोच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।
दोषतामग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः ॥ ( सु. उत्तर ४०-१६२ )
इत्यनेनोदरामयस्याप्रशान्तो एतद्विपरीतलक्षणानि सम्भवन्तीति दर्शयति ।

अतिसाररोगस्य सामान्यलक्षणानि न ग्रन्थोक्तानि। किन्तु पूर्वोक्त संप्राप्त्या एतानि सामान्यलक्षणानि ज्ञातव्यानि ।

| | |
|---|---|
| सद्रवपुरीषातिसरणम् | अम्बुवृद्धिः, अतिप्रवृत्तिः, विमार्गगमनम् आमाशयदुष्ट्यभावः |
| जीर्णे अतिसार्यते | वातस्य चलगुणेन ( अपानः ) वृद्धिः |
| यदास्वधातुः मूत्रमार्गेण प्रवर्तते तदाऽपि पुरीषप्रवृत्तिसमकालं । | वातवृद्धिः चलगुणतः । |
| पुरीषं विना गुदेन सम्यग्वायुर्न गच्छति | आमः-सामः श्लेष्मा |
| गुरुकोष्ठता | वातवृद्धिः अपानः-कर्मतः |
| कृच्छ्रेणोपवेशः | ,, ,, ,, |
| अल्पाल्पमुपवेशः | ,, ,, शब्दतः |
| सशब्दमुपवेशः | ,, ,, कर्मतः |
| सशूलमुपवेशः | पित्त-अग्निदुष्टिः ( सरगुणतः ) |
| अतिद्रवमुपवेशः | |

---

## ग्रहणीरोगस्य सम्प्राप्तिलक्षणयोः सम्बन्धः

| सम्प्राप्तिः ( सामान्या ) | लक्षणानि ( पूर्वरूपाणि ) |
|---|---|
| (१) उद्भवः-अन्तकोष्ठः (ऊर्ध्वं आमाशयः) अग्निमान्द्यम् | अन्नस्यविदाहः-पित्तं |
| भूयः संदूषितो वह्निः ग्रहणीमभिदूषयेत् ( सु. उत्तर. अ. ४० ) | चिरात्पाकः-अग्निमान्द्यम् |
| पूर्वरूपावस्थायां बहूनिलक्षणानि यानिकदोषदूष्याणां विक्षोभेन | बलक्षयः-सारकिट्टविभजनाल्पत्वात् धातूनां पोषणाल्पत्वं अतः |
| | ओजः क्षयः ( आमकार्यं ) |
| | क्लमः-धातुक्षयाद्वातवृद्धिः । |



| सम्प्राप्तिः ( सामान्या ) | लक्षणानि |
|---|---|
| भवितुमर्हन्ति। अत्र प्रथमलक्षणात्रितयं प्रधानं, अवश्यंभावित्वात् । | भ्रमः-वातः चलगुणतः |
| २) संचारः-अन्नवहस्रोतः | कर्णक्ष्वेडः-वातः कर्मतः |
| ३) आश्रयः-ग्रहणी | आलस्यं-बलक्षयात् ( आमकार्यं ) |
| ४) अवयवः-ग्रहणी | आनद्धोदरता-स्रोतोरोधः-(आमकार्यं) |
| | अन्त्रकूजनं-वातवृद्धिः-शब्दतः |
| | प्रसेकः-स्रोतोरोधः ( आमकार्यं ) |
| | वक्त्र वैरस्यम्-आमंकार्यम् (वातवृद्धिः कर्मतः ) |
| | छर्दिः-आमान्नस्य विमार्गगमनम् ( अन्नवहस्रोतो दुष्टचारम्भात् ) |
| | तृष्णा-पित्तवृद्धिः उष्णगुणतः ( अन्नविदाहेन ) |
| ५) स्रोतोदुष्टिः-अन्नवहं ( पित्तधरा कला-ग्रहणी ) | [१] अन्नेऽजीर्णे सति सामं सान्नं चोपवेश्यते जीर्णे पक्वं तु नैव वा } ग्रहणी दुष्टिः समानदुष्टिः |
| | [२] अकस्माद्वा मुहुर्बद्धं अकस्माच्छिथिलं मुहुः } समानः-चलः |
| | [३] संचिते शकृत्युपवेश्यते |
| | [४] बहुशो भुक्तमाममेव विमुंचति |
| | [५] मुहुर्बद्धं मुहुर्द्रवम् |
| | [६] छर्दिः-विमार्गगमनम् |
| [६] द्रव्यसंग्रहः-स्थानिको दोषः- अग्निः [ पाचकपित्तं ] वायुः [ समानः ] कफः-क्लेदकः- | [१] मलस्य पक्वस्य पूतिता-पित्तं [ आमम् ] |
| कफः-क्लेदनः | [२] तृष्णा-पित्तं-उष्णगुणतः |
| दूष्यम् - रसः | [३] ज्वरः- ,, ,, |
| कफः | [४] लोहगन्धिः उद्गारः-पित्तं |
| | अम्लगन्धिः ,, ,, |
| | तिक्तोद्गारः - - ,, |
| | अम्लोद्गारः - - ,, |
| | शुक्तोद्गारः - - ,, |

....६

**लक्षणानि**

**सम्प्राप्तिः (सामान्या)**

धूमोद्गारः – – ,,
दाहः पित्तम् –उष्णगुणतः
प्रसेकः रसवृद्धिः –आमः – (कफः)
अरोचकः – ,, ,, ,,

पूर्वारूपावस्थायां बहूनि लक्षणान्युत्पद्यन्ते। तानि च स्थान–स्थित वातादीनां विक्षोभेण भवन्ति। तानि च शास्त्रोक्तानि यदा सर्वात्मनोत्पद्यन्ते तदारिष्टमिति मन्तव्यम्।

पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया।
यं विशन्ति विशत्येनं मृत्युर्ज्वरपुरस्सरः॥

इतिचोक्तं। अतोत्राऽवश्यंभावीनिलक्षणानि कानीति निश्चेतव्यम्। अतोऽवश्यमग्निमांद्यलक्षणं अविपाकः ग्रहणी हि जठराग्निमान्द्येनारभ्यते। ग्रहण्या आहारस्य शोषणासामर्थ्यात्। धातुस्थानिकपित्तदुष्टिलक्षणमन्नस्य विदाहः। एतैर्विना यदि पोषणाभावेन बलभ्रंशश्च ग्रहणीरोगपूर्वरूपावस्थायामवश्यं भवन्ति। तृष्णाक्लम-भ्रमालस्यादयो भवन्ति तदा तानि ग्रहणीपूर्व-रूपाणि नैव भवितुमर्हन्ति।

## ग्रहणीरोगसामान्यलक्षणानि।

बहुशो भुक्तमाममेव विमुंचति (पुरीषं)
पक्वं चेत् सरुजं ( पुरीषस्सर्गः )
,, चेत् पूतिः ( पुरीषम् )
मुहुर्बद्धं मुहुर्द्रवम् ( ,, )
बलभ्रंशः
सामं सान्नमजीर्णेऽन्ने जीर्णे पक्वन्तु
नैव वा
संचिते शक्ति उपविशति
लोहाम्लगन्धिः तिक्ताम्ल उद्गारः
शुक्तोद्गारः
धूमोद्गारः
धूमोद्गारः
दाहः
लौल्यम्

आमः ( ग्रहणीदुष्टिः )
वातः–कर्मतः
पित्तं–विस्रगुणतः
ग्रहणीदुष्टिः (वातवैषम्यं–समानःचलगुणतः)
ग्रहण्याः रसशोषणकर्माल्पता।
ग्रहणीदुष्टिः–वातः–कर्मतः

रोगप्रभावः–ग्रहणीदुष्टिलक्षणम्।
पित्तं–गन्धरसाभ्याम्
पित्तं–रसतः
,, गन्धतः
पित्तं– गन्धतः
,, – उष्णगुणतः
रोगप्रभावः– ( दोषदूष्यसम्मूर्च्छनाजनितम् )



**लक्षणानि**

**सम्प्राप्तिः ( सामान्या )**

ज्वरः
तृष्णा
तमकः
वैरस्यं
प्रसेकः
अरोचकः
अस्थिपर्वरुक्
पादकरयोः शोथः
छर्दिः
शैथिल्यं
चिरकारिता

पित्तम्– उष्णगुणतः
,, – ,,
,, – ,,
आमः –( वातः – रसतः )
,, – ( श्लेष्मा – रूपतः )
,, – ( ,, – कर्मतः )
वातः – कर्मतः
स्रोतोरोधः – कफ ( चिरकालीने )
विमार्गगमनम् – अन्नवहस्रोतांसि–
कफः – मृदुगुणतः – ( धातोर्बलह्रानिः)
कफः – क्लेदकः

---

## गुल्मसम्प्राप्तिलक्षणयोः सम्बन्धः

**लक्षणानि**

**सम्प्राप्तिः ( सामान्या )**

१) उद्भवः– महास्रोतः(आमपक्वाशयौ)
धातुक्षयजनितः–आमपक्वाशयाश्रयः
वायुरुद्भवकारणम्।
स प्रकुपितो वायुर्महास्रोतोऽनुप्रविश्य रौक्ष्यात्कठिनीभूतमाप्लुत्य पिण्डितोऽवस्थानं करोति हृदि बस्तौ पार्श्वयोर्नाभ्यां वा स शूलमुपजनयति ग्रन्थोश्चानेकाविधान्
( च. चि. ३–७ )
विट्श्लेष्मापित्तातिपरिस्रवाद्वा तैरेव वृद्धैः परिपीडनाद्वा कोष्ठे प्रकोपं समुपैतिवायुः (च. च.– ५।५ )।
(पाककाले चायुक्त्या छर्द्युद्गारौ– चऽ)

( पूर्वरूपाणि )
उद्गारबाहुल्यम्–वातः–द्रव्यतः–अतिप्रवृत्तिः
पुरीषबन्धः– स्रोतोरोधः
तृप्त्यक्षमत्वम्– वातः – धातुशैथिल्यम्।
अन्त्रकूजनं–वातवृद्धिः– शब्दतः।
आटोपः– ,, – ,,
आध्मानं–स्रोतोरोधः–वातः–शब्दतः।
अविपाकः– अग्निमान्द्यम्
शरीरसदनम् (दौर्बल्यम्) } वातवृद्धिः–ओजोविस्रंसः।
कुक्षिशूलः– वातवृद्धिः– कर्मतः
विदग्धेऽन्नेछर्दिः– विमार्गगमनम्
अनन्नाभिलाषा– अग्निमान्द्यं– ( आमः )
अरोचकः – ,, – ,,

## सम्प्राप्तिः ( सामान्या )

## लक्षणानि

अग्निवैषम्यं– वातः– चलगुणतः
विदाहो भुक्तस्य–पित्तं–(अग्निमान्द्यं)
वातमूत्रपुरीष वेगानां चाप्रादुर्भावः } अपानवायुदुष्टिः (स्रोतोरोधः)
प्रादुर्भूतानां चाप्रवृत्तिरीषदागमने वा (स्रोतोरोधः)
अपरिहर्षणम्–वातवृद्धिः–कर्मतः
अतिवृत्तपुरीषता–,, दारुणगुणतः–
अबुभुक्षा–अग्निमान्द्यम्
कार्श्यम्–मेदःक्षयः

[२] संचारः–महास्रोतः (आमपक्वाशयः)
[३] आश्रयः ( अधिष्ठानम् )
महास्रोतस एकदेशः–हृत्प्रदेशे
नाभिप्रदेशे
बस्तिप्रदेशे
पार्श्वयोः
आमाशयैकदेशे (च. नि. ३,७-११)
पक्वाशये (च. चि. ५-२४ )
पक्वाशये पित्तकफाशये वा स्थितः
स्वतन्त्रः परसंश्रयो वा स्पर्शोपलभ्यः
परिपिण्डितत्वाद्गुल्मो यथादोषमुपैति
नाम। (च. चि. ५)

## सामान्यलक्षणानि

[४] स्रोतोदुष्टिः–अन्नवहं
पुरीषवहं

अरुचिः–आपः
ऊर्ध्ववातत्वं–वातः – (अतिप्रवृत्तिः)
कृच्छ्रविड्कता-स्रोतोरोधः-अपानदुष्टिः
आनाहः– ,, वातः–कर्मतः
कृच्छ्रवातता– ,, ,,

[५] अवयवः–उदरम् उदरे ग्रन्थेर्दर्शनम् स च स्पर्शोपलभ्यः
उत्प्लुतः वृत्तः



[६] द्रव्यसंग्रहः–
स्थानिकदोषः–वातः (समानः) कृच्छ्रवातता-अपानदुष्टिः-(स्रोतोरोधः)
कृच्छ्रमूत्रता– ,, ,,
अन्त्रविकूजनम्–वातवृद्धिः-द्रव्यतः
शूलः–वातः–कर्मतः
ग्रन्थिः संचारी–वातवृद्धिः-चलगुणतः
दूष्यं–रसः अचलो वा–कफवृद्धिः – स्थिरगुणतः

पित्तं सह मारुतेन प्रकोपमापद्यते तत् प्रकुपितं मारुतं आमाशयैकदेशे संवर्त्य [ सम्मूर्च्छ्य ] तानेव वेदनाप्रकारानुपजनयति उक्ता वातगुल्मे। कफेऽप्येवं [ च. नि. ३-९ ]

......तस्य यथास्वं वातप्रधानाः प्रकुपिता दोषाः पृथक् संसृष्टा समस्ता सरक्ता वा महास्रोतोऽनुप्रविश्यावृत्योर्ध्वमधश्च मार्गमवश्यं शूलमुपजनयन्तो गुल्ममभिनिर्वर्तयन्ति । तत्रातिकर्शनात् कफपित्ताभ्यां वा मार्गनिरोधाल्लब्धाश्रये वायुरुत्प्लुतो रौक्ष्यात् कठिनीभूतां स्वाश्रये स्वतन्त्रः परतन्त्रो वा पित्तश्लेष्माश्रये स्पर्शोपलभ्यः पिण्डितत्वादमूर्तोऽपि मूर्ततामिवोपगतो ग्रन्थिरूपेणवतिष्ठमानो गुल्मसंज्ञां लभते। [ अ. सं. नि. ११-३४ ]

चेष्टान्नपानसामान्या दोषाः प्रकुपिता नृणाम् ।
आमाशयमधिष्ठाय ततो गुल्मान् प्रकुर्वते [काश्यपसंहिता गुल्मचिकित्सा४]।
एतैश्चाग्न्येश्च कुपितो मारुतो दोषसंचयं ।
करोति यत्र तत्राऽस्य स्थाने गुल्मो निचीयते ॥
स यस्मादात्मानि चयं गच्छत्यप्स्विव बुद्बुदः ।
अन्तः सरति यस्माच्च न पाकमुपयात्यतः ॥ [ सु. उत्तर. ४२–६ ]

---

# उदररोगसम्प्रातिलक्षणयोः सम्बन्धः

## सम्प्राप्तिः ( सामान्या )

## लक्षणानि

[१] उद्भवः–कोष्ठः [च. सू. ११।४९] [ सु. नि. ७ ]
पूर्वरूपाणि [ अग्निमान्द्यकृतानि ]
क्षुन्नाशः
अग्निमान्द्यम्
मन्देऽग्नौ मलिनैर्भुक्तैरपाकाद्दोष
सर्वमन्नं चिरात सविदाहं च पच्यते ।

| | |
|---|---|
| संचयः [ च. चि. १३ ] | जीर्णाजीर्णं न जानाति<br>सौहित्यं न सहते |

१] संचारः—सिराः
कोष्ठादुपस्नेहवदन्नसारोनिःसृत्य
दुष्टोऽनिलवेगनुन्नः [ सु. नि. ७ ]
विरसद्रव्यादानाजीर्णजन्यसिरामार्ग-
स्थितपवनविगत्या सिरारसातिप्रस्रव-
णाद् अजीर्णाम्बुवृद्धेरुदरं जायते ।
[ आयुर्वेदसूत्र—प्रश्न ४ सू—२१ ]

| | |
|---|---|
| [३] आश्रयः—त्वङ्मांसान्तरम् त्वचः<br>समुन्नम्य शनैः समन्तात् विवर्धमानो जठरं<br>करोति (सु. नि. ७) सर्वेषामेवोपस्नेहेन<br>निःसृताम्बुरसमूलत्वात्तदेव कथमनुदकत्वं?<br>नैवात्रं दोषः तत्र क्षुपेक्षया नातिमन्दत्वादग्नेः<br>स्वल्पत्वात्प्रागुदरस्यानुदकत्वमित्युच्यते,<br>अल्पत्वेऽतद्व्यपदेशात् गयदासः (सु.नि.७) | उदरे त्वक्मांसाभ्यन्तरे जलप्रतीतिः |

[४] अवयवः—उदरं

| | |
|---|---|
| [५] स्रोतोदुष्टिः—स्वेदवहं<br>अम्बुवहं च<br>रुद्ध्वा स्वेदाम्बुवाहीनि ( च. चि. १३ )<br>ऊर्ध्वाधो धातवो रुद्धा वाहिनीरम्बु-<br>वाहिनीः ( अ. सं. नि. १२ )<br>( अम्बुवाहिनीः सिराः—इन्दुः )<br>स्वेदवाहिनषु दुष्टेषु पारुष्यं लोमहर्षणं<br>अतिसेंदोनवा स्वेदः (गयदासः सु.नि.७) | स्वेदाभावः<br>उदरादन्यत्राम्बुक्षयलक्षणानि यथा<br>तृष्णा, ताल्वोष्ठशोषः, मूत्रे अम्बुनोऽ-<br>ल्पता, तथा उदरे जलप्रतीतिः । |

[६] द्रव्यसंग्रहः—

| | |
|---|---|
| स्थानिकदोषः—वातः | अंगसादः—वातवृद्धिः—कर्मतः |
| प्राणः | सर्वचेष्टास्वनीश्वरत्वं—प्राणदुष्टि : |
| अपानः | अल्पेऽपि चेष्टिते श्वासः— ,, |
| समानः | ( एतत्पूर्वरूपोक्तमपि रूपेषु व्यक्ती- |
| पाचक पित्तं | भवतीत्यतोऽत्र गृहीतं ) |
| क्लेदकः श्लेष्मा | गमने शक्तिः—प्राणदुष्टिः |



दौर्बल्य—ओजोविस्रंसः
( धातुक्षयजन्यः )
वातपुरीषसंगः—अपानदुष्टिः
स्रोतोरोधः
दाहः—पित्तं—उष्णगुणतः
पाकः ( उदरस्थद्रवस्य ) पित्तं—तीक्ष्ण-
गुणतः

| | |
|---|---|
| श्लेष्मणः...बन्धोपलवस्तैमित्यशोफाक्त्याति-<br>निद्रताः ( अ. हृ. सू. १२ )<br>दूष्यम्—अम्बु<br>स्वेदः<br>रसः | शोथः—श्लेष्मा—गुरुगुणतः<br>शुष्कवक्त्राः ( च. चि. १३ )<br>( जिह्वाताल्वोष्ठकण्ठक्लोमशोषः )<br>तृष्णा—अम्बुक्षयः<br>अस्वेदनम्—(च.वि.५) स्वेदवहस्रोतो-<br>दुष्टिः |

## उदररोगस्य पूर्वरूपाणि

| | |
|---|---|
| क्षुन्नाशः—अग्निमान्द्यम् | श्लेष्मा ( अग्निमान्द्यम् ) |
| स्वादवतिस्निग्धगुर्वन्नं पच्यते—चिरात् | पित्तम्—उष्णगुणतः |
| भुक्तं सर्वं विदह्यते | उदरे मलसंचयात् |
| जीर्णाजीर्णं न वेत्ति | वातः |
| अतिसौहित्यं न सहते | कफः—स्रोतोरोधः |
| पादयोरीषच्छोफः | ओजोविस्रंसः (धातुपोषणाभावात्) |
| शश्वद्बलक्षयः | प्राणवायुदुष्टिः—कर्मतः |
| अल्पेऽपि व्यायामे श्वासमृच्छति | स्रोतोरोधः |
| पुरीषनिश्चये वृद्धि रूक्षोदावर्तहेतुका | वातः—कर्मतः |
| बस्तिसन्धौ रुग् | स्रोतोरोधः, वातः—शब्दतः |
| आध्मानः | दोषसंचयः |
| जठरं बधते | वातः—कर्मतः |
| ,, पाट्यते | ,, ,, |
| ,, आतम्येतलघ्वेल्पभोजेनादपि | |
| राजीजन्म | स्रोतोरोधः |
| बलीनाशः | उदरे मलसंचयः |

## उदररोगस्य सामान्य लक्षणानि

आध्मानं–वातः –शब्दतः स्रोतोरोधः
गमनेऽशक्तिःदौर्बल्यम्
दौर्बल्यं–ओजोविस्रंसः–वातवृद्धिः
शोथः–कफवृद्धिः--द्रव्यतः ।
वातसंगः--अपानदुष्टिः
पाकः--पित्तं--उष्णगुणतः
दाहः– ,, – ,,
शुष्कवक्त्रता– अम्बुवहस्रोतोदुष्टिः
( अम्बुक्षयः )

कार्श्यन्–भेद–क्षयः
आटोपः–वातः–शब्दतः
दुर्बलाग्निता–अग्निमान्द्यम्–
सदनभंगानां वातवृद्धिः
पुरीषसंगः--अपानदुष्टिः
तृष्णा--पित्तं--उष्णगुणतः
तन्द्रा – कफः– गुरुगुणतः

---

## ज्वररोगसम्प्राप्तिलक्षणयोः सम्बन्धः

### सम्प्राप्तिः

१) उद्भवः– आमाशयः
तत्र पूर्वरूपदर्शने ज्वरादौ वा हितं लघ्वशनमपतर्पणं वा ज्वरस्या–माशयसमुत्थत्वात् (च.नि.–१–३६)

२) संचारः–रसवाहिभ्यः
..... आद्यमाहारपरिणामधातुं रस--नामानमन्ववेत्य... ( च. नि. १–२० )
प्रतिरोगमितिक्रुद्धा रोगाधिष्ठान गामिनोः रसायनोः प्रपद्याशु दोषा देहे विकुर्वते । ( अ. सं. नि–१–३२ )
....ज्वरो दोषैः प्रवर्तते । तैर्वेगवद्भिर्बहुधा समुद्भ्रान्तैर्विमार्गगैः । विक्षिप्यमाणोऽन्तरग्निर्भवत्याशु बहिश्चरः
ऊष्णाद्दि चाप्यपां धातु यस्यात्तस्माज्ज्वरातुरः। भवत्यत्युष्णुगात्रश्च। सु.उत्तर ३९,९

३) आश्रयः (अधिष्ठानं )–
केवलं समनस्कं च ज्वराधिष्ठानमुच्यते,

### लक्षणानि

पूर्वरूपाणि ( च. नि.–१–३३ )
मुखवैरस्यं– वातः
गुरु गात्रत्वम् – कफः–गुरुगुणतः
चक्षुषोराकुलत्वं } वातः– कर्मतः
अश्वागमनम् }

जृम्भा – वातः– कर्मतः
अरोचकः – रसास्थितोदोषः
अविपाकः– अग्निमान्द्यम्
दौर्बल्यम् –रसस्यप्रीणनाल्पत्वात्
अंगमर्दः –स्रोतोरोधकुपितवातः
सदनम् – वातः
आलस्यम् –कफः–स्थिरगुणतः
विनामः –वातः– कर्मतः
रोमहर्षः– ,,– शीतगुणतः
दन्तहर्षः– ,,– ,,
शब्दसहत्वासहत्वम्– वातः– चलः
शीत ,, ,,– ,,– ,,



### सम्प्राप्तिः

शरीरम् ( च. चि. ३–३० )
४) अवयवः– केवलं शरीरम्

अल्पं शीलवैकृतं–

### लक्षणानि

वातसहत्वासहत्वम्–वात–चल
आतप ,, ,,– ,,– ,,
निद्राधिक्यम् –जागरणं – वा
अरतिः–
वेपथुः– वातः-- चलगुणतः
श्रमः – वातः – कर्मतः
भ्रमः – ,, – लघुगुणतः
प्रलापः– ,, – चलगुणतः
अल्पप्राणता–रसस्य प्रीणनाल्पत्वात्
दीर्घसूत्रता–मनोदुष्टिः
उचितस्य कर्मणो हानिः–मनोदुष्टिः
प्रतीपता एवकार्येषु – ,,
गुरुणां वाक्येष्वभ्यसूया – ,,
बालेभ्यः प्रद्वेषः – ,,
स्वधर्मेभवचिन्ता – मनोदुष्टिः
माल्यानुलेपनभाजेन परिक्लेशनम्–

### ज्वरसामान्यलक्षणानि

अंगमर्दः-स्रोतोरोधकुपितो वायुः
[ रसप्रदोषजो ]
स्वेदावरोधः–स्वेदवहस्रोतोरोधः

[५] स्रोतोरोधः–रसवहं
स्वेदवहं
...रसस्वेदवहानि स्रोतांसि पिधाय...[ च. नि. १-२० ]
स्रोतसां सन्निरुद्धत्वात् स्वेदं नाधिगच्छाति, स्वस्थानात्प्रच्युते चाग्नौ प्रायशस्तरुणे ज्वरे [च. चि. ३-१३२]।

[६] द्रव्यसंग्रहः–
स्थानिको दोषः–पाचकपित्तम्
[ ऊष्मा ]
ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना [अ. हृ. चि. १-१६]
देहेन्द्रियमनस्तापी [ च. चि. ३-४ ]

तृष्णा – पित्तं – उष्णगुणतः
सन्तापः – सर्वदेहे पित्तोष्मणः प्रसारः
अग्निमान्द्यं - पक्तिस्थानादग्नेर्निरसनात्
[ पित्तक्षयः ]
वैचित्यम् मनः सन्तापः
अरतिः - ,,

| सम्प्राप्तिः | लक्षणाणि |
|---|---|
| दूष्यं रसः | ग्लानिः —सन्तापः |
| संसृष्टाः सन्निपातिताः पृथग्वा | इद्रियाणावैकृत्यं – इंद्रियसन्तापः |
| कुपिता मलाः । रसाख्यं धातुमन्वेत्य | अरुचिः – रसस्थितोदोषः |
| पक्तिं स्थानान्निरस्य च । स्वेन तेनो- | हृदिव्यथा – वातः – कर्मतः |
| ष्मणाचैव कृत्वा देहोष्मणो बलं । | |
| स्रोतांसि रुद्ध्वा सम्प्राप्ताः केवलं | |
| देहमुल्बणाः । सन्तापमाधिकं देहे जन- | |
| यन्ति नरस्तदा । | |

भवत्यत्युष्णसर्वांगं ज्वरितस्तेन चोच्यते [ च. चि. ३-१२९-१३१ ]

ज्वरप्रत्यात्मिकं लिंगं सन्तापो देहमानसः

ज्वरेणाविशता भूतं न हि किंचिन्नतप्यते । [ च. चि. ३-३१ ]

सन्तापः सारुचिस्तृष्णा सांगमर्दो हृदिव्यथा

ज्वरप्रभावः... [ च. चि. ३-२६ ]

शारीरो जायते पूर्वं देहे मनासि मानसः

वैचित्यमरतिर्ग्लानिर्मनसस्तापलक्षणम् ।

इन्द्रियाणां च वैकृत्यं शेयं सन्तापलक्षणम् । [ च. चि. ३-३६ ]

---

## उन्मादसम्प्राप्तिलक्षणयोः सम्बन्धः

| सम्प्राप्तिः (सामान्या) | लक्षणानि |
|---|---|
| [१] उद्भवः—हृदयम् | [ पूर्वरूपाणि ] |
| मनस्युपहते बुद्धौ च प्रचलितायामभ्यु- | [१] शिरसः शून्यता-शिरसि-वातवृद्धिः |
| दीर्णा दोषाः प्रकुपिता हृदयमुपसृत्य | [२] चक्षुषोराकुलता-वातवृद्धिः |
| मनोवहानि स्रोतांस्यावृत्य जनयन्त्युन्मा | [३] हृद्ग्रहः—वातः कर्मतः |
| दम् [च. नि. ७-४]।बुद्धेर्निवासं हृदयं | [४] सम्मोहः—अस्थाने-तमोगुणतः |
| प्रदूष्य[च.चि.९-५]।हृदयं मनसःस्थान- | [५] उद्वेगः– ,, रजः-वातः-कर्मतः |
| मोजश्चिन्तितस्य च । मांसपेशीचयो- | स्वनः-कर्णयोः-वातः-कर्मतः |
| [मयो ?] रक्तपद्माकारमधोमुखम् । | उच्छ्वासस्याधिक्यं-प्राणवायुवृद्धिः |
| योगिनो यत्र पश्यन्ति सम्यग् ज्योतिः | आस्यसंस्रवणम् } मनोदुष्टत्वात् |
| समाहिताः । रसो यः स्वच्छतां यातः स | अन्नाभिलाषः } अग्निमाद्यं ततः |



| सम्प्राप्तिः ( सामान्या ) | लक्षणानि |
|---|---|
| तैत्रवावातिष्ठते । ततो व्यानेन विक्षितः | अरोचकः } आमोत्पत्त्यैतल्लक्षणानि |
| कृत्स्नं देहं प्रपद्यते । [अ.हृ.सू.१२-१५ | अविपाकः } भवन्ति । |
| सर्वांगसुंदरायामुद्धृततन्त्रान्तरीयवच- | ध्यानं अस्थाने-मनोदोषः |
| नम् ] मूर्धानमस्य संसीव्याथर्वा हृदयं | आयासः– ,, –वातवृद्धिः |
| च यत् मस्तिष्कादूर्ध्वः प्रेरयत् पव- | सततं रोमहर्षः-वातः-शीतगुणतः |
| मानोऽधिशीर्षतः [अथर्व-१०,२,२६] । | ज्वरश्चाभीक्ष्णम्-पित्तवृद्धिः-द्रव्यतः |
| अत्र पूर्वरूपेषु प्रथमपंचलक्षणानि– | उन्मत्ताचित्तत्वम्-वातवृद्धिः-मनोदुष्टिः |
| प्रधानानि । | उदर्दितत्वम्-वातः-कफश्च-कर्मतः |
| | अर्दिताकृतिकरणं च व्याधेः } वातः—चलगुणतः । |
| | स्वप्ने च भ्रान्तचलितानवस्थिता- |
| | प्रशस्तानां रूपाणां दर्शनम् तिलपीडक- |
| | चक्राधिरोहणं । वातकुण्डलिकाभि- |
| | श्चोन्मथनम्, कलुषाणामम्भसामावर्ते |
| | निमज्जनम् । चक्षुषोश्चापसर्पणम् – |
| | वातः—चलगुणतः |
| [२] संचारः—मनोवहानि स्रोतांसि धियो | |
| विधाय कालुष्यं हत्वा मार्गान् मनोवहान् | |
| [ अ. हृ. उत्तर ६ ] | |
| [३] आश्रयः [ अधिष्ठानम् ]—मनः | |
| बुद्धिः- | |
| प्रमोहयन्त्याशुनरस्य चेतः [च.चि.९-५] | |
| [४] अवयवः–मनः [ शिरस्तालवन्तरे ] | |
| पंच सन्धयः शिरासि विभक्ताः सीमन्ता | |
| नाम । तत्रोन्मादभयचित्त-नाशैर्मरणम् । | |
| [ सु. शा. ६-२७ ] | |
| [५] स्रोतोदुष्टिः—मनोवहस्रोतः | मनोविभ्रमः, सत्वपरिप्लवः |
| स्रोतांस्यधिष्ठाय मनोवहनि । | |
| [ च. नि. ९-५ ] | |
| [६] द्रव्यसंग्रहः– | |
| स्थानिकादोषाः—साधकपित्तम्-अधीरता, हृदयं शून्यमः । | |

# अपस्मारसम्प्राप्तिलक्षणयोः सम्बन्धः

## सम्प्राप्तिः ( सामान्या )

[१] उद्भवः – हृदयम्
दोषाः प्रकुपिता रजस्तमोभ्यामुपहतचेतसामन्तरात्मनः श्रेष्ठतममायतनं हृदयमुपसृत्योपरितिष्ठन्ते, तथेन्द्रियायतनानि च ( च. नि. – ८ )

[२] संचारः– धमन्यः
धमनीभिः श्रिता दोषा हृदयं पीडयन्ति हि, सम्पीड्यमानो व्यथते मूढो भ्रान्तेन चेतसा। ( च. चि. १०–६) हृदयपीडायोग्यतया हृदयाश्रिता एव धमन्यो विशेषेण ग्रह्यन्ते ( चक्रः )

[३] आश्रयः [ अधिष्ठानं ] मनः
इन्द्रियायतनानि
अभिहते चित्ते चिन्ताशोकभयादिभिः।
उन्मादवत्प्रकुपितैश्चित्तदेहगतैर्मलैः।
हते सत्वे हृदि व्याप्ते संज्ञावाहिषु
तेषु च [ अ. हृ. उत्तर ७-२ ]
तत्र चावस्थिता सन्तो यदा हृदयामिन्द्रियायतनानि चेरिताः कामक्रोधभयलोभमोहहर्षशोकचिन्तोद्वेगादिभिः सहसाभिपूरयन्ति तदा जन्तुरपस्मरति [ च. नि. ८-४ ]। तत्र हृदये दश धमन्यः प्राणपानौमनो बुद्धिश्चेतना महाभूतानि च नाभ्यापरा इव प्रतिष्ठितानि। शिरासि इन्द्रियाणि इन्द्रियप्राणवहानि च स्रोतांसि सूर्यमिव गभस्तयः संश्रितानि [ च. सि ९-४ ]

## लक्षणानि

### पूर्वरूपाणि

हृत्कम्पः --वातः --चलः
हृदयग्रहः -- ,, -- कर्मतः
हृदयशून्यता–साधकपित्तदुष्टि
स्वेदः– व्यानदुष्टिः

ध्यानं -- मनोदुष्टिः
मूर्च्छा -- पित्तं -- उष्णगुणतः
प्रमूढता -- मनोदुष्टिः
निद्रानाशः -- वातः -- लघुगुणतः
भ्रूव्युदासः – वातः – चलः
सततमक्ष्णोर्वैकृतं – वातः
अशब्दश्रवणे – मनोदुष्टिः

लालास्रुतिः -- कफः द्रव्यतः
सिंघाणकस्रुतिः – कफः – ,,
अरोचकः – रसस्थितोदोषः
अनन्नाभिलषणं–मनोदुष्टिः
अविपाकः – अग्निमान्द्यं
कुक्षेराटोपः – वातः – शब्दतः
दौर्बल्यं – ओजोतिस्रंसः [ वातः ]
अस्थिभेदः – वातः – कर्मतः
अंगमर्दः – ,, – [ रसस्थितः ]
मोहः – मनोदुष्टिः
तमसोदर्शनं – पित्तदुष्टिः
भ्रमश्चाभीक्ष्णं-वातपित्ते [चलगुणतः]
स्वप्ने मदः - मनः रजस्तमसो
,, नैर्तनम् - ,, ,,
,, व्यधतम् - ,, ,,
,, व्यथनम् - ,, ,,
,, वेपनम् - ,, ,,



स्वप्ने पतनम् - ,, ,,
,, मद्यपानम् - ,, ,,
,, तैलपानम् - ,, ,,
,, तयोरेव मेहनम् ,,

[४] अवयवः मनः
शरीरं
चित्तदेहगतैर्मलैः [अ. हृ. उत्तर ७-२]

[५] स्रोतः-संज्ञावहानि स्रोतांसि हृत्स्रोतः
[ चरकः ]
संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः रजस्तमः परीते मूढो भ्रान्तने चेतसा (सु. उत्तर. ६१-८)।
तैरावृतानां हृत्स्रोतोमनसां सम्प्रबोधनम् (च. चि. १०-१४)

[६] द्रव्यसंग्रहः
स्थानिक दोषाः
रजः
तमः
वातः व्यानः
प्राणः
उदानः
पित्तं-साधकं
कफः तर्पकः
दूष्यं – रसः

## अपस्मारसामान्यलक्षणानि

स्मृतिसम्प्लवः–उदानदुष्टिः [ मनः ]
बुद्धिसम्प्लवः–प्राणवायुदुष्टिः [मनः]
सत्वसम्प्लवः–मनोदुष्टिः
बीभत्सचेष्टा–वातः–व्यानः–चलः
आवास्थिकः तमः प्रवेशः–कफः
[ तमोगुणवृद्धिः ] भ्रान्तचेत–वातः
चलः
मूढता–पित्तदुष्टिः–साधकः
तर्पककफवृद्धिः (क्षयः)
हस्तपादविक्षेपः–व्यानः
विजिह्मभ्रः– ,,
विजिह्मलोचनः–,,
दन्तखादनम्– ,,
फेनवमनम्–वातेरितः कफः (द्रव्यतः)
विवृताक्षता–व्यानः
क्षितौपतनम् ,,

स्मृतिर्भूतार्थविज्ञानयपस्तत्परिवैजने।
अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्तकृत् ॥ ( सु. उत्तर. ६१-११ )
क्रमोपयोगाद्दोषाणां क्षणिकत्वात्तथैव च।
आगमाद्वैरवरूप्याच्च स तु निर्वर्ण्यते बुधैः ॥
देवे वर्षत्यपि यथा भूमौ बीजानि कानिचित्।
शरादि प्रतिरोहन्ति तथा व्याधिसमुद्भवः ॥

स्थायिनः केचिदल्पेन कालेनाभिप्रवर्धिताः ।
दर्शयन्ति विकारांस्तु विश्वरूपान्निसर्गतः ॥
अपस्मारो महाव्याधिस्तस्माद्दोषज एव तु । (सु. उत्तर. ६१)

---

## मूर्च्छासम्प्राप्तिलक्षणयोः सम्बन्धः

**सम्प्राप्ति ( सामान्या )**

(१) उद्भवः—मज्जा
बाह्याभ्यन्तराणि करणाय
तनानि ।
रुक्पर्वणां भ्रमोमूर्च्छा दर्शनं
तमसस्तथा । अरुषां...
मज्जप्रदोषात्
अरुषां...मज्जप्रदोषात् ।
[ च. सू. २१-१७ ]
[ सु. सू. २४-९ ]
[ भेलः पृ—२० ]
करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति
मानवाः [ सु-उत्तर ४६ ] बाह्यकरणायत-
नानि कर्मेन्द्रियाणि आभ्यन्तरकरणायत-
नानिमनोबुद्ध्यहंकारस्थानानि [डल्हणः]
[२] संचारः—संज्ञावहनाड्यः
[ संज्ञावहासु नाडीषु पिहितास्वनिला-
दिभिः...[ सु. उत्तर-४६-६ ]
[३] आश्रयः—हृदयम्
दुर्बल चेतसः स्थानं यदा वायुः प्रपद्यते।
मनो विक्षोभयंजन्तोः संज्ञा सम्मोहयेत्तदा॥
पित्तमेव कफश्चैवं मनोविक्षोभयन्नृणाम्
संज्ञां नयत्याकुलतां ॥...[च.सू.२४-२९]
[४] अवयवः बाह्याभ्यन्तरकरणानि
[५] स्रोतांसि—संज्ञावहनाडीपिधानम् (सु.)

**लक्षणानि**

हृत्पीडा-वातः-कर्मतः
जृम्भाणं- ,,
ग्लानिः- ,,
संज्ञादौर्बल्यम्-संज्ञावह
संज्ञादौर्बल्य—संज्ञावहस्रोतोरोधः
[ संज्ञानाशः ]
बलनाशः—ओजोविस्रंसः



संज्ञावहस्रोतांसि प्रतिहन्यन्ते
रक्तवह ,, ,, ,,
रसवह ,, ,, ,,
संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखपोहकृत ।
[ सु. उत्तर ४६ ]
यदा तु रक्तवाहीनि रससंज्ञावहानि च ।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता
मलाः ॥ [ च. सू. २४ ]
रसासृक्चेतनावाहिस्रोतोरोधसमुद्भवाः ।
मदमूर्च्छायसन्यासा यथोत्तरबलोत्तराः ॥
[ अ. सं. नि. ६-२५ ]
मूर्छासम्प्राप्तिः—पूर्वतोऽनुवृत्ता
(६) द्रव्यसंग्रहः—
स्थानिको दोषः पित्तम्
रजः
तमः
दूष्यं — रसः
रक्तम्
मनः

**सामान्यलक्षणानि**

सहसा तमोऽभ्युपैति
सुखदुःखनाशः
काष्ठवत् पतनम्

शीतोपशयः
ग्लानिर्मनसः
चिन्त्यविचार्योह्यसंकल्प्यदीनां
मनसः कार्याणां नाशः
संज्ञायाः आकुलता
,, सम्मोहः

षट्स्वप्येतासु पित्तं हि प्रभुत्वेनावतिष्ठते । ( सु. उत्तर ४६–८ )
मनो विक्षोभयंजन्तोः संज्ञां सम्मोहयेत्तदा । ( च. सू. २४–२९ )

---

## पाण्डुरोगसम्प्राप्तिलक्षणयोः सम्बन्धः

**सम्प्राप्तिः ( सामान्या )**

(१) उद्भवः—हृदयं--रसवहं स्रोतः
(२) संचारः—धमनी मार्गेण;
समुदीर्णे यदा पित्तं हृदये
समवस्थितम् । वायुना बलिना
क्षिप्तं सम्प्राप्य धमनीर्दश ।
...७

**लक्षणानि**

पूर्वरूपाणि
हृदयस्पन्दनम्--व्यानवायोः--साधक--
पित्तस्य च लक्षणं
चलः--सरः
त्वचिरूक्षता--वातः--व्यानः--रूक्षगुणतः।

**सम्प्राप्तिः (सामान्या)**

**प्रपन्नं केवलं देहं...।** (च. चि. १६--१०)

(३) आश्रयः त्वङ्मांसान्तरम् ।
त्वङ्मांसान्तरमाश्रितम् । प्रदूष्य-
कफवातासृक् त्वङ्मांसानि करोति
तत् पाण्डुहारिद्रहरितान् वर्णान्
बहुविधांस्त्वचि, स पाण्डुरोग
इत्युक्तः । ( च. चि. १६--१७ )

(४) अवयवः--सर्वांगः

( ५ ) स्रोतोदुष्टिः रसवहम्
साधकपित्तवहं

**द्रव्यसंग्रहः--**
स्थानिको दोषः
साधकपित्त (प्रधानं )
कफः ( अवलंबकः)
वातः--व्यानः

दोषाःपित्तप्रधानस्तु यस्य
कुप्यन्ति धातुषु ( च-चि-१६)।
प्रदूष्य रक्तं दोषास्त्वचं
पाण्डुरतां नयन्ति । ( सु-उत्तर-४३ )

**लक्षणानि**

स्वेदाभावः--स्रोतोरोधः--कफः
श्रमः--श्वासयुक्तः हृदयाधिष्ठितः वातः
त्वक्स्फोटनम्--वातः--रूक्षगुणतः
ष्ठीवनं--रसः ( आमः )
गात्रसादः--वातः ( ओजः क्षयः)
मृद्भक्षणं--प्रभावः
प्रेक्षणकूटशोथः--स्रोतोरोधः कफः
विण्मूत्रपीतता पित्तं रूपतः
अविपाकः ( अग्निमान्द्यम् त्वचि
पाण्ड्वादिवर्ण विशेषाः )

**सामान्यलक्षणानि**

क्रोधनत्वं-साधकपित्तदुष्टिः
हृदयद्रवः-वातपित्ताभ्यां-चलसरगुणतः
ज्वरः--पित्तं--उष्णगुणतः
हरितत्वम्--,, रूपतः
हारिद्रत्वम्--,, ,,
हतप्रभत्वं--,, क्षयः
अग्निमान्द्यं-- ( ,, ,, ) कफवृद्धिः।
गौरवम्--कफः--गुरुगुणतः
अरुचिः-- ,, ( आमः )
शूनाक्षिकूटत्वं--कफवृद्धिः
( स्रोतोरोधः )
शिशिरद्वेषः-- वातकफवृद्धिः
( शीतगुणतः )
निद्रालुत्वम्-- कफवृद्धि--गुरुगुणतः
ष्ठीवनं-- ,, ( आमः )
कर्णक्ष्वेडः-- वातः-- कर्मतः
दौर्बल्यं-- ,, ( ओजोविस्रंसः )
सादः-- ,, ( ,, )
श्रमः-- ,, ( रसक्षयः )



**सम्प्राप्तिः ( सामान्या )**

दूष्याः--रसः
रक्तः
त्वक्
मांसः
मनः (उपहतचेतस्त्वम् )

दूष्यं [ पूर्वतोऽनुवृत्तम् ]
मांस
मनः [ उपहतचेतस्त्वम् ]

प्रदूष्य कफवातासृक्त्वङ्मांसानि
करोति तत् [च. चि. अ. १६]
...हृत्पाण्डुरोगप्रभृतयो रसदोषजा
विकाराः [सु. सू. २४-९]

**लक्षणानि**

भ्रमः-- वातपित्ते ( चलगुणतः )
गात्रशूलं--वातः--कर्मतः
श्वासः-- ,, -- अतिप्रवृत्तिः
गात्रमर्दे-- ,, -- ( आमः )
पीडितोन्मथनमिव-वातः (आमः)
अल्पवाक्त्वम् वातक्षयः
पिण्डिकोद्वेष्टः वातः कर्मतः
आरोहणायासैः ⎫ ,, ,,
कट्यूरूपादरुक् ⎭
कट्यूरूपादसादः ,, ,,
पाण्डुत्वं ष्ठीवनं अंगमर्दः अरुचिः
वैवर्ण्यम्
शीर्णलोमता
मांसशैथिल्यम्
दुर्मनस्कत्वम्

मांसशैथिल्यम्
दुर्मनस्कत्वम्

**पाण्डुरोगे दोषदूष्यसम्मूर्च्छना परिणामाः**

**धातुशैथिल्यम्**

धातूनां गौरवम्
वर्णक्षयः
बलक्षयः
स्नेहक्षयः
ओजोगुणक्षयः

उत्तरोत्तरधातूनां शैथिल्यम्
श्रमः [रसः] कट्यरूपादसादः [मांस]
भ्रमः [मज्जा] निद्रालुत्वम् ।
क्रियास्वसामर्थ्यम्
हतप्रभत्वम्
दौर्बल्यं, सादः
रौक्ष्यम्
भयं, ध्यानम्, व्यथितेन्द्रियता,

| सम्प्राप्तिः ( सामान्या ) | लक्षणानि |
| --- | --- |
| | दुच्छायता, दुर्मनस्कत्वम् । |
| रक्ताल्पता | नखनेत्रादिषु रागाल्पता |
| मेदोऽल्पता | कार्श्यम्, स्फिक्स्तनोदरशुष्कता । |
| निःसारता | त्वचः |
| शिथिलेन्द्रियता | व्यथितेन्द्रियता, इन्द्रियबलभ्रंशः |
| वैवण्य | पाण्डुहारिद्रहरितवर्णता |

दोषाः पित्तप्रधानास्तु यस्य कुप्यन्ति धातुषु ।
शैथिल्यं तस्य धातूनां गौरवं चोपजायते ॥
ततो वर्णबलस्नेहा ये चान्येऽप्योजसो गुणाः ।
व्रजन्ति क्षयमत्यर्थं दोषदूष्यप्रदूषणात् ॥
सोऽल्परक्तोऽल्पमेदस्को निःसारः शिथिलेन्द्रियः ।
वैवर्ण्यं भजते...... । [ च. चि. अ. १६ ]

......यद्यपि रक्तपित्तयोरेकयोनित्वात् पित्तेनेह रक्तवृद्धिर्भाव्या तथापीह रक्तक्षयो रक्तपोषकरसस्य पित्तेन क्षपणात्, रक्तपोषकसारभागानुत्पादाच्च । यद्यपि पित्तं तेजोरूपतया वर्णकरमिहोच्यते, यदुक्तं तेजोधातुरप्युदकान्तरिक्षधातु-प्रायोऽवदातवर्णकरः ( च. शा. अ--८ ) इति । तथाऽपि विकृतत्वात् पित्तमिह विकृतवर्णकृदेव भवति ( चक्रपाणिः ) ।

...निषेवमाणस्य विदूष्य रक्तं दोषास्त्वचं पाण्डुरतां नयन्ति ।
( सु. उत्तर ४४--३ )

...पाण्डुत्वं स्रोतसां रोधः...रसप्रदोषजा रोगाः ( चरकः सू. २८--२० )

---

## प्रमेहसम्प्राप्तिलक्षणयोः सम्बन्धः

| सम्प्राप्तिः ( सामान्या ) | लक्षणानि |
| --- | --- |
| उद्भवः मेदोवहस्रोतः | पूर्वरूपाणि |
| तन्मूलो वपावहनं वृक्कौ च | हस्तपादतलदाहः--पित्तं--उष्णगुणतः |
| स विसर्पन् शरीरे मेदसश्चैवादितो | शीतप्रियत्वं-- ,, ,, |
| मिश्रीभावं गच्छति । ( च. नि. ४--८ ) | ( पाचकः ) |
| वपावहनदुष्ट्या प्रमेहप्रारम्भः | स्निग्धगात्रता--श्लेष्मा-स्निग्धः |



| सम्प्राप्तिः ( सामान्या ) | लक्षणानि |
| --- | --- |
| इत्यत्र चक्रपाणिवचनैर्यथा | पिच्छिलगात्रता--कफः--पिच्छिलगुणतः |
| "संसृष्टदोषमेदःस्थानत्वादिति" | गुरुगात्रता--गुरुगुणतः--कफः |
| चरकवचनं व्याख्यानयाति चक्रः | मधुरशुक्लमूत्रता--कफः-रसतः रूपतश्च |
| संसृष्टं सन्निकृष्टं दोषस्य पित्तस्य | तन्द्रा ,, गुरुगुणतः |
| भेदनश्च स्थानं यस्मात् । पित्तस्य | सादः--वातः--कर्मतः |
| ह्यामाशयः स्थानं तथा मेदसोऽपि | पिपासा --पित्तंवृद्धिः उदकक्षयः |
| यत्स्थानं वपावहनं तदप्यामाशयै | बह्वाशित्वं- पित्तं--तीक्ष्णोष्णगुणतः |
| कदेश एव । तेन दोषदूष्ययोः | दुर्गन्धःश्वासः -- ,, विस्रगुणतः |
| स्थानप्रत्यासत्त्या दूषणं नित्यं | तालुगलजिह्वादन्तेषु मलोत्पत्तिः } मांसमलवृद्धिः |
| प्रत्यासन्नत्वाद्दुर्जयामिति भावः । | जटिलीभावः केशानां-श्लेष्मा-पिच्छिल-गुणतः |
| ( च. नि. ४--२७ ) | नखानां वृद्धिः--कफवृद्धिः (अस्थिमल वृद्धिः) |
| | माधुर्यमास्यस्य--कफवृद्धिः --रसतः |
| | करपादयोः सुप्तता--वातः--शीतगुणतः |
| | मुखतालुशोषः --अब्धातुक्षयः (वात-वृद्धिः ) |
| | आलस्यं---कफवृद्धिः ---स्थिरगुणतः |
| | मलं काये-- मांसमलवृद्धिः स्रोतोरोधेन मांसक्षयेण |
| | परिदाहः अंगेषु -- पित्तवृद्धिः --उष्णगुणतः |
| | अंगेषु सुप्तता-वातः-शीत गुणतः |
| | षट्पदापिपीलिकाभिश्च शरीरमूत्राभिसरणम् } श्लेष्मा रसतः |
| | अंगगन्धः--पित्तवृद्धिः -- विस्रगुणतः |
| | शिथिलांगता-- कफः-- मृदुगुणतः |
| | शय्यासनस्वप्नसुखे रतिः-कफः-कर्मतः |
| | घनांगता--कफः-- गुरुगुणतः |
| | स्वेदः--मेदोमलवृद्धिः |
| | केशवृद्धिः आस्थिमलवृद्धिः |

(२) संचार—रसायन्यः मूत्रवाहिन्यश्च "सर्वेदोषाः मेदक्लेदसहिताः मूत्रवह-स्रोतोऽनुप्रविश्य अधोगत्वा बस्तेर्मुख-माश्रित्य निर्भिद्यन्ते तदा प्रमेहां जनयन्ति ( सु. नि. १२-८ )

रसायनीनामित्यत्रादिशब्दो लुप्तानिर्दिष्टो द्रष्टव्यः, तेन रस पित्त-कफ-शोणितवहानां धमनीनामित्यर्थः। दौर्बल्यादिति सर्व-शरीरगतस्य सर्वद्रवधातोरपानव्यानाभ्या-मधोऽनुलोम्यमानत्वाद्रसादिवहानामपि धमनीनामध एव बलवत्वं (डल्हणः)

[३] आश्रयः मूत्रवहं स्रोतः

[४] अवयवः बस्तिः

[५] स्रोतोदुष्टिः-मेदोवहं
मांसवहं
उदकवहं
मूत्रवहं

[६] द्रव्यसंग्रहः—

स्थानिकदोषाः—श्लेष्मा [ क्लेदकः ]
पित्तं [ पाचकः ]
वातः [ अपानः ]
[ व्यानः ]

त्रिदोषकोपनिमित्ता विंशतिः प्रमेहा भवन्ति [ च. नि. ४-३ ]

सर्व एव सर्वदोषसमुत्थाः सह पिडकाभिः [ सु. नि. ६–७ ]

शुक्रदोषप्रमेहास्तु व्यानापानप्रकोपजाः [ सु. नि. १-२० ]

प्रमेहस्य सर्वदेहगतरसादिदूष्य-प्रभवत्वात् व्यानकृतत्वं, मेढ्र द्वारसंश्रितत्वादपानकृतत्वं च [गयदासः]

मेदश्च मांस च शरीरजं च क्लेदं कफो

प्रमेहपूर्वरूपाणि, अतिस्थौल्यं कार्श्यं वा पूतिमांसपिडकाः शराविकादयः तृष्णा, मुखतालुशोषः अतिसृष्टं, अभीक्ष्णं च मूत्रप्रवृत्तिः

**प्रमेहसामान्यलक्षणानि**

स्निग्धगात्रता—कफवृद्धिः
पिच्छिलगात्रता ,,
गुरुगात्रता— ,,
जटिलीभावः केशानां— कफवृद्धिः
नखवृद्धिः— ,,
माधुर्यमास्यस्य— ,,
आलस्यं — ,,
षट्पदापिपीलिकाभिश्च शरीरमूत्राभिसरणम् } ,,
शिथिलांगता— ,,
शय्यासनस्वप्नसुखेरतिः— ,,



## सम्प्राप्तिः (सामान्या)

बस्तिगतः प्रदूष्य । करोति मेहान् समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि । क्षीणेषु दोषेष्ववकृष्य बस्तौ धातून् प्रमेहाननिलः करोति । [ स. चि. ६ ]

दोषो बस्तिं समुपेत्य मूत्रं सन्दूष्य मेहांजनयेद्यथास्वं तस्य चैव प्रवृत्तस्या-परिपक्वा एव वातपित्तश्लेष्माणः... [ सु. नि-६-४ ]। मेदश्चापारिणतमिति असम्यक् परिणतं । आमरसवदाति स्निग्धं [ गयदासः ]

तत्र वातपित्तमेदक्लेदमांसशुक्ररसैरन्वितो बस्तिगतः

तत्र वातपित्तमेदक्लेदमांसशुक्ररसैरन्वितो बस्तिगतः श्लेष्मा प्रमेहान्जनयति । तैः कफशोणिताभ्यां पित्तं । तैर्वसाल-सीकामज्जौजोभिश्च वायुः ( अ. स. नि-१०-४)

सर्वेषां च प्रमेहाणां श्लेष्मा हेतुः, सर्वे च रोगस्वभावान्नवोत्पन्नाः श्लेष्मप्रमेहा भवन्ति । अतः कफादि-क्रमेण निर्दिश्यन्ते ( इन्दुटीका )

त्रयाणामपि दोषाणां श्लेष्मा प्रमेहेषु प्राक् प्रकोपमापद्यते श्लेमा-धिष्ठानत्वान्मूत्रस्य । तदववृधेर्मेद एव च तेन प्रथमं दूष्यते अत्यन्तसमाग-त्वात् । तदनन्तरं देहक्लेदादयः । ततः श्लेष्मादिक्षये पित्तं प्रबलीभवन्शोणितमपि दूषयति । तत्क्षयेऽपि वायुर्वसादीन् धातून् शरीरस्य परमसारभूतान् बस्तिमाकृष्य मूत्रेणसह विसृजाति ।
( अ. सं. नि. १०--५ )

## लक्षणानि

घनांगता— कफवृद्धि
हस्तपादतलदाहः—पित्तवृद्धिः
पिपासा — ,,
बह्वाशित्वम् — ,,
दुर्गन्धःश्वासः — ,,
परिदाहः अंगेषु— ,,
अंगगन्धः — ,,
सादः — वातवृद्धिः
करपादयोः सुप्तता— ,,
अंगेषु सुप्तता — ,,

| सम्प्राप्तिः (सामान्या) | | लक्षणानि |
|---|---|---|
| पित्तजेऽपि प्रथमल्पं कुपितः श्लेष्मा-स्वल्पं लिंग दर्शयेत् । किंचित्कालं श्लेष्मप्रमेहो भूत्वां कालवशात् कफादौ क्षीणे पित्तमेहतां प्रतिपद्यते । तत्राऽ पि रक्तप्रवृत्तेः कालेन रक्तक्षयात् वायुर्वसादीन् देहस्य सारभूतानाकृष्यान्ते वात प्रमेहान् करोति । एवं क्रमेण दोषाणां कारणत्वं, प्रथममेव वातापित्तप्राधान्येनोत्पन्नेऽपि फलतः किचित्कफान्वयत्वम्-(इन्दुः) सर्वेमेहेषु च रोगस्वभावात् श्लेष्मा प्रकोपमापद्यते, तत्र यदा अन्यदोषापेक्षया स्वल्पः प्रकोपो भवति तदा प्रथम भवन्नपि श्लेष्मा स्वल्पं लिंगं दर्शयेद् । यदा तु न स्वल्पः तदा प्रथमं सम्पूर्ण एव श्लेष्मप्रमेहो भूत्वा कालवशात् कफादौ क्षीणे पित्तमेहतां प्रतिपद्यते (अ. सं.ानि १०-५३- इन्दु) | | |
| दूष्यम्-मेदः | सामान्यानि | मेदोवृद्धिः स्वेदाधिक्यं, आविलमूत्रता । |
| मांस | | |
| शरीरजं क्लेदः (मूत्रम्) | सर्वमेहेषु | तालुगलजिह्वादन्तेषु मलवृद्धिः, बहुमूत्रता, तालुमुखशोषः पिपासा, |
| विशेषाणि-रसौजः (रसरूपमोजः पोषकौजः) | | यथासम्भवं मूत्रे दर्शनमेतेषाम् |
| रक्तम् | | |
| वसा | | |
| मज्जा | | |
| लसीका | | |

(१) प्रमेहपूर्वरूपामाकृतिर्यत्र दृश्यते । किंचिच्चाप्याधिकं मूत्रं तं प्रमेहिणमादिशेत् ॥

(२) कृत्स्नान्यर्धानि वा यस्मिन् पूर्वरूपाणि मानवे । प्रवृत्तमूत्रमत्यर्थं तं प्रमेणिमादिशेत् । (सु. नि. ६-२२)



तद्वदोजोऽपि परं हृदयस्थमष्टबिन्दुप्रमाणमाधारः प्रासृतिकस्य रसात्मकस्यौजसः क्षयवृद्धिभाजः (अ. सं. शा. ८-१३)

तच्चौजः परं मानेनाष्टबिन्दुप्रमाणं । प्रासृतिकस्य महतः ओजसः आधारः तदायत्तयोगक्षेमत्वान्महतः । (इन्दुः)

---

## कुष्ठसम्प्राप्तिलक्षणयोः सम्बन्धः

| सम्प्राप्तिः (सामान्या) | लक्षणानि |
|---|---|
| | पूर्वरूपाणि |
| (१) उद्भवः-शाखाः-प्रथमं त्वक् कुष्ठविसर्पादयो शाखानुसारिणो रोगाः (च. सू. १?) | अस्वेदनं / अतीस्वेदनं वा } वातः चलगुणतः |
| त्वक् कुष्णातीति कुष्ठं कालेनोपेक्षितम् सर्वं यस्मात् कुष्णाति तद्वपुः (अ.-सं.-नि. १४) | पारुष्यं-वातः-खरगुणतः |
| यत्र यत्र च दोषो विक्षिप्तो निश्चरति तत्र तत्र मण्डलानि प्रादुर्भवन्ति । एवं समुत्पन्नस्त्वचि दोषस्तत्र तत्र च परिवृद्धिं प्राप्याप्रति क्रियमाणोऽभ्यन्तरं प्रतिपद्यते धातूनभिदूषयत् (सु. नि. ५-३) | अति-श्लक्ष्णता- कफः- श्लक्ष्णगुणतः |
| बाधिर्यं कुष्ठितान्धत्वं जडताऽजिघ्रता तथा मुक्ता कौण्यपंगुत्वे क्लैब्योदावर्तमन्दताः (सांख्यकारिका व्याख्यायां वाचस्पतिमिश्रोद्धृततन्त्रान्तरवचनम्) | वैवर्ण्यम्-रक्तं |
| | कण्डूः- कफः- कर्मतः |
| | निस्तोदः वातः- कर्मतः |
| | सुप्तता - वातकफौ - शीतगुणतः |
| | परिदाहः पित्तं - उष्णगुणतः |
| | परिहर्षः-शीतगुणतः-वातः |
| | लोमहर्षः ,, ,, |
| | खरत्वं-वातः-खरगुणतः |
| | ऊष्मायणं-पित्तं-उष्णगुणतः |
| | गौरवं-कफः-गुरुगुणतः |
| | श्वयथुः-कफः-स्रोतोरोधः |
| | अभीक्ष्णं काये विसर्पागमनम् } वातपित्ते |
| | कायच्छिद्रेषूपदेहः मांसमलवृद्धिः |
| | पक्वदग्ध / दष्टभग्न / क्षतोपस्खलितेषु / अतिमात्रं वेदना } वातः-कर्मतः |

| सम्प्राप्तिः ( सामान्या ) | लक्षणानि |
|---|---|
| | स्वल्पनामपि च व्रणानां दुष्टिः असंरोहणं च दाहः-पित्त-उष्णगुणतः } कफदुष्टिः |
| | श्रमः-वातः कर्मतः |
| | क्लमः-वातः-कर्मतः |
| | असृजःकृष्णता-वातः-रूपतः |
| | कोठोत्पत्तिः-रक्तं– |

(२) संचारः-तिर्यगाभिः सिराभिः तस्य रोगस्य क्रमेण सर्वशरीरे प्रसरः
पित्तश्लेष्माणौ प्रकुपितौ परिगृह्यानिलः सिराणां स्थूलता
प्रवृद्धतिर्यग्गाः सिराः सम्प्रपद्य समुद्धूय बाह्यं मार्गं प्रति समन्ताद्विक्षिपति ( सु. नि. ५-३ )
तिर्यग्गाः सिरा इति नाभिप्रभवास्त्रिधा हि सिरा सम्भवन्ति ऊर्ध्वगा, अधोगा-स्तिर्यग्गाश्चेति ।
अन्ये तु सिराशब्देन धमनीरपि साहचर्या-दाहुः । उक्तं च तिर्यग्गाणां चतसृणा मेकैका [ सु. शा. ९ ] इत्यादि [ गय-दासपंजिका ]
[३] आश्रयः–त्वक् [ बाह्या ] लसीका, असृक, आमिषम् त्रयो दोषाः युगपत् प्रकोपमापद्यन्ते, त्वगादयश्चत्वारः शैथिल्यमापद्यन्ते । तेषु शिथिलेषु दोषाः प्रकुपिताः स्थानमधिगम्य सन्तिष्ठमाना-स्तानेव त्वगादीन् दूषयन्तः कुष्ठान्याभि निर्वर्तयन्ति (च. नि. ५-६)
[४] अवयवः–केवलं शरीरम् अतः प्रभ-वाण्यभिनिर्वर्तमानानि केवलं शरीरमुपत-पन्ति (च. नि. ५-३ )
[५] स्रोतोदुष्टिः–रक्तवहं-मांसवहं—
रसवहं (लसीकादुष्टिः)



| सम्प्राप्तिः (सामान्या) | लक्षणानि |
|---|---|
| रसस्य सारो रक्तं मलः कफः लसीका च (अ.-सं.-शा ६-८५) | |
| [६] द्रव्यसंग्रहः- | |
| स्थानिकदोषः–श्लेष्मा | कण्डूः–कर्मतः<br>उत्सेधः–रूपतः |
| पित्तम् | दाहः–उष्णगुणतः<br>रागः–रूपतः<br>परिस्रवः– ,,<br>पाकः–तीक्ष्णगुणतः |
| वातः | तोदः–कर्मतः<br>संकोचः–शीतगुणतः<br>हर्षः– ,, ,,<br>शोषः–रूक्षगुणतः<br>रौक्ष्यं:–रूक्षगुणतः |
| कुष्ठस्य पुनर्मन्दपित्तामिति [ गयी ] न च किंचिदस्ति कुष्ठमेकदोषप्रकोपीनमित्तं [च. नि. ५-४] | |
| इह वातादिषु त्रिषु प्रकुपितेषु त्वगादिश्चतुरः प्रदूषयत्सु वातेऽधिकतरे कपालकुष्ठमभिनिर्वर्तते पित्तेनौदुंबरम् ( च. नि. ५-६ ) | |
| दूष्याणि - त्वक् | त्वग्दुष्टिः,- स्पर्शाशत्वं त्वगीन्द्रियनाशः ) |
| लसीका | व्रणे लसीकास्रुतिः |
| असृक् | वैवर्ण्यं, रक्तमण्डलदर्शनम्<br>व्रणः व्रणे रक्तस्रावः पूयः |
| मांसम् | उत्सन्नमांसता, पिडकोद्गमः |

सप्तद्रव्याणि कुष्ठानां प्रकृति-विकृतिमापन्नानि भवन्ति । तद्यथा त्रयो दोषाः-वातपित्तश्लेष्माणः, प्रकोपणविकृताः, दूष्याश्च शरीर धातवस्त्वक्-मांसशोणित-विकृता इति । ( च. नि. ४-३ )

अत्रेदमवधेयम्-कुष्ठे सामान्यलिंगानि शास्त्रे नोक्तानि । अतः सम्प्राप्तितः सामान्यलिंगान्यनुमेयानि । अत्र च संहितोक्तेषु कुष्ठस्य वातादिलिंगेषु त्वगा-द्याश्रितकुष्ठलिंगेषु च कानिचन लिंगानि प्रायोभावीनि सामान्यलिंगत्वेनात्र निर्दिष्टानि । येषु मध्ये प्रधानतः स्पर्शहानिः, सिरापृथुता विशिष्टमण्डलश्च महाकुष्ठबोधकानि लिंगानि भवन्ति ।

## अतीसारादिरोगाणां सम्प्राप्तिसन्तुलनतालिका

| रोगनाम | उद्भव | संचारः | आशयः | अवयवः | स्रोतोदुष्टिः | स्थानिकदोषः | दूष्यम् |
|---|---|---|---|---|---|---|---|
| अतीसारः | अन्तःकोष्ठः आमाशयः अग्निमांद्यम् | पुरीषाशयः | पुरीषाशयः | उदरम् | पुरीषवहस्रोतः | वातः, आग्निः | अम्बु [रसः] पुरीषम् रक्तजाद्यतिसारेषु तत्तधातूनां दूष्यत्वं । |
| ग्रहणीरोगः | अन्तःकोष्ठः ऊर्ध्वामाशयः अग्निमान्द्यम् | अन्नवहं स्रोतः | ग्रहणी | ग्रहणी | अन्नवहं [ पित्तधरा कला] | आग्निः [पाचक- पित्तम्] वायुः [समानः] कफः [क्लेदकः] | रसः |
| गुल्मरोगः | महास्रोतः [आमपक्वाशयौ] | महास्रोतः [आमपक्वाशयौ] | महास्रोतः एकदेशे | उदरम् | अन्नवहं पूरीषवहं | वातः | रसः |
| उदररोगः | कोष्ठः आग्निमान्द्यं | सिराः | त्वक्-मांसा-न्तरम् | उदरम् | अम्बुवहं स्वेदवहं | वातः, प्राणः अपानः समानः । पित्तम्-पाचकम् । श्लेष्मा क्लेदकः | अम्बु, स्वेदः, रसः, |

## अतीसारादिरोगाणां सम्प्राप्तिसन्तुलनतालिका

| रोगनाम | उद्भवः | संचारः | आशयः | अवयवः | स्रोतोदुष्टिः | स्थानिकदोषः | दूष्यम् |
|---|---|---|---|---|---|---|---|
| ज्वररोगः | आमाशयः | रसवाहिन्यः | केवलंसमनरस्कं शरीरम् | केवलं शरीरं | रसवहं स्वेदावरोधः | पाचकापित्तं (ऊष्मा) | रसः |
| उन्मादः | हृदयम् | मनोवह-स्रोतांसि | मनःबुद्धिः | मनः,शिरस्ता-ल्वन्तरम् | मनोवहस्रोतः | साधकापित्तं, तर्पक कफः प्राणेदानौ वायू,रजस्तमसोच | रसः, मनः |
| अपस्मारः | हृदयम् | धमन्यः | मनःइन्द्रिया-तनानि | मनः, शरीरं | संज्ञावहानि (हृत्स्रोतः) | साधकापित्तं, व्यानप्राणोदाना वायवः, तर्पकः, कफः रज-स्तमसी च | रसः, मनः |
| मूर्च्छा | मज्जा, बाह्या-भ्यन्तराणि करणायतनानि | संज्ञावह-नाड्यः | हृदयम् | बाह्याभ्यन्तर-कारणानि | संज्ञावहं, रसवहं, रक्तवहम् | पित्तं, रजस्तमसी च | रसः, रक्तम्, मनः |
| पाण्डुरोगः | हृदयम् रस-वहस्रोतः | धमन्यः | त्वंक्मांसान्तरं | सर्वांगं | साधकपित्तवहं (रसवहम्) | पित्तं-साधकम्, कफः-अवलम्बकः, वातः,-व्यानः | रसः रक्तम्, त्वक, मांसं मनः |
| प्रमेहः | मेदोवहस्रोतः | रसायन्यः, मूत्रवाहिन्यः | मूत्रवहस्रोतः | बस्तिः | मेदोवहं, मांसवहं उदकवहं, मूत्रवहं | श्लेष्मा ( क्लेदकः ) पाचक, पित्तं, अपानव्यानौ वायू | मेदः, मांस, शरीरजं क्लेदः रसौजः रक्तम्. वसा, मज्जा, लसीकौ |
| कुष्ठं | शाखाः (प्रथमं त्वक्) | तिर्यग्गाः सिराः | त्वक् [बाह्या] लसीका, रक्तं मांस, | केवलं शरीरं | रक्तवहं, मांसवहं, रसवहं | श्लेष्मा, पित्तं-वातः | त्वक्, लसीका, असृक मांसम् |

प्रथमं दोष--दूष्यसम्मूर्च्छना प्रारभ्यते तस्य उद्भवः इतिनाम सम्मूर्च्छनायाः पूर्णतायां यत्राश्रयं करोति तस्याश्रय इतिनाम ।

यस्मिन्नवयवे लक्षणानि व्यक्तीकरोति तस्य अवयवः इतिनाम । संचारस्तु सम्मूर्च्छनाया व्याप्तिप्रदेशः उच्यते । स्थानिकदोषदूष्याणां विक्षोभप्रारम्भः उद्भवस्थाने एव भवति । आश्रयस्थाने विक्षोभः संपूर्णः सन् रोगो व्यक्ततां याति । अत्रायं विचारार्हो विषयः—येषां रोगाणां अतीसारादीनां उद्भवः समानो दृश्यते तेषां पूर्वरूपेषु साम्यता दृश्यते तत्र ह्यतीसारग्रहणीगुल्मोदराणां उद्भवससाम्यं वर्तते । तत्राऽपि ग्रहण्यतिसारयोः साम्याधिक्यम्, तथा गुल्मोदरयोश्च । ज्वरोऽपि आमाशयसमुद्भवः, किन्तु आश्रयसंचारादीनां वैशिष्ट्यात् पूर्वरूपेषु वैशिष्ट्यं दृश्यते । एवं उन्मादापस्मारमूर्च्छाः समानोद्भवाः, अतः पूर्वरूपेषु साम्यं वर्तते, उन्मादस्य चिरकारित्वात् तत्र अन्येभ्यः वैशिष्ट्यं वर्तते । पाण्डुरोगस्य हृदयोद्भवत्वेऽपि आश्रयादीनाम् वैशिष्ट्यात् पूर्वरूपे वैशिष्ट्यं भवति । प्रमेहकुष्ठयोरुद्भवसाम्यं नास्ति अतः पूर्वरूपेऽपि साम्यं नास्ति । किन्तु दोषदूष्याणां किंचित् समानतादर्शनात् लक्षणेष्वपि किंचित् साम्यं दृश्यते ।

---

# रोगस्वभावविशेषः—अवस्थाविशेषश्च

सम्प्राप्तिनिर्माणप्रकारविशेषैः सम्प्राप्तिघटकानां बलाबलविशेषैश्च रोगस्वभावविशेषा भवन्ति । यदा हि सम्प्राप्तिघटकानां व्यापारः मूर्च्छनादिः शीघ्रं सम्पद्यते तदा स रोगः आशुकारि भवति । अन्यथा चिरकारी भवति । ज्वरापस्मारमूर्च्छाश्वासकासादयः शीघ्रकारिणः । एतेषु हि पूर्वरूपावस्था अत्यल्पकालमेव व्याप्नोति, ततो व्यक्तलक्षणानि ततश्च भेदोऽपि शीघ्रमेव व्यक्तो भवति । अनेक चात्र दोषदूष्यादीनां सम्प्राप्तिघटकानां व्यापारः शीघ्रं सम्पद्यते इति ज्ञायते । आशुक्रियाकरणादाशुकारीत्युच्यते ।

सम्प्राप्तेः चिरात्सम्पन्नता यस्मिन्रोगे भवति तस्य चिरकारीति संज्ञा । यथा पाण्डुरोगप्रमेहकुष्ठादयः । तेषु हि प्राग्रूपावस्था चिरकालं भवति तथा व्यक्तिभेदा अपि चिरादभिनिर्वर्तन्ते । अतस्तेषां चिरकारिणः इति संज्ञा ।

सम्प्राप्तिघटकानां बलाबलविशेषतः रोगाणां मृदुत्वं दारुणत्वं वा भवति । उक्तं च " द्वै रोगानीके बलभेदेनमृदु दारुणं च ( च. वि. ६-३ ) दारुणा हि अनुपक्रान्ता मारयन्ति, इन्द्रियाद्युपघातं वा कुर्वन्ति, अतस्तेषां बलित्वमनुमीयते । मृदवस्तु दुःखमुत्पादयन्तोऽपि न दुश्चिकित्स्या भवन्ति । उक्तं च—



सन्ति ह्येवं विधा रोगाः साध्या दारुणसम्मताः ।
ये हन्युरनुपक्रान्ता मिथ्याचारेण वा पुनः ॥ ( च. सू. १८-३७)

साध्याश्चाप्यपरे सन्ति व्याधयो मृदुसम्मताः ।
यत्नाऽयत्नकृतं येषु कर्म सिद्ध्यत्यसंशयम् ॥ ( च. सू. १८-३८ )

तत्र रोहिणीराजयक्ष्मावातजप्रमेहादयो दारुणाः । एकदोषजज्वरकासादयो मृदवः । तत्र मृदवोऽपि अपथ्यसेवनादिभिः दारुणा भवितुमर्हन्ति । दारुणा अपि कदाचिदल्पापचारात् उत्पन्नाः मृदवो भवितुमर्हन्ति । अत एव जनपदोध्वंसकालेवातकफज्वरः दारुणो वा मृदुर्वा भवेत् । निदानदोषदूष्यविशेषेभ्यो विकार विघातभावाभावप्रतिविशेषा भवन्ति इति वदता चरकेण रोगस्वभावविशेषाणां कारणानि सूचितानि ( च. नि. ४-४ )

निदानदोषदूष्याणां परस्परं नानुबन्धः— न विकाराभिनिर्वृत्तिः

,, ,, ,, कालप्रकर्षादनुबन्धः— चिरकारित्वं रोगस्य

,, ,, ,, दुर्बलतानामबन्धः—मृदुत्वं रोगस्य

,, ,, ,, शीघ्रानुबन्धः – शीघ्रकारित्वं रोगस्य

,, ,, ,, बलवतामनुबन्धः— दारुणव्याधिः

( महान्तः यथोक्तसर्वलिंगाश्च )

एवं सम्प्राप्तिविशेषेण रोगस्वभावविशेषो भवति

## रोगावस्था

रोगोत्पत्त्यनन्तरं रोगमुक्तिपर्यन्तं मरणपर्यन्तं वा बहवो लक्षणविशेषाः उद्भूयमानाः प्रविलीयमानाश्च दृश्यन्ते । यानि रोगोत्पत्तिकाले दृश्यन्ते, कतिचिद्दिनान्तरं तेषु कानिचन लक्षणानि अपगच्छन्ति, नवीनानि कानिचन दृश्यन्ते । एवं लक्षणपरिवर्तनदर्शनात् सम्प्राप्तिरपि परिवर्तत इति गन्तव्यं । प्रधानलक्षणानपगमात् स्थानव्यत्यासाभावाद्वा सम्पूर्णतया न सम्प्राप्तिः परिवर्ततेति ज्ञायते । अतो रोगस्य अन्यथात्वं न भवति । एतादृशी परिवृत्तिरेवावस्थेत्युच्यते । अवस्थाचौषधान्नविहारैः कालेन च परिवर्तते ।

अवस्थाविशेषज्ञानं हि चिकित्साविशेषविनिश्चये प्रयोजनकारि भवति । उक्तं च –

व्याध्यवस्थाविशेषान् हि ज्ञात्वा ज्ञात्वा विचक्षणः ।
तस्यां तस्यामवस्थायां चतुःश्रेयः प्रपद्यते ॥ ( च. नि. ८-३७ )

## सामावस्था

सर्वेषु: प्रथममामः अस्त्येवेति पूर्वमेव प्रतिपादितम् । अतः सामता सर्व-रोगसाधारणी प्रथमावस्था । तत्रापि आमप्रधानेषु ज्वरातीसारग्रहण्यामवातप्रभृतिषु आमावस्था स्पष्टतरा भवति । तथा शोथविद्रधिगुल्मादिष्वपि आमपच्यमानपक्वा-वस्थाः स्पष्टाः ज्ञायन्ते । उदररोगे अजातोदकावस्था एवामावस्था, पिच्छोत्पत्तिः पच्यमानावस्था, जातोदकावस्था चपक्वावस्थेति ज्ञेयम् ।

### अत्रोदाहरणत्वेनामज्वरलिंगानि विचार्यन्ते

### सामज्वरलक्षणानि

| | |
|---|---|
| अरुचिः | आमस्य कर्म |
| अविपाकः | स्रोतोरोधात् |
| उदरगौरवं | गुरुगुणतः |
| हृदयाविशुद्धिः | आमः–कर्मतः |
| हृदयोद्वेष्टनं–वातः | स्रोतोरोधजन्यः |
| तन्द्रा | गुरुगुणतः |
| आलस्यं | स्थिरगुणतः |
| ज्वरःअविसर्गी } | स्रोतोरोधात् |
| ,, बलवान् } | |
| दोषाणामप्रवर्तनम् | ,, |
| लालाप्रसेकः | ,, |
| हृल्लासः | कर्मतः |
| क्षुन्नाशः | स्रोतोरोधः |
| मुख विरसं | स्रोतोरोधजन्यो वायुः |
| मुखस्याविशुद्धिः | रूपतः |
| गात्राणां स्तब्धता | शीतगुणतः |
| ,, सुप्तत्वम् | ,, |
| ,, गुरुत्वम् | गुरुगुणतः |
| बहुमूत्रता | स्रोतोरोधजन्यवायुः, मूत्रमतिप्रवर्तयति |
| विट् न जीर्णा | रूपतः |
| विबन्धः | स्रोतोरोधः |
| अस्वेदः | ,, |

आमस्य गुणाः श्लेष्मगुणसमानाः वर्तन्ते । अतः सामतालिंगानि कफज-लिंगसदृशानि दृश्यन्ते । रसविकृतिरेव खल्वामः, तस्मात् रसस्यज्वरलक्षणान्यपि सदृशान्येव भवन्ति । अतस्तत्र विभेदकानि लक्षणानि वक्तव्यानि ।



आमस्य प्रधानं कर्म स्रोतोरोधः । अत एव वाग्भटे सामादोषलक्षणेषु प्रथमं स्रोतोरोधः उक्तः ( अ. हृ. सू. ११ )

अतः स्रोतोरोधकृतानि सामज्वरलक्षणानि दृष्ट्वा ज्वरस्य सामतां वदेत् । तानि च विबन्धः, दोषाणामप्रवर्तनम्, ज्वरः अविसर्गी बलवान् । इति लक्षणानि । मुखस्याविशुद्धिः, न विट्जीर्णा, एतौ च प्रत्यक्षतः आमबोधकौ । मुखस्याविशुद्धिश्च मलोपलिप्तजिह्वया ज्ञायते, न विड् जीर्णेति जले बुडनेन ज्ञायते । एवमेतेषु लक्षणपंचकेषु बहूनां दर्शनेऽवश्यं सामज्वरत्वं लक्षणीयम् । सुश्रुतेऽनशनप्रस्तावे सामताया विशिष्टं लक्षणमेव सूचितम्—

आनद्धस्तिमितैर्दोषैर्यावन्तं कालमातुरः ।
कुर्यादनशनं तावत्ततः संसर्गमाचरेत् ।। (सु. उत्तर. ३९-१०१)

स्तिमितैर्दोषैरप्रचलितरूपैरानद्धो बद्ध इव भवेत्······स्तिमितत्वं च दोषा-
णामामरसावनद्धत्वात् ( डल्हणः ) । दोषाणां स्तैमित्यादेव ज्वरोऽविसर्गी
भवति । स्रोतसामवरुद्धत्वाच्च बलवान् भवति । ज्वरस्य बलवत्वं च ज्वरसामा-
न्यलक्षणाधिक्येन ज्ञेयम् सामान्यलक्षणानि च स्वेदावरोधः, सन्तापः, सर्वांगग्रहणं,
वैचित्यमरतिश्चेति भवन्ति । पित्तज्वरेऽपि लक्षणान्येतानि भवन्त्येव । आमस्या-
ल्पत्वे जाते पित्तज्वरे स्वेदो व्यक्तो भवति । आमावस्थायां तु तीक्ष्णवेगादिना
पित्तजत्वं ज्ञेयम् । निरामकफज्वरे कासादयः सन्ति, पूर्वोक्तामस्य विशिष्टलक्षणानि
न सन्ति । सामावस्थायां कासादिभिः कफजत्व ज्ञेयम् । रसस्थज्वरेऽपि नातिव्या-
प्तिर्भवति दोषस्तैमित्यबलवज्ज्वरादिविशिष्टलिंगानमभावात् ।

अथातीसारे ग्रहणीरोगे च सामता पुरीषे दृश्यते । तत्रामातीसारे, ग्रहण्यां-
चामाशये, वातातीसारे तु पुरीषाशय एव वाय्वाकाशाग्न्योर्मान्द्यादामोत्पत्तिः ।
पुरीषे आमगन्धः, दुर्गन्धः, सशूलं पुरीषप्रवृत्तिः पुरीषस्याप्सुनिमज्जनम् आटोपः
[ स्रोतोरोधजनितवातकृतः ] प्रसेकः [ स्रोतोरोधकृतः ] एतानि लक्षणानि अती-
सारस्य सामावस्थायां भवन्ति । तत्र पुरीषस्य द्रवावस्थायां जले निमज्जनं न
ज्ञायते, तदाऽन्यलक्षणैः सामता ज्ञेया ।

## पच्यमानावस्था

ज्वरे लंघनस्वेदनकालयवागूतिक्तकरसैश्च इद्धोऽग्निर्यदा आमं पचति तदा पच्यमानावस्था भवति । तल्लक्षणानि चैवं भवन्ति ।

ज्वरवेगोधिकः–पित्तोष्माधिक्यात्

तृष्णाः –पित्तेन रसस्थाम्बुक्षपणात्
प्रलापः–मानसिकं लक्षणं–पित्तस्योष्णगुणेन ।
श्वसनं–हृदयस्थरसक्षपणकृतवातवृद्धेः, हृदयस्य प्राणवह –
स्रोतोमूलत्वाच्च ।
भ्रमः–धातुक्षयकुपितवातेन, पित्तस्योष्मणगुणेन च ।
मलप्रवृत्तिः–स्रोतोरोधस्यापगमनारम्भः
उत्क्लेशः–दोषाणां स्तैमित्यापगमनारम्भात् ।

अन्तर्वेगलक्षणान्यप्येवंविधान्येव । किन्त्वन्तर्वेगे स्रोतोरोधलक्षणानि सन्ति पच्यमानज्वरे तु स्रोतोरोधापगमलक्षणानीति विशेषः। एवं विद्रधिशोथगुल्मादिष्वाम-पित्तरक्तप्रधानेषु पित्ततेजःसंयोगात् आमे पच्यमाने वातपित्तयोरेव लक्षाणानि दृश्यन्ते । अतीसारे आमलक्षणानामल्पत्वे पच्यमानावस्था ज्ञेया, उदरे पिच्छोत्पत्तिः पच्यमानावस्था ।

## निरामावस्था

कालोपि आमपाचकेष्वन्यतमः । प्रायशः लंघनस्वेदनादिभिः सम्यक्प्रयुक्तैः सप्तरात्राभ्यन्तरे आमः पाच्यते । केवलमष्टाहे व्यतीते न निरामत्वं वाच्यं, किन्तु लक्षणैरेव ज्ञेयम् ।

उक्तं च–मृदुर्ज्वरो लघुर्देहश्चलिताश्च मला यदा ।
अचिरज्वरितस्याऽपि भेषजं योजयेत्तदा ।। (अ. हृ. चि. १-१४)
अर्वागपि च देयैः स्याद्भेषजं दोषपाकतः । (सु. उत्तर. ३९ )
न च निःसप्ततैवेका निरामज्वरलक्षणम् ।।
चिरादपि हि पच्यन्ते सन्निपातज्वरे मलाः ।।
सप्तरात्रातिवृत्ति च सामतादि च लक्षणम् ।
तस्मादेतद्द्वयं दृष्ट्वा निरामं ज्वरमादिशेत् ।।
( खरनादवचनं– च– चि–३.१३७– चक्रोद्धृतं )

अत्र चक्रः सिद्धान्तयति– तस्मात् क्षुदादयोऽष्टाहश्च व्यस्तं समस्तं च लक्षणम् । अत्रेयमभिसन्धिः--सामता निरामता च लक्षणैरेव ज्ञेये, सप्तरात्ररूपः कालस्तु प्रायो निरामतासंभवकालत्वादुक्तः । ततः पूर्वमपि निरामतास्यात्, ततः परमपि निरामताऽनुवर्तेत् । अतः कालेन केवलं तरुणत्वं जीर्णत्वं वा निश्चीयेते न तु निरामत्वम् । द्विविधा हि सामता, एका रसस्य, अपरा दोषस्य, रससामता तु मुखवैरस्यादिलक्षणा दोषसामता तरुणत्वरूपा सा अष्टाहेनैवापैति मा. नि. २–६५ मधुकोशः ) ।



## निरामज्वरलक्षणानि

क्षुत्–अग्निसन्धुक्षणात्
क्षामता–आमक्षयेन भेदक्षयस्याभिव्यक्तिः ।
ज्वरमार्दवम्ः–स्रोतोरोधापगमनेन स्थानिकदेषस्य स्वस्थाने आगमनारम्भः
दोषप्रवृत्तिः–स्रोतोरोधापगमः (कासे सुखेन कफप्रवृत्तिः, गुदेन वातप्रवृत्तिः)
गात्रलाघवम्–शरीरे लघुगुणवृद्धिः
चलिताः मलाः–( पुरीषादयः ) स्रोतोरोधापगमः ।

अतीसारे आमगन्धविरहितत्वं मलस्यजले प्लवनं च निरामतालक्षणानि । शोथविद्रध्यादिषु पच्यमानकालकृतानां वातपित्तजनितानां लक्षणानां मार्दवं, पूयसंचारश्च पक्वलक्षणानि भवन्ति । उदरे जातोदकत्वं पक्वलक्षणाम् । एवमन्येषु रोगेषु सामावस्था पच्यमानावस्था निरामावस्था च ऊह्याः ।

## तरुणावस्था जीर्णावस्था च

रोगाणां तरुणत्वं जीर्णत्वं च केवलं कालकृतावेव । एतौ सर्वेष्वपि रोगेषु भवतः । तत्र तरुणावस्थायां दोषाः नाऽतिरूढमूलाः, दूष्याश्च नातिदुष्टाः, रोगी च नातिदुर्बलः भवति धातुक्षपणंचाल्पम् । अतो नवः सुखसाध्यत्वेऽन्यतमो हेतुः । उक्तं च " ग्रहेष्वनुगुणेष्वेकदोषमार्गो नवः सुखः (अ.–हृ.–सू. १।।३१ ) तथा च चरके कुष्ठनिदाने उक्तम्––

यस्तु प्रागेव रोगेभ्यो रोगेषु तरुणेषु वा ।
भेषजं कुरुते सम्यक् स चिरं सुखमश्नुते ।।
यथाह्यल्पेव यत्नेन छिद्यते तरुणस्तरुः ।
स एवातिप्रवृद्धस्तु छिद्यतेऽति-प्रयत्नतः ।।
एवमेव विकारोऽपि तरुणः साध्यते सुखम् ।
विवृद्धः साध्यते कृच्छ्रादसाध्यो वाऽपि जायते ।। ( च. नि. ५-१३-१५)
अणुर्हि प्रथमं भूत्वा रोगः पश्चाद्विवर्धते ।
स जातमूलो मुष्णाति बलमायुश्च दुर्मतेः ।। [ च. सू. ११-५८ ]

जीर्णावस्थायाः अन्त्यभागे रुग्णस्य दशां एवं वर्णयति–

तथाविधं च कःशक्तो दुर्बलं व्याधिपीडितम् ।
कृशं क्षीणेन्द्रियं दीनं परित्रातुं गतायुषम् ।। [ च. सू. ११-६१ ]

अतः सर्वेषु रोगेषु तरुणावस्थायामेव चिकित्सा कार्येति वदति–

तस्मात् प्रागेव रोगेभ्यो रोगेषु तरुणेषु वा ।
भेषैजः प्रतिकुर्वीत य इच्छेत्सुखमात्मनः ।। [ च. सू. ११-६३ ] ।

क्वचित्तु जीर्णावस्थायां सुखसाध्यत्वमुक्तं यथा – रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणम् – प्रसूतिकालादनन्तरं पिण्डीभूते रक्तगुल्मे स्नेहादिनोपस्कृतदेहायाः सुखसाध्यत्वम् [ सु. उत्तर ४२-१५ डल्हणः ] । नवत्वं तरुणत्वं चैकार्थकावेवेति पूर्वोक्तचरकवचनादेवोन्नीयते । एवं ज्वरप्रकरणेऽपि नवज्वर-तरुणज्वरशब्दावेकार्थकावुपयुक्तौ । चक्रपाणिनाप्येवमेव व्यवहृतौ [च. नि. ३-१६ चक्रः ] ।–

तरुणज्वरे तरुणत्वकालावधिश्चोक्तः पुष्कलावतेन् [ चक्रोद्धृतवचनम् ]
आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः ।
मध्यं द्वादशरात्रं पुराणमत उत्तरम् ।। [ च. चि. ३-१६०-व्याख्या ]

अत्र चाऽतरुणा न जीर्णावस्था च मध्यमावस्थेत्युक्ता । यदि तरुणावस्थायां सम्यगुपक्रान्तो व्याधिस्तदा जीर्णावस्थायां दोषाः दुर्बला भवन्ति, आमश्चापैति । ततश्च सम्प्राप्तिघटकेषु किंचित्परिवर्तनं भवति । यथा ज्वरे – दद्याद् इति लंघिते सर्पिर्दद्यात्कफेमन्दे वातपित्तोत्तरे ज्वरे । [अ. हृ. चि. १-८१] यदा हि निरामं तेजः ज्वरं करोति, तेनोष्मणा वमनादिभिश्च रूक्षितस्य वायुरनुबलो भवति –

रूक्षं हि तेजो ज्वरकृत्तेजसा रूक्षितस्य च ।
वमनस्वेदकालाम्बु कषायलघुभोजनैः ।।

यः स्यादतिबलो धातुः सहचारो सदागतिः । [ अ. हृ. चि. १-८५ ]
अनेन सम्प्राप्तिविशेषेण दौर्बल्यकार्श्यरौक्ष्यादिलक्षणविशेषा भवन्ति । क्वचिच्च जीर्णज्वरस्य लक्षणविशेषा उक्ता–

त्रिसप्ताहे व्यतीते तु ज्वरो यस्तनुतां गतः ।
प्लीहाग्निं सादं कुरुते स जीर्णज्वर उच्यते ।।

इति तु तन्त्रान्तरवचनमतिपुराणाभिप्रायेण द्रष्टव्यम् [मा. नि २–६५ मधुकोशः ।

अत्र च दीर्घकालज्वरकृतमेदःक्षयेण प्लीहवृद्धिर्भवति । जीर्णज्वरानुवृत्तिकारणं चैवमुक्तम्–देहधात्वबलत्वाच्च ज्वरो जीर्णोऽनुवर्तते । [अ.हृ.चि. १-८३]। देहस्याबलत्वं = स्रोतसामदृढत्वं, धातूनामबलत्वं = स्वस्रोतोऽभिसंचरणाशक्तिः [ हेमाद्रिः ] सर्वेषामेव रोगाणामनुवर्तनेऽयमेव हेतुः ।



इयं च सप्तदिनमर्यादा आशुकारिषु ज्वरादिषु ज्ञेया, चिरकारिषु तु वर्षैकपर्यन्तं तरुणत्वं भवति । अत एवाष्टांगहृदये–नवः–इतिपदस्य व्याख्यायां हेमाद्रिः “ अनतिक्रान्तवत्सरः ” इत्यवदत् ।

सर्वेषु रोगेषु तरुणत्वजीर्णत्वे भवतः । उदाहरणार्थं कानिचन संहितावचनान्युद्ध्रियन्ते । सुश्रुते चिरोत्थातिसार रक्तः [सु. उत्तर ४०-१०] तथा चरकेऽपि [ च. सू. १३-३९ ] अष्टांगहृदये चिरकालानुषक्ता प्रवाहिकोक्ता [अ. हृ. चि. ९-४१ ] रक्तपित्ते नवोत्थितस्य साध्यत्वोक्त्या चिरोत्थितस्यासाध्यत्वमनुमीयते [ च. चि. १६-६२ ] । क्षतजक्षयजकासौ नवौ कदाचित्सिध्येतामित्युक्तम् [ च. चि. १८-३० ] शोथः अहीनमांसस्य...नवो बलस्थस्य सुखः साधने [ च. चि. १२-१.६ ] एवं प्रायशः सर्वत्र तरुणावस्था जीर्णावस्था च सूचिताऽस्ति । एतज्ज्ञानेन चिकित्साविशेषविनिश्चयः सुकरः यथा ज्वरे जीर्णे घृतपानादि । तथा साध्यासाध्यविनिश्चये व्यवस्थाविशेषः सहायको भवति ।

## धातुगतावस्था

यदा कश्चिद्रोगस्य सामान्यसम्प्राप्तिगतो दोषः आगन्तुदोषेण सह क्रमेण रसादिधात्वाश्रयं करोति तदा रोगः धातुगत इत्युच्यते । सर्वेऽपि ज्वरा रसानुगा भवन्ति । यदाज्वरः रसस्थो भवति तदा विशेषलक्षणानि प्रदर्शयति । एवं कुष्ठः त्वग्लसीकासृगामिषगान् दूषयित्वोत्पद्यते । पुनः त्वक्रक्तमांसादिगतः विशेषलक्षणान्युत्पादयति । अत्रैव चक्रपाणिः सामान्या दुष्टिः विशेषा दुष्टिश्चेति द्वैविध्यमुक्तवान् । सर्वकुष्ठेषु प्रथमं त्वच्येव वैकृतं भवति विशेषेण पश्चाद्वैशेषिको दुष्टिः कालप्रकर्षद्रक्तादिषु भवति । चतुर्धातुदुष्टिश्चेह कुष्ठोत्पादे सामान्यदुष्ट्यभिप्रायेणोक्ता, वैशेषिको दुष्टिस्तेषां क्रमेणैव भवति [ च. नि. ५–३ चक्रः ] ।

रोगे धात्वाश्रिते सति तत्र विशिष्टः प्रक्षोभस्तेनैव च प्रतिक्रियाविशेषाश्चोत्पद्यते । अत्र च पोषकधातुषु सामान्या दुष्टिः पोष्यधातुषु विक्षोभेन विशेषदुष्टिर्भवति । तत्र पोष्यधातुगत एव रोगः तत्तद्धात्वाश्रित उच्यते विशिष्टलक्षणकर्तृत्वात् । विशिष्टविक्षोभनाशाय धातुगते रोगे तत्तद्व्याधिषु या व्याधिप्रत्यनीकचिकित्सा क्रियेते सैवात्राऽपि क्रियते । यथा रक्तगते ज्वरे रक्तष्ठीवनं दृष्ट्वा रक्तपित्तहरः वासाप्रवालयोः प्रयोगः क्रियते, विक्षेपप्रलापादिमांसमेदस्थलक्षणानि दृष्ट्वा उन्मादवत् उन्मादगजकेसरीत्यादियोगैः शमनं साध्यते । तमः प्रवेशे मूर्च्छारोगवत् संज्ञाप्रबोधनाय कारस्करस्योपयोगः क्रियते । अतश्चैताः रसरक्तादिगतावस्थाः ज्वरस्योपद्रवसदृशाः विशिष्टलक्षणवत्वात्, विशिष्टचिकित्साप्रशमनीयत्वाच्च

इदानीं तत्तद्धातुगतावस्थायां विशिष्टलक्षणान्युच्यन्ते ।

रसस्थेज्वरे – दैन्यं, सदनं ।
रक्तगते ज्वरे – रक्तष्ठीवनं, पिडकाः, रागः ।
मांसस्थे ,, – पिण्डिकोद्वेष्टनम्, गात्रविक्षेपः, अन्तर्दाहः ।
मेदःस्थिते ,, – भृशंस्वेदः, असहिष्णुता, दौर्गन्ध्यं च ।
अस्थिगते ,, – अस्थिभेदः, कण्ठकूजनम्, गात्रविक्षेपश्च ।
मज्जगते ,, – तमःप्रवेशनं, शैत्यं, अन्तर्दाहः, मर्मच्छेदः ।
शुक्रगते ,, – स्तब्धमेढ्रता, शुक्रस्यप्रवृत्तिः, मरणं च ।

एतानि च तत्तद्धातूनां विशिष्टविक्षोभज्ञापकानि भवन्ति; अत्र च तत्तद्धातूनां क्रियानाशः, बहिःप्रवृत्तिः, तन्मलवृद्धिः इत्यादयो विशेषा भवन्ति । ग्रन्थोक्तान्यन्यानि तत्तद्धातुषु प्रकुपितवातादिलिंगान्येव ।

संहितासु हि ज्वरे, कुष्ठे, वातव्याधौ च धातुगतावस्थाः वर्णिताः । तत्र ज्वरे स्थानिकदोषः पित्तं, कुष्ठे कफप्रधानः स्थानिकदोषः वातव्याधौ तु वातः स्थानिकदोषः । अनेन च सर्वेष्वपि रोगेषु धातुगतावस्था सूचिता भवति । यत्र च स्थानिको दोषः पित्तं तत्र ज्वरवदूह्यं, यत्र कफः स्थानिकोदोषः तत्र कुष्ठवदूह्यं यथा प्रमेहफिरंगोपदंशादिषु । यत्र च वातः स्थानिको दोषः तत्र वातव्याधिवत् प्रकल्प्यं यथा शूलादिषु । एवमम्लपित्तप्रमेहशूलादिषु विभिन्नदोषजनितव्याधिषु जीर्णावस्थायां धातुगतत्वमूह्यम् । यथा शूलरोगे रक्तदर्शनात् रक्तगतत्वमित्यायुर्वेदीयनिदानम्, तत्रत्वाधुनिकाः व्रणोत्पत्तिं वर्णयन्ति । चिकित्सा च रक्तगतशूलस्य कर्तव्या । अम्लपित्तेऽपि रक्तदर्शनादेवमेव । प्रमेहे स्वापः, विपूयकः, शोथः इति लक्षणानि दृष्ट्वा रक्तगत व्याधिरिति चिकित्सा प्रारभ्यते । एवं सर्वरोगेषु विशिष्टलक्षणैर्धातुगतावस्था ज्ञातुं शक्यते ।

## धातुपाकः दोषपाकश्च

धातुपाकदोषपाकौ संहितासु कण्ठतः नोक्तौ । किन्तु सन्निपातज्वरे मोक्षाय दोषपाकः कारणं, वधायधातुपाकः कारणमिति व्याख्यातृभिर्व्याख्यायते । वाग्भटेन संततज्वरे मोक्षवधयोः कारणत्वेन दोषक्षपणं धातुक्षपणं चोक्तम् ।

अत्र च डल्हणोक्तधातुपाकलक्षणानि विचारार्हाणिभवान्ति तेनोक्तम् – सम्बाध्यमानो हृदि नाभिदेशे गात्रेषु वा पाकरुजोज्झितेषु पक्वेष्विवावैति रुजं ज्वरार्तः स धातुपाकी कथितो भिषग्भिः । ( सु. उत्तर. ३९–१८– डल्हणः ) माधवनिदानव्याख्यायां आतंकदर्पणेऽप्ययमेव श्लोकः किंचित्परिवर्तितः ( पाकरुजान्वितेषु … … पक्वेषु वा तेषु रुजाज्वरार्तः ) पठ्यते । अत्र च



रुजा विशेषण नाभिप्रदेशे, तथा पाकश्चेति लक्षणावुक्तौ । संततज्वरे यदा रोगाधिष्ठानस्थधातोः स्रोतसश्च पाकात् संघातभेदे संजाते एतादृशलक्षणानि भवन्ति । पाको हि विजातीयतेजः-संयोगः । तस्य कार्यं संघातभेदः । अत्र च स्रोतसः संघातभेदः क्रियते ज्वरोष्मणा अयमेवात्रधातुपाकशब्देनोच्यते । धातुपाकेनैव मरणमिति यदुच्यते व्याख्यातृभिः तच्चिन्त्यं, एतद्व्यतिरिक्तलक्षणैरपि मरणदर्शनात् । डल्हणेन तु मरणकारी धातुपाकः शकुनैररिष्टैर्वा ज्ञेय इति वृद्धवैद्यपद्धत्तिरुक्ता। मधुकोशे अन्यान्यपि लक्षणान्युक्तानि निद्रानाशः, हृत्स्तंभः, गात्रगौरवं, अरतिः, बलहानिः – ( मा. नि. –२–७६ मधुकोशः ) । पूर्वं डल्हणोक्तलक्षणसत्वे ज्वरे धातुपाकः निश्चेतव्यः निद्रानाशादयो ह्यन्यत्राऽपि भवन्ति । धातुपाकः आसाध्योऽपि धान्वन्तरीयैः प्रत्याख्याय चिकित्स्यते । एतादृशधातुपाकः केवलं ज्वरे उक्तेऽपि अन्येष्वपि रोगेषु भवति । यथा शूलरोगे रक्तगतावस्थायां पूर्वोक्तानि धातुपाकलक्षणानि भवन्ति । एवं रक्तप्रवाहिकायां, पित्तजगुल्मेऽपि कदाचित् धातुपाकेन तल्लक्षणानि भवन्ति ।

एवं पूर्वोक्तविशिष्टलक्षणैः रोगाधिष्ठाने धातुपाकात् स्रोतसः संघातभेदः संजातः इति ज्ञात्वा शीघ्रं चिकित्सा कार्या ।

दोषपाकश्च दोषस्थितामस्यैवपाकः इति पूर्वमेव प्रतिपादितम् । अत्रतु विशेषतः रोगाधिष्ठाने दोषपाकः उच्यते । तस्यलक्षणानि-दोषप्रकृतिवैकृत्यं, ज्वरदेहयोर्लघुता, इन्द्रियाणां वैमल्य- (मधुकोशे) एतैर्लक्षणैः रोगाधिष्ठाने स्रोतसो न हानिः, किन्तु तत्रस्थदोषस्यापगमो भवतीति ज्ञातव्यम् ।

## साश्रयनिराश्रयावस्था

गुल्मविद्रध्योर्भेदं वर्णयन् विजयरक्षित आह-विद्रधिः पच्यते गुल्मो न पच्यते निराश्रयत्वात् (मा.नि.२८-२०) सुश्रुतोऽप्याह न निबन्धोऽस्ति गुल्मानां विद्रधिः सनिबन्धनः (सु. नि.९-३०) निश्चित्य बध्नातीति निबन्धो रसरक्तादि, दूष्याणामभावाद्गुल्मानां मूलं नास्तीति, कुतः पुनरेषा महत्तरशोथरूपाणां मूलं नास्तीत्याह गुल्माकाराः-गुल्मरूपाः आत्मनैव वातादयः न पुनर्दूष्यसंश्रयाः (गयदासः) न चात्र दूष्यं विनैव रोगोत्पत्तिः शंक्या । गुल्मे रसः दूष्यमिति पूर्वमेव प्रतिपादितं न हि स्थानसंश्रयं विना गुल्मः सम्भवति । (सु. सू. २१, स्थानं च धातुः स्रोतोऽव्यवो वा भवेत् । तैर्विना वेदनाऽनुत्पत्तेः । स्रोतोऽवयवेऽपि रसः संचरत्येव, तेन सहैव दोषसंगः, ततः स्थानसंश्रयश्च भवति । अतो निराश्रय इत्यस्य केवलं दूष्याभावः इति वक्तुं न शक्यते, गुल्मेऽपि रसस्य दूष्यत्वात् ।

एवं निराश्रयस्यैव गुल्मस्य साश्रयावस्थां प्रतिपादयति विजयरक्षितः-गुल्मो न पच्यते निराश्रयत्वात् यदातु कारणवशादाश्रयं मांसादिकमासादयति, वातो- पशमनार्थे कृतस्वेदादिभिर्वा रक्तदुष्टिर्भवति तदा पच्यमानो विदाहनिमित्तकम् विद्रधित्वमाप्नोति । एवं गुल्मे साश्रयावस्थायां पाको भवति, तस्यैव विद्रधि- रिति धान्वन्तरीयाः । अवस्थान्तरमिति कायचिकित्सकाः । अत्रच किमेतत् साश्रयत्वं, निराश्रयत्वं चेति जिज्ञासोदेति ।

अत्रेयमभिसन्धिः—यदा दोषाः प्रकुपिताः स्रोतोऽवयवेषु अस्थायिनः अतएव संचारिणश्च शरीरधातून् विक्षोभयन्तः तेषु च सम्मूर्च्छन्तः विकारानुत्पा- दयन्ति । न चात्र स्थायिधातुषु रक्तमांसादिषु स्रोतोऽवयवेषु वा स्पष्टा विकृति- रुत्पाद्यते । यथा च प्रवहन्नदीस्रोतसि वेगवान् मारुतः तरंगादिकानुत्पादयति, न च तत्तीरेषु विकृतिमुत्पादयति तथा निराश्रयावस्थायां दोषोऽपि स्थायिधातुषु न विकृतिमुत्पादयति । यदा च तरंगविक्षोभादिभिः क्रमेण तीरे आघातात् तस्य नाशे तत्र दरीकन्दरादिविकृतिवत् स्रोतोऽवयवेषु स्थायिधातुषु रसरक्तादिषु च स्पष्टा विकृतिर्भवति तदा साश्रयावस्थोच्यते ।

आमाशयैकदेशे दोषाः पिण्डिता अवतिष्ठन्ते, तदवयवे चोत्सेधं विक्षोभं चोत्पादयन्ति, तदा चयापचयग्रन्थिरूपः सशूलोगुल्मः व्यक्तोभवति । स्रोतोऽ- वयवघटित—स्थायिधातुषु अन्तः प्रविश्य विकृतधातुवृद्ध्यादिना न दोषः विकृति- मापादयति । किन्तु केवलमवकाशे अस्थायिना रसेन साकं स्थितस्सन् स्रोतोऽ- वयवे प्रपीडनादिना क्रियात्मकविकृतिमुत्पादयति, न द्रव्यात्मकम् । यदा च स दोषः मांसधातौ तथा तत्रैकदेशेसंचितरक्ते चाश्रित्य स्थायिधातौ विकारमुत्पादयति तदा स एव गुल्मः साश्रयो भवति । धान्वन्तरीयास्त्वेतदेव विद्रधिमाचक्षते । तदा च तत्र शस्त्रक्रियैव प्रतिकारः ।

यद्यपि साश्रयनिराश्रयौ विद्रधिगुल्मयोरेवोक्तौ तथाऽपि अन्येष्वप्येवंभूतेषु व्याधिषु तत्सम्प्राप्तिवर्णनार्थ तयोरुपयोगः कर्तुं शक्यते । तस्य च चिकित्साविशेष- निर्णयेऽप्युपयोगोऽस्ति । वसामेहः मज्जमेहः अश्मरी इत्यादिषु स्थायिधातुषु विकृतेर- भावात् एते निराश्रया व्याधयः। तथा क्रिमिरोगोऽपि निराश्रयः। मधुमेहे पोषकौजः बहिर्याति न पोष्यमाजेः हृदिस्थितम् । अतः स निराश्रयो रोगः । ज्वरो रसानुगो निराश्रयोऽरोगः यदा धातुगतो भवति तदा साश्रय उच्यते । शस्त्रचिकित्सासाध्या व्याधयः प्रायशः साश्रया भवन्ति तत्र प्रत्यक्षतः स्थायिधातुषु विकृतिदर्शनात् । एवं स्थायिधातुषु स्पष्टतः विकृतिदर्शनात् साश्रयत्वं अन्यथा निराश्रयत्वं च वाच्यम् ।



## साध्यासाध्यता

साध्यता द्विविधा सुखसाध्या कृच्छ्रसाध्याचेति । असाध्यताऽपि द्विविधा याप्यता प्रत्याख्येयता चेति " सुखसाध्यः सुखोपायः कालेनाऽल्पेन साध्यते " ( च. चि. ८-३३ ) । " कृच्छ्रसाध्यस्तु साध्यते यत्नेन महता चिरात् " ।

याप्यः—शेषत्वादायुषो याप्यमसाध्यं पथ्यसेवया ।

लब्धाल्पसुखमल्पेन हेतुनाऽशुप्रवर्तकम् ॥ ( च. सू. ९-१७ )

याति नाशेषतो व्याधिरसाध्यो याप्यसंज्ञितः । (च. नि. ८-३४)

असाध्यः—क्रियाः सर्वाः अतिवर्तते ( प्रत्याख्येयः )

सम्प्राप्तेर्बलाबलविशेषैः रोगस्य साध्यासाध्यविशेषा भवन्ति ।

तत्र साध्यताकारणानि

| | |
|---|---|
| दोषदूष्यदुष्टेल्पता प्रमाणतः संख्यातश्च | पूर्वरूप—रूपाणामल्पता भवति |
| प्रकृतिदोषदूष्याणामतुल्यगुणानां मेलनम् | दोषः प्राबल्यं न लभतेऽन्यत्र प्रमेहात् ( तत्र हि दोषदूष्ययोः तुल्यगुणवत्वे अविरुद्धोपक्रमो भवति) |
| कालःदोषदूष्ययोरननुकूलः | दोषदूष्ययोः प्राबल्याभावः |
| देशः ,, ,, | ,, ,, |
| अधिष्ठानं अमर्म | मर्मणः अल्पे पि हानौ महानतिपातो भवति । |
| मार्गःएकः | चिकित्सासौकर्यम् |
| नवत्वेन रोगस्य अरूढमूलत्वं | अगम्भीर धात्वनुगत्वं च भवति । |
| देहस्य व्याधिक्षमत्वं | धातुन्हासः शीघ्रं न भवति । तीक्ष्णवीर्यानौषधविशेषानुपयुज्य शीघ्रंरोगनिवारणं कर्तुं शक्यते । |
| सर्वौषधक्षमो देहः | शीघ्रं चिकित्सा कर्तुं शक्यते । |

चतुष्पात्सम्पत्तिः

दोषदूष्याणां अनुकूलकालाधिष्ठानदेशकालादिलब्ध्या यथा यथा प्राबल्यं भवति तथा तथा रोगस्य कृच्छ्रत्वं, याप्यत्वं, असाध्यत्वं वा भवति । प्रायशः सर्वेऽपि रोगाः उत्पन्नमात्राः साध्याभवन्ति । दोषस्य प्राबल्यात् शरीरस्य दौर्बल्यात्, धातुक्षयात् मुख्यस्रोतोदुष्टेश्चासाध्यता भवति ।

नाऽसाध्यः साध्यतां याति साध्यो याति त्वसाध्यताम् ।

पादापचाराद्दैवाद्वा यान्ति भावान्तरं गदाः ॥ (च. नि. ८-३५ )

एवमेव विकारोऽपि तरुणः साध्यते सुखम् ।
विवृद्धः साध्यते कृच्छ्रादसाध्यो वापि जायते ॥ ( च.नि. ६-१५)
अणुर्हि प्रथमंभूत्वा रोगः पश्चाद्विवर्धते ।
स जातमूलो मुष्णाति बलमायुश्च दुर्मतेः । ( च-सू-९ )

क्वचिच्च अपचाराधिक्ये उत्पन्नमात्रा एवं कृच्छ्रसाध्या असाध्या वा भवन्ति।

## असाध्यलक्षणानि

प्रधानकर्मणा शिरोहृदयबस्तीनां तथेन्द्रियाणां चोपघातकं लक्षणं दृष्ट्वा रोगमसाध्यं विद्येयम् । तदा हि दोषाः प्रधानमर्माण्युत्पीडन् गम्भीरधातूननुप्रविश्यासन् निर्हरन्ति-उदाहरणत्वेन ज्वरस्यासाध्यलक्षणानि विचार्यन्ते ।

[१] हेतुभिर्बहुभिर्जातः बलिभिर्बहुरूपः असाध्यः

बलिनः बहवश्च हेतवः, तस्मात् बलवन्ति बहूनि लक्षणानि, लक्षणस्यबलंतावत् प्राणमर्मादिस्थानाश्रयत्वेन ज्ञायते स्वरूपतश्च परिमाणतश्चाऽपि बलवत्वं भवति। यथा श्वासः, मूर्च्छा, हृद्व्यथा, रक्तपित्तं, अतीसारः इत्येतानि सर्वदा प्रबलान्येव लक्षणानि भवन्ति ।

[२] शीघ्रमिन्द्रियनाशनः ज्वरः असाध्यः

इन्द्रियाण्येकादश तत्र दशेन्द्रियाणामधिष्ठानं शिरः मनसस्तु हृदयमेव। यथा ' प्राणः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च । यदुत्तमांगमंगानां शिरस्तदभिधीयते [ च. सू. १७-१२ ]। चिन्त्यं च हृदि संश्रितम् [ च. सू. ३० ] कर्मेन्द्रियानायाशने पक्षाघातादयः,ज्ञानेन्द्रियनाशने आन्ध्यबाधिर्यादयः; मनोपघाते मोहमूर्च्छादयश्च भवन्ति । इन्द्रियोपघातलक्षणैः ज्वरोष्मणा शिरोहृदयदुष्टिरवगन्तव्या । तस्मात्—

ऊष्मणः आधिक्यं + मोहः इत्यसाध्यज्ञापिकावस्थाभवति ।

[३] केशसीमन्तकृत् बलवान् ज्वरोऽसाध्यः

केशेष्वकस्मात् सीमन्तानामुद्भवः ज्वरोष्मणः अत्याधिक्यं सूचयति । तदा चासाध्यता ज्ञेया ।

[४] [क] आरम्भात् विषमः — वातप्रधानः

[ख] गम्भीरः = अन्तर्दाहः + तृष्णा + आनाहः + अंगमर्दः + श्वासः + कासः । अत्राद्ये द्वे पित्तोष्माधिक्यसूचके, अन्यानि त्रीणि धातुक्षयजनितवातकृतानि ।

[ग] दैर्घ्यरात्रिकं — जीर्णत्वेन धातुगतत्वं सूच्यते



[छ] क्षीणता— बलक्षयः ( ओजः क्षयः )

[झ] अतिरूक्षता—वातवृद्धिः

एवं ज्वरस्य गम्भीरत्वं, धात्वाश्रयत्वं ओजःक्षयः वातवृद्धिश्च असाध्यलक्षणानि ।

(५) शीतार्दितः अन्तरुष्णश्च-अन्तर्वेगज्वरः ।

विसंज्ञः शेते-शिरोगतज्वरोष्मणः आधिक्यात् अथवा निपातितः ताम्यति मनोमोहः ज्वरोष्मणा हृदयबाधनात् एवं ज्वरस्यान्तर्वेगत्वे सति यदि रुग्णः मूर्च्छितः ताम्यमानो वा भवति तदा स ज्वरोऽसाध्यः ।

(६) हृष्टरोमता—वातवृद्धिः ।
रक्ताक्षत्वं—रक्तगतत्वम्
हृदिसंघातशूलः—मर्मगतो वातः
वक्त्रोच्छ्वासः प्राणवहदुष्टिः ( प्राणल्पता )

एव हृन्मर्मगतत्वं, प्राणाल्पता । रक्तगतत्वं वातवृद्धिश्चैकत्रासाध्यावस्थायां भवन्ति ।

(७) हिक्का } प्राणहरलक्षणे
श्वासः }

तृष्णा—ऊष्मणः आधिक्यम्
मूढता—इन्द्रियमोहः
विभ्रान्तलोचनता—मनोमोहः
सन्ततोच्छ्वासः— प्राणदुष्टिः
क्षीणता—ओजःक्षयः

एवं ऊष्माधिक्यं, इन्द्रियसम्मोहः, प्राणवहदुष्टिः, ओजःक्षयश्च मिलितान्यसाध्यताबोधकानि भवन्ति ।

(८) हतप्रभत्वं भ्राजकदुष्टिः

हतेन्द्रियत्वं—इन्द्रियमोहः
क्षीणता—ओजक्षयः
गम्भीरः—अन्तर्दाहः, + तृष्णा, + अंगमर्दः, + आनाह, +श्वासः,+कासः
तीक्ष्णवेगः—उष्णाधिक्यम्

एवं उष्णाधिक्यं, गम्भीरत्वं, ओजःक्षयः, इन्द्रियमोहः भ्राजकदुष्टिश्च मिलितानि असाध्यज्ञापकानि लक्षणानि भवन्ति ।

एवमन्येष्वपि रोगेषु प्रधानमर्मोपघातकैः लक्षणैरसाध्यत्वं ज्ञेयम् ।

## रिष्टावस्था

रिष्टं च द्विविधं–पुरुषाश्रितं पुरुषमनाश्रितम् चेति। दूतादिगतं पुरुषमनाश्रितम् । रुग्णे एव विकृतलक्षणानि यानि तानि पुरुषाश्रितानि [ च. इ. १–४] " विकृतिस्त्रिविधा लक्षणानिमित्ता, द्वितीया सा यस्या उपलभ्यते निमित्तं यथोक्त निदानेषु । तृतीया तु रिष्टमित्युच्यते। सा तु निमित्तार्थानुकारिणी या तामानिमित्तां निमित्तमायुषः प्रमाणज्ञानस्येच्छन्ति भिषजो भूयश्चायुषः क्षयनिमित्तां प्रेतलिंगानुरूपां, यामायुषोऽन्तर्गतस्य ज्ञानार्थमुपादिशन्ति धीराः यां चाधिकृत्य पुरुषसंश्रयाणि मुमूर्षतां लक्षणान्युपदेक्ष्यामः " [ च. इ. १–७ ] एषु चारिष्टलक्षणेषु दोषाणां कारणत्वं प्रतिपादयाति चरकः—

क्रियापथमतिक्रान्ताः केवलं देहमाप्लुताः ।
चिन्हं कुर्वन्ति यद्दोषास्तदरिष्टं निरुच्यते ॥ [ च. इ. ११–२९ ]

ननु निर्निमत्तं रिष्टमित्युक्तं, इह दोषजन्यत्वं रिष्टानामुच्यत इति कथं न विरोधः ? न निर्निमित्तत्वं ह्यनुपलभ्यमाननिमित्तत्वमुक्तं, तेन रूक्षादिहेतुप्राप्तिमन्तरेण प्रत्यासन्नमरणप्रभावकुपितदोषजन्यत्वं तत्तदरिष्टानामुच्यते, तेनेहाप्युपलभ्यमान व्यक्तनिमित्तता असद्भावान्न विरोधः [ चक्रः ] । अत्यन्तं कुपितदोषैः सर्वेऽपि शरीरावयवाः क्रमेण उपहन्यन्ते तदाऽरिष्टान्युत्पद्यन्ते । अरिष्टलक्षणानि च दृष्ट्वा-अस्य शरीरावयवाः हीनगुणकर्माणो भवन्ति येन च मरणमचिरादाप्नोतीति ज्ञायते । उक्तंच—

तन्त्रयन्त्रेषु भिन्नेषु तमोन्त्यं प्रविविक्षताम् ।
विनाशायेह रूपाणि यान्यवस्थान्तराणि च ॥
भवन्ति तानि वक्ष्यामि यथोद्देशं यथागमम् । (च. इ. १२।४५)

तन्त्रं शरीरं तस्य यन्त्रं सिरास्नायूवादिरूपम्–( चक्रः ) । रिष्टभूतानि दारुणस्वप्नान्यपि दोषकृतान्येव—

मनोवहानां पूर्णत्वाद्दोषैरतिबलैस्त्रिभिः ।
स्रोतसां दारुणान् स्वप्नान् काले पश्यति दारुणे ॥ ( च. इ. ५-४१)

रिष्टलक्षणैः अमुकदोषः अमुकं लक्षणं करोतीति वक्तुं न शक्यते किन्तु आभ्यन्तरविकृतिव्यापारः प्राणघातकः अनुमीयते ।

रिष्टं नाम मरणख्यापकमेव, कदाचित् रोगभावेऽपि रिष्टलक्षणदर्शनमुक्तं तदपि मरणख्यापकं भवति ।

रिष्टलक्षणे रोगस्यासाध्यतां ज्ञात्वा प्रत्याख्याय चिकित्सेत ।

रिष्टलक्षणानां विशेषाभ्यासः आवश्यकः यद्दानीमुपेक्षितो वर्तते ।



## अन्तर्वेगबहिर्वेगौ

सम्प्राप्तिघटकेषु स्रोतोरोधस्य प्राधान्यं पूर्वमेव प्रतिपादितम् । स्रोतसः सूक्ष्मत्वेऽपि प्रधानमर्माश्रितस्रोतोऽवरोधे बलवल्लक्षणं भवति यथा पक्षघातादिषु । स्रोतोऽवरोधकेषु आमो हि प्रधानो हेतुः । आमाधिक्ये तेन च बाह्येषु स्रोतःस्ववरुद्धेषु ज्वरोष्मा अन्तरेव चरन् अन्तर्वेगज्वरलक्षणान्युत्पादयति । स्रोतोरोधस्य बलाबलादन्तर्वेगबाहिर्वेगावस्थाद्वयं सम्भवति ।

## अन्तर्वेगज्वरलक्षणानि

अन्तर्दाहोऽधिकः– बहिः स्रोतोरोधाधिक्यात् अन्तरेवोष्णतानुभूतिः ।
तृष्णा – ऊष्णाधिक्येनाब्धातुक्षयः ।
प्रलापः – वैचित्याद्याधिक्येन ( मनः सन्तापाधिक्यात् )
श्वसनं – हृदयस्थरसक्षयात् वृद्धेन् वातेन प्राणवहस्रोतोदुष्टेः ।
भ्रमः–धातुक्षयजनितवातेन पित्तोष्मणाच ।
सन्ध्यास्थिशूलम्– धातुक्षयकुपितवातस्य स्रोतोरोधेन विलोमगातित्वात् ।
अस्वेदः – स्रोतोरोधः
दोषविनिग्रहः– ,,
वर्चोविनिग्रहः – स्रोतोरोधः
स्रोतोरोधलक्षणैः साकमन्तर्दाहादिलक्षणानि अन्तर्वेगज्वरनिर्णायकानि भवन्ति ।

## बहिर्वेगज्वरलक्षणानि

बाह्यसन्तापोऽधिकः – बहिरेव ज्वरोष्मणः आधिक्यम् ( स्रोतोरोधाल्पत्वात् )

| | |
|---|---|
| तृष्णादीनामन्तर्वेग लक्षणानां मार्दवम् | ज्वरोष्मणोऽन्तर्मार्गेऽल्पत्वात् |

यथा ज्वरे अन्तर्वेगबहिर्वेगो तद्वत् वातरक्ते कुष्ठे च अवगाढोत्ताने द्वे अवस्थे–तद्धि ( वातरक्तं ) कुष्ठवदुत्तानं भूत्वा कालान्तरेणावगाढी भवति ( सु. चि. ५--३ ) ।

त्वक्मांसाश्रयमुत्तानं तत्पूर्वं जायते ततः ।
कालान्तरेण गम्भीरं सर्वान् धातूनभिद्रवत् ॥ [ अ. हृ. नि. १६-८ ]

उत्ताने दोषः दूष्यसहितः प्रायस्त्वच्येव लक्षणानि करोति तानि च त्वचः ताम्रत्वं श्यावलोहित्वं वा, तथा सायामाभृशदाहोषाच भवति । गम्भीरं वातरक्ते दोषः

गम्भीरधातूननुगच्छन् तीव्रवेदनाविशेषात् खंजत्वपंगुत्वादीन्, श्वयथुं ग्रथितं पाकिनं च करोति । एवं कुष्ठेऽप्यूह्यम् ।

एवं विसर्पश्वयथुगुल्मार्शोविद्रध्यादयः शाखानुसारिणी बाह्यमार्गगत्वादुत्ताना भवन्ति । त एव कोष्ठानुसारिणः अवगाढा भवन्ति ।

एवं लक्षणविशेषैरन्तराश्रयबहिराश्रयित्वं रोगाणां ज्ञेयम् ।

## लीनावस्था

कदाचिद्दोषाः लीनत्वाद्व्याधिकरणासमर्थाः शरीरे लीनाः तिष्ठन्ति । अपचाराल्पत्वात्,देहस्य बलवत्वात् कालप्रकृत्यादीनामनुकूलाभावाच्च दोषाः धातुष्वेव लीनाः अनुकूलादीन् प्रतीक्षन्ते । अत एव ते व्यभिचारिकारणानीत्युच्यन्ते । अनुकूलतोत्पतो रोगं व्यक्तीकुर्वन्ति ।

रोगोत्पत्त्यनन्तरमपि रोगस्य लीनावस्था भवति कदाचित् । दूष्यदेश-प्रकृतीनां बलेन क्षपितबलाः दोषाः धातुष्वेव लीयन्ते, तदा रोगः निवृत्त इव दृश्यते । एषैव लीनावस्था रोगस्य । यदा स्वबलो वर्धते दूष्यादीनामबलत्वं च तदा दोषः रोगं पुनः व्यक्तं करोति । एषाऽवस्था विषमज्वरे शूले अपस्मारे एवमन्येष्वपिकेषुचिद्रोगेषु भवति । तत्र विषमज्वरे लीनत्वं वर्णयति सुश्रुतः—

धात्वन्तरस्थो लीनत्वान्न सौक्ष्म्यादुपलभ्यते ।
अल्पदोषेन्धनः क्षीणः क्षीणेन्धनइवानलः ॥ [ सु. उत्तर ३९ ]

चरके—अधिशेते यथाभूमि बीजं कालेच रोहति ।
अधिशेते तथा धातुं दोषः कालेच कुप्यति ॥
स वृद्धिं बलकालं च प्राप्य दोषस्तृतीयकम् ।
चतुर्थकं च कुरुते प्रत्यनीकबलक्षयात् ॥ [ च. चि. ३-६८ ]

प्रत्यनीकदूष्यादीनां बलाबलत्वं ज्वरस्यापगमागमयोः कारणम् । उक्तं च
दोषः प्रवर्तते तेषां स्वेकाले ज्वरयन् बली ।
निवर्तते पुनश्चैष प्रत्यनीकबलाबलः ॥

लीनोऽपि दोषः कानिचन लक्षणानि करोत्येव । उक्तं च—
सचाऽपि विषमो देहं न कदाचिद्विमुंचंति ।
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते ॥
वेगेतु समतिक्रान्ते गतोऽयमिति लक्ष्यते ॥(सु.उत्तर ३९–६३–६४)

ग्लानिः—रसक्षपणात् धातुपोषणाल्पत्वात्



कार्श्यम्—वातलक्षणं ( मेदसः क्षयः )
गौरवम्—आमकृतम्

संततज्वरेऽप्युक्तम्—विसर्गद्वादशे कृतवा दिवसेऽव्यक्तलक्षणम् ।
दुर्लभोपशमः कालं दीर्घमप्यनुवर्तते । (च.चि. ३-५९)

......एतेन तदाऽपि ज्वरो लीनोऽस्त्येव परं लक्षणानि तस्य व्यक्तानि न भवन्तीति दर्शयति–( चक्रः ) ।

अपस्मारेऽपि हृदये इन्द्रियायतनेषु च दोषाः लीनास्तिष्ठन्ति । यदा च काम-क्रोधलोभमोहहर्षशोकचिन्तोद्वेगादिभिरीरिताः हृदयमिन्द्रियायतनानि च सहसा अभिपूरयन्ति तदा जन्तुरपस्मरति ( च. नि. ८–४ ) । तत्र दोषवेगश्च क्षणिकः सः स्वयमेवापैति लीनश्च तिष्ठति । पुनः प्रकोपणकारणैर्बलो भूत्वा वेगं करोति । तथा चोक्तम्—

क्रमोपयोगाद्दोषाणां क्षणिकत्वात्तथैव च ।
आगमाद्दैश्वरूप्याच्च स तु निर्वण्यते बुधैः ।
देवे वर्षत्यपि यथा भूमौ बीजानि कानिचित् ।
शरदिप्रतिरोहन्ति तथा व्याधिसमुद्भवः ॥
स्थायिनः केचिदल्पेन कालेनाऽभिप्रवर्धिताः ।
दर्शयन्ति विकारांस्तु विश्वरूपान्निसर्गतः ॥

अपस्मारो महाव्याधिस्तस्माद्दोषज एवतु । (सु. उत्तर ६१--१८--२१ )

......तथाऽल्पेनाऽपि कालेन शरीरस्था दोषाः किंचिदुपचिताः विकारं जनयन्तीति । एतदेव स्पष्टीकुर्वन्नाह--स्थायिन इत्यादि--अवश्यमवस्थायिनो वाता-दयः परं केचिदल्पेनाऽपि कालेनाऽभिप्रवर्धिताः सन्तो नानारूपान् विकारान् दर्श-यन्ति ( डल्हणः ) ।

एवं शूलादिष्वपि कालस्वभावादिभिरीरिताः स्वे काले पीडयन्ति ततः वेगापगमे लीनास्तिष्ठन्ति ।

तत्रस्थाश्च विलम्बेरन् भूयो हेतुप्रतीक्षिणः ।
ते कालादिबलं लब्ध्वा कुप्यन्त्यन्याश्रयेष्वपि ॥ ( अ. हृ. सू. १३--१९ )

राजयक्ष्माऽपि कदाचित् व्यक्तलक्षणान्यकुर्वन् लीन एव तिष्ठति । पाश्चात्यचिकित्साशास्त्रे एषैवावस्था lateuag इति व्यवह्रियते ।

“ लीनान् सामदोषान् न निर्हरे”दित्युक्तम् । ( अ. हृ. सू. १३-२८ )

एवं लीनावस्थायां अप्रसन्नेद्रियत्वाव्यक्तदोषलक्षणामलक्षणादिना धातुवैषम्यं विशाय तेषां साम्यार्थे प्रयतेत ।

## रोगमुक्ति

अग्निमान्द्यामस्रोतोरोधदोषदूष्यसम्मूर्च्छनादिभिर्यथा रोगः क्रमेण प्रव्यक्तो भवति प्रायशस्तेनैव क्रमेण रोगविमुक्तिर्भवति । प्रथममग्नौ प्रदीप्ते आमे च पक्के स्रोतोरोध अपैति । ततश्च क्रमेण दोषदूष्यसम्मूर्च्छनापगमः, दोषधातुसाम्यं, ततः आरोग्यलाभो भवति । यदा च दोषदूष्यसम्मूर्च्छनापगमो भवति तदा क्वचित् लक्षणविशेषप्रादुर्भावः यथा ज्वरे । तत्र हि धातुप्रक्षोभविशेषात् लक्षणविशेषोत्पत्तिः ।

" धातून् प्रक्षोभयन् दोषो मोक्षकाले विलीयते " ( अ. हृ. नि. २-७६)

ननु दोषक्षयं विना न व्याधिनिवृत्तिः क्षीणश्च दोषः कथमेवंविधं लक्षणं कुर्यात् ? उच्यते, कश्चिद्भावः क्षीणोऽपि विनाशकाले स्वशक्तिं दर्शयति, यथा निर्वाणावस्थो दीपो विशेषात् प्रज्वलति । " अथवा दोषाभिभूतानां दोषापगमे क्षोभाद्दाहादयः तरलतरवानरपरिहीयमानतरुणतरुवल्लरीशिखरकम्पवादिति " ( मा. नि. २-७४ मधुकोश ) तत्राऽपि दारुणः अदारुणश्चेति ज्वरमोक्षप्रकार-द्वैविध्यम्—

बहुदोषस्य बलवान् प्रायेणाभिनवो ज्वरः ।
सत्क्रियादोषपक्त्या चेद्विमुचति सुदारुणम् ।। ( च. चि. ३-३२७ )

अत्रैव श्वसनस्वेदनादिलक्षणानि भवन्ति । यत्र चाल्पाल्पं चिरादुपरमः तत्र नैतेषामुत्पत्तिः । अल्पशो वोत्पत्तिः ।

कृत्वा दोषवशाद्वेगं क्रमादुपरमन्ति ये ।
तेषामदारुणो मोक्षो ज्वराणां चिरकारिणाम् ।। ( च. चि. ३-३२८ )

तत्र दारुणो मोक्षो सन्निपातज्वरे एव भवति । उक्तं च चक्रेण एतानि च लक्षणानि सन्निपातज्वर एव भवन्तीति ज्ञेयं, नाऽन्यत्र अदर्शनादेव ( चक्रः ) एतावेव Crisis of Lysis इति वर्णितावाधुनिकैः ।

## दारुणमोक्षलक्षणानि

श्वासः – वातः–स्पर्शतः – अतिप्रवृत्तिः ।
स्वेदः – वातः–व्यानः – ,,
कूजनं – ,, –शब्दतः –
वमनं – ,, –विमार्गगमनम्



चेष्टा – वातः चलः
वेपनम् – ,, ,,
प्रलापः – ,, ,,
उष्णानिशितानि चांगानि वातः ( वैषम्यम् )
हतप्रभः–वातः
विस्रंशता–इन्द्रियोपघातः
सक्रोध इव वीक्षते––उदानः ( वर्णकरः )

सदोषशब्दं च शकृद्द्रवं सृजति वेगवत्–वातः–चलः, शब्दतश्च ।
अत्र सर्वाणि लक्षणानि वातकृतान्येव दृश्यन्ते ।

त्रिदोषजे ज्वरे ह्येतदन्तर्वेगे च धातुगे ।
लक्षणं मोक्षकाले स्यादन्यस्मिन् स्वेददर्शनम् ।। ( भालुकिवचनम्
( मा. नि. २७५ मधुकोषः )

## ज्वरमुक्तलक्षणम्

दोषदूष्यसम्मूर्च्छनापगमे सम्पूर्णा रोगमुक्तिर्भवति ।

तस्य लक्षाणानि :
स्वेदः––स्रोतोरोधापगमात्––पित्तोष्मणो वा ।
लघुत्वं—आमापगमात्—पित्तस्य लघुगुणात् ।
शिरसः कण्डूः–पित्तं कर्मतः (च. सू. २०) श्लेष्मणेत्युक्तं मधुकोषे तच्चिन्त्यम् ।
मुखपाकः—यदा स्रोतोरोधापगमस्तदा बहिर्गतपित्तं मुखपाककारी भवति ।
क्षवथुः—स्रोतोरोधापगमः
अन्नलिप्सा—अग्निदीप्तिः—( स्वस्थाने पित्तागमनम् )
विगतसन्तापः—विकृतसन्तापनिवृत्तिः
विगतक्लमः—धातुपोषणे बाधाभावः
विमलेन्द्रियता
अव्यथा
प्रगतियोगि मनः
} मनसः इन्द्रियाणां च सन्तापाभावः
एवमतीसारे

यस्योच्चारं विनामूत्रं सम्यग्वायुश्च गच्छति ।
दीप्ताग्नेर्लघुकोष्ठस्य.स्थितस्तस्योदरामयः ।। ( सु. उत्तर ४० )

" एतेन सम्प्राप्तिभंग उक्तः । अतीसारे हि सम्प्राप्तिरियं यत् मूत्रोचितोऽपि द्रवधातुर्गुदेनैव प्रवर्तते, सर्वस्यैवाब्धातोर्गुदप्रवृत्तत्वात् , यदातु मूत्रमार्गेण

प्रवर्तते, तदाऽपि पुरीषप्रवृत्तिसमकालमिति ( मधुकोषः ) एवमन्येष्वपि रोगेषु
लक्षणैः सम्प्राप्तिभंगं विज्ञाय रोगमुक्तिर्वाच्या ।

रोगमुक्तावपि सहसा धातुसाम्यं न भवति । तदादोषधातुवैषम्यलक्षणानि
कानीचित् भवेयुः । यथा वातकफज्वरमोक्षानन्तर ज्वरमुक्तिलक्षणसत्वेऽपि अल्प-
कासः– उरःशूलादीनां सत्वात् वातकफयोर्वैषम्यं ज्ञायते । कार्श्यदौर्बल्यादिभि-
र्धातुक्षयः अनुमीयते । अतस्ततोऽपि पूर्वरोगचिकित्सां कृत्वा दोषोपशमः कार्यः ।
अनन्तरं रसायनसेवनेन धातुसाम्यं च कार्यम् । अन्यथा दुर्बले मार्गीकृते देहे
अल्पापचारेणापि रोगः पुनरागच्छेत् ।

एवं लक्षणवैशेष्येण रोगावस्थाः सूक्ष्मसूक्ष्माः समीक्ष्य तदनुसारं चिकित्सा-
करणेन भिषग्यशोऽर्थलाभानवाप्नोति उक्तं च–

दूष्यं देशं बलं कालमनलं प्रकृतिं वयः ।
सत्वं सात्म्यं तथाहारमवस्थाश्च पृथग्विधाः ।
सूक्ष्मसूक्ष्माः समीक्ष्यैषां दोषौषधनिरूपणे ।
यो वर्तते चिकित्सायां न स स्खलति जातुचित् ।। ( अ. हृ. सू.
१३–६८ )

अवस्थाः– रूपेष्ववान्तरं रूपम् ( हेमाद्रिः ) कालकृताः दशाः – अरुणः

इत्यशेषामयव्यापि यदुक्तं दोषलक्षणम् ।
दर्शनाद्यैरवहितस्तत्सम्यगुपलक्षयेत् ।।
व्याध्यवस्थाविभागज्ञः पश्यन्नार्तान् प्रतिक्षणम् ।।
( अ. हृ. सू. १२–५४–५५ )

## निगमनम्

( १ ) कथं वा पूर्वे ऋषिभिस्प्राप्तिर्ज्ञाता, किमस्माभिरपि योगाद्याचि-
न्त्यशक्ति विनाऽयुर्वेदीयपथा रोगसम्प्राप्तिर्ज्ञातुं शक्यते ? इति विचिकित्सायां
प्रत्यक्षादिप्रमाणैस्सम्प्राप्तिर्ज्ञातुम्मार्यत इति सिद्धम् ।

( २ ) सेतिकर्तव्यताको रोगोत्पादकहेतुर्निदानं, तस्य च सम्प्राप्तिविनि-
श्चयादनन्तरमेव विद्यते प्रयोजनं, अतस्सम्प्राप्तिलक्षणसम्बंन्धप्रतिपादने स्याल्पोप-
योगिता ।

( ३ ) सामान्यतया लिंग्यते ज्ञायतेऽनेनेति लिंगम् । चिकित्साशास्त्रे तु
दोषधातुमलानां स्थितिबोधकमेव लिंगम्, स्थितिश्च प्राकृती वैकृती वा भवेत् ।



विकृतदोषधातुमलबोधकानि यानि लिंगानि तानि सम्प्राप्तिबोधकानीत्यपि वक्तुं
शक्यते ।

( ४ ) व्याध्युत्पादकारणस्य व्याधिजननपर्यन्तं गमनं सम्प्राप्तिः । सा
संख्याविधिविकल्पबलकालविशेषरूपा व्याधिमोक्षपर्यंतमनुवर्तते । तस्यां ज्ञातायां
व्याधिज्ञानं सम्पूर्णं भवति तस्या अपनयनार्थमेव चिकित्सा क्रियते । सम्प्राप्ति-
पगमे व्याध्युपशमः अतस्सम्प्राप्तिस्सर्वथा ज्ञातव्या ।

[५] [क] अग्निमान्द्यामस्रोतोरोधदोषदूष्यविषशल्यपूयकृम्यादयो ये चान्ये
शारीरास्तद्व्यतिरिक्ताश्च भावविशेषाः शरीरे तिष्ठन्तो व्याध्युत्पादनसमर्था भवन्ति
ते सर्वेऽपि सम्प्राप्तिघटका भवन्ति ।

[ख] रोगोत्पादको दोषो वृद्ध एव भवति । स च विगुणस्रोतसि सज्जति ।
स्रोतोवैगुण्यं च स्थानिकदोषदूष्यवैषम्याद्भवति । जाठराग्निमान्द्यादपक्वाहाररस
आमो भवति, दोषाणां परस्परसम्मूर्च्छनाद्धात्वग्निमान्द्येन वाऽमो भवति । उभय-
त्राऽप्यग्निमान्द्यो हेतुरामश्च आहाररसविकृतिः । आमेन च स्रोतोरोधः । यत्र संगः
खवैगुण्याद्व्याधिस्तत्रोपजायते ।

[ग] सम्प्राप्तिघटकानि तत्तज्ज्ञापकैर्विशिष्टलक्षणैर्ज्ञायन्ते । लक्षणानि
शरीरभावानां द्रव्यगुणकर्माणि भवति । तैश्च लक्षणैस्सम्प्राप्तिघटकानां द्रव्यगुण-
कर्मात्मकत्वं ज्ञायते ।

[घ] रोगो हि लक्षणसमुच्चयज्ञायमानाभ्यन्तर-विकृतिपरम्परा एव,
तद्व्यापारस्सम्प्राप्तिः । रोगविनिश्चयश्च लक्षणसमुच्चयेन ज्ञातैः स्रोतोरोधदोषदूष्या-
दिभिः क्रियते ।

( ङ ) सम्प्राप्तिबलाबलविशेषानुसारं रोगस्वभावविशेषो भवति । कालप-
रिवृत्या चिकित्साविशेषैः पथ्यापथ्यविशेषैर्वा सम्प्राप्तिः परिवर्तते । तदा चावस्था-
विशेषाः रोगस्य भवन्ति, लक्षणविशेषाश्चोद्भवन्ति, तैश्च सम्प्राप्तिपरिवृत्तिर्ज्ञायते ।
अवस्थाविशेषाश्च–(१) आमपच्यमानपक्वावस्थाः, (२) तरुणजीर्णावस्थे, (३) धातु-
गतावस्था, (४) धातुपाकः दोषपाकश्च, (५) साश्रयानिराश्रयता, (६) साध्या-
साध्यता, (७) रिष्टावस्था, (८) अन्तर्वेगबहिर्वेगौ, (९) लीनावस्था, (१०) रोग-
मुक्तिः । इति ।।

दर्शनाद्यैरवहितो भिषगार्तान् प्रतिक्षणं पश्यन् लक्षणानि सम्यगुपलक्षयेत् ।
तैश्च सम्प्राप्तिं सम्यग् बद्ध्वा तदपनोदने प्रयतितव्यं यथावत् । तदा भिषक्प्राणा-
भिसरो भवति ।